'ॐ सद्योजातं प्रपद्यामि०' इत्यादि मन्त्र से पादों में न्यास करके 'हंसो हंसो' कहे। फिर 'ॐ वामदेवाय०' मन्त्र से ऊरुओं का न्यास कर 'हंसो हंसो' कहे। फिर 'ॐ अघोरेभ्यो०' मन्त्र से हृदयन्यास करके 'हंसो हंसो' कहे। फिर 'ॐ तत्पुरुषाय विद्महे०' मन्त्र से मुखन्यास कर 'हंसो हंसो' ऐसा कहे। फिर 'ॐ ईशान: सर्वविद्यानां०' से मूर्धा का न्यास कर 'हंसो हंसो' कहे। इस प्रकार यह तीसरा न्यास है। तीनों न्यासों को सम्पन्न करके सम्पुट (कृताञ्जलिपुट) करना चाहिये।

तद्यथा कृताञ्जलिपुट: ॐ त्रातारमिन्द्रमवितारमिन्द्रर्ठ०हवेहवे सुहवर्ठ०शूरमिन्द्रम्। ह्वयामिशक्रम्पुरुहूतमिन्द्रर्ठ० स्वस्तिनोमघवाधात्विन्द्र:॥ इति मन्त्रेण प्राच्यामिन्द्रं नमस्कुर्यात्॥१॥ ॐ त्वन्नोऽअग्नेवरुणस्यविद्वान्देवस्यहेडोऽ अवयासिसीष्ठा:। यजिष्ठोवह्नितम:शोशुचानोविश्वाद्वेषाꣳसिप्रमुमुग्ध्यस्मत्। इत्याग्नेय्यामग्निं प्रणमेत्॥२॥ ॐ सुगन्नः पन्थाम्प्रदिशन्नऽएहिज्ज्योतिष्मध्येह्यजरन्नआयु:अपैतुमृत्युरमृतम्मऽआगाद्वैवस्वतोनोऽअभयंकृणोतु॥ इति दक्षिणस्यां यमं प्रणमेत्॥३॥ ॐ असुन्वन्तमयजमानमिच्छस्तेनस्येत्यामन्विहितस्करस्य। अन्यमस्मदिच्छसातऽइत्या-नमोदेवि-

निर्ऋतेतुभ्यमस्तु॥ इति नैर्ऋत्यां नैर्ऋतिं प्रणमेत्॥४॥ ॐ तत्त्वायामिब्रह्मणा व्वन्दमानस्तदाशास्ते-यजमानोहविर्भिः। अहेडमानोव्वरुणेहबोध्युरुशꣳस॒मानऽआयुःप्रमोषीः॥ इति पश्चिमायां वरुणं प्रणमेत्॥५॥ ॐ आनो-नियुद्भिःशतिनीभिरध्वरꣳसहस्रिणीभिरुपयाहियज्ञम्। व्वायोऽअस्मिन्त्सवनेमादयस्वयूयम्पातस्वस्तिभिःसदानः॥ इति वायव्यां वायुं प्रणमेत्॥६॥ ॐ व्वयꣳसोमव्रतेतवमनस्तनूषुबिभ्रतः। प्रजावन्तःसचेमहि॥ इति उदीच्यां कुबेरं प्रणमेत्॥७॥ ॐ तमीशानञ्जगतस्तस्थुषस्स्पतिन्धियञ्जिन्वमवसेहूमहेव्वयम्। पूषानोयथावेद सामसद्वृधे-रक्षितापायुरदब्धःस्वस्तये॥ इति ईशान्याम् ईश्वरं प्रणमेत्॥८॥ ॐ अस्मेरुद्रामेहनापर्वतासोवृत्रहत्येभरहूतौ सजोषाः। यःशꣳसतेस्तुवतेधायि-पज्रऽइन्द्रज्येष्ठाऽअस्माँऽअवन्तु देवाः॥ इत्यूर्ध्वं ब्रह्माणं प्रणमेत्॥९॥ ॐ स्योना पृथिविनोभवानृक्षरानिवेशनी। यच्छानःशर्म्मसप्प्रथाः॥ इत्यधः पृथिवीं प्रणमेत्॥१०॥

एवं यः सम्पुटं कुर्य्यात् स स्यात् किल्बिषवर्जितः। तं दीप्यमानमीक्ष्यन्ते प्रेतचौराद्युपद्रवाः॥
न पराभवितुं शक्ताः पलायन्ते विदूरतः॥

एवं सम्पुटं कृत्वा चतुर्थं रक्षान्यासं कुर्यात्।

दशों दिशाओं में प्रणाम—१. 'ॐ त्रातारमिन्द्रः' इस मन्त्र से पूर्व दिशा के अधिपति इन्द्र को प्रणाम करे। २. 'ॐ त्वन्नो अग्ने०' इत्यादि मन्त्र से अग्निकोण के अधिपति अग्नि को अग्निकोण में प्रणाम करे। ३. 'ॐ सुगन्नपन्था०' इत्यादि ऋचा से दक्षिण में दिक्पाल यम को प्रणाम करे। ४. 'ॐ असुन्नवन्तं०' मन्त्र से नैर्ऋत्य कोण में उसके स्वामी निर्ऋति को प्रणाम करे। ५. फिर पश्चिम दिशा में उसके अधिपति वरुण को 'ॐ तत्त्वायामि ब्रह्मणा०' इत्यादि मन्त्र से प्रणाम करे। ६. फिर 'ॐ आनो नियुद्भिः०' इत्यादि ऋचा से वायुकोण में उसके अधिपति वायु को प्रणाम करे। ७. फिर 'ॐ वयं सोम०' इत्यादि ऋचा से उत्तर में उसके दिगीश सोम (कुबेर) को प्रणाम करे। ८. फिर ईशान कोण में 'ॐ तमीशानं जगतस्थुष०' इस ऋचा से उसके अधिपति ईश्वर (शिव) को प्रणाम करे। ९. फिर ईशान एवं पूर्व के मध्य में 'ॐ अस्मैरुद्रामेहना०' इत्यादि ऋचा से ब्रह्मा (ऊर्ध्व दिशा के स्वामी) को प्रणाम करे। १०. फिर सबसे अन्त में 'ॐ स्योनापृथिवीनो०' मन्त्र से नैर्ऋत्य तथा पश्चिम के बीच में अधः के स्वामी अनन्त को पृथ्वी में प्रणाम करना चाहिये। जो इस प्रकार सम्पुट (दिशाओं में) प्रणाम करता है, वह पापरहित हो जाता है। उसको प्रकाशित देखकर चोर, प्रेत आदि उपद्रव आँख उठाकर भी नहीं देखते हैं। उसे वे अपराजित जानकर दूर से ही भाग जाते हैं। इस प्रकार से सम्पुट (दिग्रक्षण) करके फिर चौथा न्यास (रक्षान्यास) करना चाहिये।

ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्यबृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टंय्यज्ञꣳ समिमन्दधातु। व्विश्वेदेवासऽइह-मादयन्तामो ३ म्प्रतिष्ठ॥१॥ इति गुह्ये। ॐ अबोध्यग्निःसमिधाजनानाम्प्रतिधेनुमिवायतीमुषासम्। जिह्वाऽइव-प्रवयामुज्जिहानाःप्रभानवःसिस्रतेनाकमच्छ॥२॥ इति जठरानले। ॐ मूर्द्धानन्दिवोऽअरतिम्पृथिव्यावैश्वानर-मृतऽआजातमग्निङ्कविꣳसम्राजमतिथिंजनानामासन्नापात्रंजनयन्तदेवाः॥३॥ इति हृदये। ॐ मर्म्माणितेवर्म्मणा च्छादयामिसोमस्त्वाराजामृतेनानुवस्ताम्। उरोर्व्वरीयोव्वरुणस्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु॥४॥ इति मुखे। ॐ जातवेदायदिवापावकोसि वैश्वानरोयदिवावैद्युतोसिसम्प्रजाभ्योयजमानायलोकं ऊर्जम्पुष्टिं दददभ्यावव्रृत्स्व॥१॥ ॐ विश्वतश्चक्षुरुतव्विश्वतोमुखोविश्वतोबाहुरुतव्विश्वतस्पात्। सम्बाहुभ्यांधमतिसम्पतत्रैर्द्यावाभूमीजनयन्देवऽएकः इति शिरसि॥५॥ इति चतुर्थो न्यासः।

फिर चतुर्थ न्यास (रक्षान्यास) इस प्रकार करे—'ॐ मनोजूति०' इस मूलोक्त मन्त्र से गुह्य में न्यास करे। फिर

'ॐ अबोध्यग्निः' इत्यादि ऋचा से जठराग्नि में न्यास करे (इस न्यास से जापक की भूख तथा पाचन शक्ति नहीं बिगड़ती है)। फिर 'ॐ मूर्धानं दिवो०' ऋचा से हृदय में न्यास करे। 'ॐ मर्माणिते०' इस ऋचा से मुख में न्यास करे। 'ॐ जातवेदाय दिवा पावकोसि०' तथा 'ॐ विश्वतश्चक्षु' इत्यादि दो ऋचाओं से शिर में न्यास करे।

अथ षडङ्गन्यासः पञ्चमः—ॐ यज्जाग्रत इत्यादिशिवसङ्कल्पान्ते ॐ हृदयाय नमः॥१॥ ॐ सहस्त्रशीर्षा पुरुष इत्यादिपुरुषसूक्तान्ते ॐ शिरसे स्वाहा॥२॥ ॐ अद्भ्यः संभूत इत्याद्युत्तरनारायणान्ते शिखायै वषट्॥३॥ ॐ आशुः शिशान इत्यप्रतिरथान्ते कवचाय हुम्॥४॥ ॐ विभ्राड्बृहदित्यादिसूक्तान्ते नेत्रत्रयाय वौषट्॥५॥ ॐ नमस्ते रुद्रमन्यव इत्यादिशतरुद्रियान्ते अस्त्राय फट्॥६॥ इति पञ्चमो न्यासः। **यज्जाग्रत इति षडर्चस्य शिवसङ्कल्प ऋषिस्त्रिष्टुप्छन्दः मनो० हृदयन्यासे विनियोगः।**

'ॐ यज्जाग्रतो०' इत्यादि छः ऋचाओं के शिवसङ्कल्पसूत्र को पढ़कर हृदयाय नमः कहकर हृदयन्यास करे। 'ॐ सहस्त्रशीर्षा०' इत्यादि सोलह ऋचाओं के पूरे पुरुषसूक्त का पाठ करके 'ॐ शिरसे स्वाहा' कहे। फिर 'ॐ अद्भ्यः संभृतं०' इत्यादि पूरे नारायणसूक्त का पाठ कर 'शिखायै वषट्' कहे। फिर 'ॐ आशुः शिशानो०' इत्यादि पूरे अप्रतिरथसूक्त (सत्रह ऋचाएँ) पढ़कर 'ॐ कवचाय हुं' कहे। फिर 'ॐ विभ्राट् बृहत्०' इत्यादि ऋचा से आरम्भ करके पूरा सूर्यसूक्त पढ़कर 'नेत्रत्रयाय वौषट्' कहे। अन्त में 'नमस्ते रुद्रमन्यव०' से आरम्भ कर पूरे शतरुद्रियसूक्त को पढ़कर अन्त में 'अस्त्राय फट्' कहे। यह पाँचवें न्यास की विधि है।

'अस्य श्रीमज्जाग्रत इति षडर्चस्य शिवसङ्कल्प ऋषिः। त्रिष्टुप् छन्दः। मनो देवता। हृदयन्यासे विनियोगः' कहकर हृदयन्यास के विनियोग के लिये जल छोड़ना चाहिये। यह शिवसङ्कल्प सूक्त का विनियोग है। आगे शिवसङ्कल्पसूक्त, पुरुषसूक्त इत्यादि सभी सूक्त दिये जा रहे हैं।

शिवसङ्कल्पसूक्तम्

ॐ यज्जाग्र॑तोदू॒रमु॒दैति॒दैवं॒तदु॑सु॒प्तस्य॒तथै॒वैति॑। दू॒र॒ङ्ग॒मञ्ज्योति॑षा॒ञ्ज्योति॒रेकं॒तन्मे॒मनः॑शि॒वस॑ङ्कल्पमस्तु॥१॥ येन॒कर्म्मा॑ण्य॒पसो॑मनी॒षिणो॑य॒ज्ञेकृ॒ण्वन्ति॑वि॒दथे॑षु॒धीराः॑। यद॑पू॒र्वंय॒क्षम॒न्तः॑प्र॒जाना॒न्तन्मे॒मनः॑शि॒वस॑ङ्कल्पमस्तु॥२॥ यत्प्र॒ज्ञान॑मु॒तचेतो॒धृति॑श्च॒यज्ज्योति॑र॒न्तर॒मृतं॑प्र॒जासु॑। यस्मा॒न्नऽऋ॒तेकिञ्च॒नकर्म्म॑क्रि॒यते॒तन्मे॒मनः॑शि॒वस॑ङ्कल्पमस्तु॥३॥ येने॒दम्भू॒तम्भुव॑नम्भवि॒ष्यत्परि॑गृहीतम॒मृते॑न॒सर्व॑म्। येन॑य॒ज्ञस्ता॒यते॑स॒प्तहो॑ता॒तन्मे॒मनः॑शि॒वस॑ङ्कल्पमस्तु॥४॥ यस्मि॒न्नृचः॒साम॒यजू॑ᳬषि॒यस्मि॒न्प्रति॑ष्ठिता॒रथ॒नाभा॑विवा॒राः॑। यस्मिँ॑श्चि॒त्तᳬ॑सर्व॒मोतं॑प्र॒जाना॒न्तन्मे॒मनः॑शि॒वस॑ङ्कल्पमस्तु॥५॥ सु॒षा॒र॒थिरश्वा॑निव॒यन्म॑नु॒ष्या॒न्नेनी॒यते॒ऽभीशु॑भिर्वा॒जिन॑ऽइव। हृ॒त्प्रति॑ष्ठं॒यद॑जि॒रञ्जवि॑ष्ठ॒न्तन्मे॒मनः॑शि॒वस॑ङ्कल्पमस्तु॥६॥ इति हृदयाय नमः॥१॥

शिवसंकल्प सूक्त—जो मानवीय मन जागृतावस्था तथा सुप्तावस्था दोनों में ही दूर तक गमन करता है, वह मन शुभ सङ्कल्प करने वाला बने। जिस मन से कर्मानुष्ठान में संलग्न मनीषीजन श्रेष्ठ कर्मों का सम्पादन करते हैं तथा विविध प्रकार के यज्ञों (द्रव्ययज्ञ, तपोयज्ञ, ज्ञानयज्ञ) आदि करते हैं तथा जो प्रत्येक प्राणी की देह में विद्यमान रहता है, वह मन शुभ सङ्कल्पों को करे। जो मन उत्कृष्ट ज्ञान की ज्योति के रूप में मार्गदर्शन करता है, वह मेरा मन शुभ सङ्कल्पों वाला हो। जिस अमरत्वयुक्त मन ने भूत, वर्तमान तथा भविष्यत् काल को परिगृहीत किया है तथा जिससे सस होता गुणों से यज्ञ का विस्तार होता है, वह अच्छे सङ्कल्पों को करने वाला हो। जिस मन में वैदिक ऋचाएँ प्रतिष्ठित हैं तथा जिसमें ऋचाएँ, साममन्त्र तथा यजुः इस प्रकार से स्थापित हैं जैसे रथ के पहिये की नाभि में अरे प्रतिष्ठित रहते हैं। जिस मन में मनुष्यों के सम्पूर्ण चित्तों का ज्ञान स्थित है, वह मन शुभ सङ्कल्पों से

युक्त हो। जिस प्रकार से अच्छा सारथी लगाम के नियन्त्रण द्वारा गतिमान् अश्वों को अपने गन्तव्य पथ पर इच्छित स्थान तक इधर-उधर होते हुए ले जाता है, उसी प्रकार यह मानव मन अपने लक्ष्य तक पहुँचता है तथा जरारहित अतिवेगशील मन इस हृदय (शिरोहृदय=मन) में विराजमान है, वह मन सदैव शिव सङ्कल्पवान् हो।

पुरुषसूक्तम्

ॐ सहस्त्रशीर्षेति षोडशर्चस्य पुरुषसूक्तस्य नारायणऋषिः आद्यानां पञ्चदशानामनुष्टुप् छन्दः यज्ञेनयज्ञमित्यस्य त्रिष्टुप् छन्दः जगद्बीजं पुरुषो देवता शिरोन्यासे विनियोगः। ॐ सहस्त्रशीर्षा पुरुषः सहस्त्राक्षः सहस्त्रपात्। सभूमिर्ठ०सुर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम्॥१॥ पुरुषएवेर्ठ० सर्व्वं यद्भूतं यच्च भाव्व्यम्। उतामृतत्वस्येशानो यदन्नेै नातिरोहति॥२॥ एतावानस्यमहिमातो ज्ज्यायाँश्च पूरुषः। पादोस्य व्विश्वा भूतानि त्रिपादस्यामृतन्दिवि॥३॥ त्रिपादूर्द्ध्वऽ उदैत्पुरुषः पादोस्येहाभवत्पुनः। ततो व्विष्व्वङ्व्यक्क्रामत्साशनानशने अभि॥४॥ ततो व्विराडजायत-व्विराजोऽअधिपूरुषः। सजातोऽअत्यरिच्यतपश्चाद्भूमिमथोपुरः॥५॥ तस्माद्यज्ञात्सर्व्वहुतःसम्भृतम्पृषदाज्ज्यम्। पशूँस्ताँश्चक्रे व्वायव्व्यानारण्यागग्राम्म्याश्चये॥६॥ तस्म्माद्यज्ञात्सर्व्वहुतऽऋचःसामानिजज्ञिरे। छन्दाᳬसि जज्ञिरे तस्म्माद्यजुस्तस्म्मादजायत॥७॥ तस्मादश्वाऽअजायन्तयेकेचोभयादतः। गावोहजज्ञिरेतम्स्मात्तस्म्माज्जाताऽअजा-वयः॥८॥ तंय्यज्ञम्बर्हिषिप्प्रौक्षन्पुरुषञ्जातमग्ग्रतः। तेनदेवाऽअयजन्तसाद्ध्याऽऋषयश्चये॥९॥ यत्पुरुषंव्व्यदधुः कतिधाव्व्यकल्प्पयन्। मुखङ्किमस्स्यासीत्किम्बाहूकिमूरूपादाऽउच्च्येते॥१०॥ ब्राह्मणोस्यमुखमासीद्बाहूराजन्न्यःकृतः। ऊरूतदस्ययद्वैश्यःपद्भ्याᳬशूद्रोऽअजायत॥११॥ चन्द्रमामनसोजातश्चक्षोःसूर्य्योऽअजायत। श्श्रोत्राद्वायुश्चप्प्राणश्च-मुखादग्निरजायत॥१२॥ नाभ्याऽआसीदन्तरिक्षर्ठ०शीर्ष्णोद्यौःसमवर्त्तत। पद्भ्याम्भूमिर्दिशःश्श्रोत्रात्तथा लोकाँ२ऽ-अकल्पयन्॥१३॥ यत्पुरुषेणहविषादेवायज्ञमतन्वत। व्वसन्तोस्यासीदाज्ज्यङ्ग्रीष्मऽइध्ध्मः शरद्धविः॥१४॥ सप्तास्या-सन्नपरिधयस्त्रिः सप्तसमिधःकृताः। देवायद्यज्ञन्तन्न्वानाऽअबध्नन्पुरुषम्पशुम्॥१५॥ यज्ञेनयज्ञमयजन्त देवास्ता-निधर्म्माणिप्प्रथमान्यासन्। तेहनाकम्महिमानःसचन्तयत्रपूर्व्वेसाद्ध्याःसन्ति देवाः॥१६॥ इति शिरसे स्वाहा॥२॥

पुरुषसूक्त—इस सहस्त्रशीर्षा० इत्यादि पुरुषसूक्त के नारायण ऋषि हैं। प्रारम्भ की पन्द्रह ऋचाएँ अनुष्टुप् छन्दों में हैं तथा अन्तिम ऋचा 'यज्ञेन यज्ञमयजन्त देवा' का त्रिष्टुप् छन्द है। जगद् बीज है तथा पुरुष देवता है। इसका विनियोग शिरोन्यास में किया जाता है।

जिनके सहस्त्रों शिर, सहस्त्रों नेत्र, सहस्त्रों पैर हैं, वे विराट् पुरुष इस दस अङ्गुलरूप पृथ्वी को व्याप्त कर उसके बाहर भी स्थित हैं। जो भूतकाल में था, वर्तमान में है तथा भविष्य में भी रहेगा—ऐसा शाश्वत यह पुरुष है। इस अजस्त्र प्रवहमान जगत् का वही पुरुष स्वामी है। जो जीव अन्न के द्वारा पोषित तथा जीवित रहते हैं, उनका भी यह स्वामी है। इस विराट् पुरुष की महिमा बहुत बड़ी है। इसके एक चरण में ही इस विश्व के सभी प्राणी स्थित हैं तथा शेष तीन चरणों से यह अन्तरिक्ष को आवृत्त किये है। चार चरणों वाले इस विराट् पुरुष के तीन भाग द्युलोक में हैं। इसका एक चरण इस विश्व में पुनः पुनः उत्पन्न होता रहता है। फिर इसने अन्न खाने वाले तथा न खाने वाले विश्व को सब ओर से व्याप्त कर लिया है। उसी विराट् पुरुष से यह ब्रह्माण्ड उत्पन्न हुआ तथा उसी से सभी जीव उत्पन्न हुए हैं। वही देहधारी रूप में सर्वश्रेष्ठ हुआ, जिसने प्रथम भूमि को, फिर सृष्टि को रचा। उस सर्वश्रेष्ठ यज्ञपुरुष से दधियुक्त घृत की प्राप्ति हुई। पशु, वायव्य प्राणी (नभचर) तथा वन्य जीव उत्पन्न हुए। उस विराट् यज्ञपुरुष से ऋचाएँ तथा साम गान प्रकट हुए तथा उसी से छन्द (अथर्ववेद) तथा 'यजुः' प्राप्त हुए। उसी से दोनों ओर दाँत वाले अश्व उत्पन्न हुए तथा गाएँ, भेड़ें, बकरियाँ आदि पशु भी उत्पन्न हुए। मन्त्रद्रष्टा ऋषियों ने उस

पूजनीय यज्ञपुरुष को अभिषिक्त करके यज्ञ को प्राप्त किया और वे यजन कर्म करने लगे। यहाँ पर वर्णित उस पुरुष की कितने प्रकार से कल्पना की गई है? इसका मुख क्या है? इसके बाहु कौन हैं? इसकी ऊरू कौन-सी है? तथा पैर कौन-से हैं? यह किस प्रकार बताए गए हैं? इस विराट् पुरुष का मुख ब्राह्मण, क्षत्रिय बाहु, वैश्य जङ्घा तथा शूद्र चरण हैं। विराट् पुरुष के मन से चन्द्रमा उत्पन्न हुआ है। उसके नेत्रों से सूर्य उत्पन्न हुआ है। उसके कानों से वायु तथा प्राण एवं मुख से अग्नि उत्पन्न हुए। उसकी नाभि से अन्तरिक्ष तथा शिर से द्युलोक उत्पन्न हुआ है। पैरों से भूमि तथा कानों से दिशाओं का प्राकट्य हुआ है तथा लोक भी उसी से उत्पन्न है। जब देवताओं ने उस विराट् पुरुष को हवि मानकर यज्ञारम्भ किया तब उस यज्ञ के घृत से वसन्त ऋतु, समिधा से ग्रीष्म एवं शरद् से हवि हुआ। देवों ने जिस यज्ञ का विस्तार किया, उसमें पुरुषरूपी पशु को बाँधा (नियुक्त किया), उसी से यज्ञ की सात परिधियाँ (सात समुद्र) तथा इक्कीस (छन्द) समिधाएँ हुईं। उस यज्ञपुरुष से देवों ने यज्ञ करना प्रारम्भ किया और श्रेष्ठ धर्मकृत्य का प्रतिपादन किया। यज्ञीय कार्य करने वाले श्रेष्ठ मनुष्य पूर्वकाल के साध्य देवताओं के निवास (स्वर्गलोक) को प्राप्त करते हैं।

उत्तरनारायणसूक्तम्

अद्भ्यः सम्भृतं इति षड्ऋचस्योत्तरनारायणस्य नारायण ऋषिः आद्यानां तिसृणां त्रिष्टुप् छन्दश्चतुर्थपञ्चमयोरनुष्टुप् छन्दः आदित्यो देवता शिखान्यासे विनियोगः। अद्भ्यऽसम्भृतः पृथिव्यैरसाच्चव्विश्वकर्म्मणः समवर्त्तताग्ग्रे। तस्स्यत्वष्टाव्विदधद्रूपमेतितन्मर्त्यस्यदेवत्वमाजानमग्ग्रे॥१७॥ व्वेदाहमे तम्पुरुषम्महान्तमादित्यवर्णन्तमसः परस्तात्। तमेवव्विदित्वातिमृत्युमेतिनान्न्यऽपन्थाव्विद्यतेयनाय॥१८॥ प्प्रजापतिश्चरतिगर्ब्भेऽअन्तरजायमानोबहुधाव्विजायते। तस्ययोनिम्परिपश्यन्तिधीरास्तस्स्मिन्हतस्त्थुर्भुवनानिव्विश्श्वा॥१९॥ योदेवेभ्भ्यऽआतपतियोदेवानाम्पुरोहितः। पूर्व्वोयोदेवेभ्भ्योजातोनमोरुचायब्ब्राह्मये॥२०॥ रुचम्ब्ब्राह्मञ्जनयन्तोदेवाऽअग्ग्रे तदब्ब्रुवन्। यस्त्वैवम्ब्ब्राह्मणोव्विद्यात्तस्यदेवाऽअसन्वशे॥२१॥ ॐ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम्। इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण॥२२॥ इति शिखायै वषट्॥३॥

उत्तरनारायण सूक्त—मूल में लिखित विनियोग पढ़कर उसका जल पृथ्वी पर छोड़कर तब मूल सूक्त का पाठ करना प्रारम्भ करना चाहिये।

प्रारम्भ में जो सभी कर्मों (विश्वकर्म) को करने वाला ईश्वर है, उसके कर्म से पृथिवी के ऊपर स्थित जलरूप रस से यह सब विश्व पोषण को प्राप्त हुआ है। त्वष्टा (विश्वनिर्माता) विश्व को रूपाकार देते हुए आगे बढ़ता है। मर्त्यलोक के मनुष्य को देवत्व भी वही प्रदान करता है—यह मैं जानता हूँ। मैंने उस सूर्य के समान वर्ण वाले प्रकाशमान् महान् पुरुष को जान लिया है। उसको जानकर उसकी उपासना करने वाला साधक मृत्यु को जीत लेता है (जन्म-मरण से रहित हो जाता है)। वह पुरुष अन्धकार से परे है। मुक्ति-प्राप्ति के लिये अन्य कोई मार्ग नहीं है (उस पुरुष को जान लेना ही एकमात्र उपाय है)। जो प्रजा का स्वामी (ईश्वर) सभी प्राणियों के गर्भ (सब पदार्थों के भीतर) विचरण करता है, वह अजन्मा होकर भी अनेक प्रकार से उत्पन्न होता है। उसके मूल स्वरूप को ज्ञानी लोग जानते हैं, उसी में सभी लोक स्थित हैं। जो सभी देवों को प्रकाशित करने वाला (तपाने वाला) तथा सबका अग्रगामी है, जो सभी देवों से पूर्व उत्पन्न हुआ है, उस ब्रह्मतेज को प्रणाम है। ब्रह्मज्ञान को प्रकाशित करने वाले देवों ने प्रारम्भ में ही यह कहा था कि 'जो ज्ञानी इस बात को जानता है, उसके वश में सभी देवता (इन्द्रियाँ) हो जाती हैं।' हे परमात्मन्! सम्पत्ति (श्री) तथा शोभा (लक्ष्मी) तेरी पत्नियाँ हैं तथा दोनों भुजाएँ या पार्श्व अहोरात्र हैं।

नक्षत्र तेरा रूप है, द्युलोक तथा पृथिवी तेरा खुला मुख है। मैंने सोचा कि मैं किसकी इच्छा करूँ? मुझे सभी लोक प्राप्त हों (यह इच्छा करता हूँ)।

अप्रतिरथसूक्तम्

आशुःशिशान इति सप्तदशानामप्रतिरथऋषिस्त्रिष्टुप् छन्दः इन्द्रो देवता कवचन्यासे विनियोगः। ॐ आशुꣳ-शिशानोवृषभोनभीमोघनाघनꣳक्षोभणश्चर्षणीनाम्। सङ्क्रन्दनोनिमिषऽएकव्वीरः शतꣳसेनाऽअजयत्साकमिन्द्रः॥१॥ सङ्क्रन्दनेनानिमिषेण जिष्णुनायुत्कारेणदुश्च्यवनेनधृष्णुना। तदिन्द्रेणजयततत्सहद्ध्वंय्युधोनरऽइषुहस्तेनव्वृष्णा॥२॥ सऽइषुहस्तैःसनिषङ्गिभिर्व्वशीसꣳस्रष्टासयुधऽइन्द्रोगणेन सꣳसृष्टजित्सोमपाबाहुशर्द्ध्युग्रधन्वाप्प्रतिहिताभिरस्ता॥३॥ ब्बृहस्पतेपरिदीयारथेनरक्षोहामित्राँꣳऽअपबाधमानः। प्प्रभञ्जन्त्सेनाःप्प्रमृणोयुधाजयन्नस्माकमेद्ध्यविताराथानाम्॥४॥ बलविज्ञायस्थविरःप्रवीरःसहस्वान्वाजीसहमानऽउग्रः। अभिवीरोऽअभिसत्त्वासहोजाजैत्रमिन्द्ररथमातिष्ठगोवित्॥५॥ गोत्रभिदङ्गोविदंव्वज्रबाहुञ्जयन्तमज्ज्मप्प्रमृणन्तमोजसा। इमꣳसजाताऽअनुवीरयद्ध्वमिन्द्रꣳसखायोऽअनुसꣳरभद्ध्वम्॥६॥ अभिगोत्राणिसहसागाहमानोदयोव्वीरःशतमन्युरिन्द्रः। दुश्च्यवनःपृतनाषाडयुद्ध्योस्म्माकꣳसेनाऽअवतुप्प्रयुत्सु॥७॥ इन्द्रआसान्नेताबृहस्पतिर्द्दक्षिणायज्ञःपुरऽएतुसोमः। देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतोयन्त्वग्रम्॥८॥ इन्द्रस्य-व्वृष्णोव्वरुणस्यराज्ञऽआदित्यानाम्मरुताꣳशर्द्धऽउग्रम्। महामनसाम्भुवनच्च्यवानाङ्घोषो देवानाञ्जयतामुदस्थात्॥९॥ उद्धर्षयमघवन्नायुधान्युत्सत्त्वनाम्मामकानाम्मनाꣳसि। उद्वृत्रहन्वाजिनांव्वाजिनान्युद्रथानाञ्जयतांय्यन्तुघोषाः॥१०॥ अस्म्माकमिन्द्रःसमृतेषुद्ध्वजेष्व्वस्म्माकंयाऽइषवस्ताजयन्तु। अस्म्माकंव्वीराऽउत्तरेभवन्त्वस्म्माँꣳऽउदेवाऽअवताहवेषु॥११॥ अमीषाञ्चित्तम्प्रतिलोभयन्तीगृहाणाङ्गान्यप्प्वेपरेहि। अभिप्प्रेहिनिर्द्दहहृत्सुशोकैरन्धेनामित्रास्तमसासचन्ताम्॥१२॥ अवसृष्टापरापतशरव्व्येब्ब्रह्मसꣳशिते। गच्छामित्रान्प्रपद्यस्वमामीषाङ्कञ्चनोच्छिषः॥१३॥ प्रेताजयतानरऽइन्द्रोवःशर्म्म-यच्छतु। उग्राव्वःसन्तुबाहवोनाधृष्ष्यायथासथ॥१४॥ असौयासेनामरुतःपरेषामभ्यैतिनओजसास्पर्द्धमाना। ताङ्गूहत-तमसापव्व्रतेनयथामीऽअन्न्योऽअन्न्यन्नजानन्॥१५॥ यत्रबाणाःसम्पतन्तिकुमाराव्विशिखाऽइव। तन्नऽइन्द्रोब्बृहस्प्पति-रदितिःशर्म्मयच्छतुव्विश्श्वाहाशर्म्मयच्छतु॥१६॥ मर्म्माणितेव्वर्म्मणाच्छादयामि सोमस्त्वाराजामृतेनानुवस्ताम्। उरो-र्व्वरीयोव्वरुणस्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु॥१७॥ इति कवचाय हुम्॥४॥

अप्रतिरथसूक्त—सर्वप्रथम 'आशुःशिशान इति सप्तदशानमप्रतिरथ ऋषिः त्रिष्टुप्छन्दः इन्द्रो देवता कवचन्यासे विनियोगः' कहकर कवचन्यास के लिये विनियोग का जल छोड़ना चाहिये।

जो इन्द्र शीघ्रकारी तीक्ष्ण शस्त्रों वाला, वृषभ के समान क्रुद्ध होकर घनाघन (दनादन) शत्रुओं का क्षोभण करने वाला, सेनाओं को कम्पित करने वाला, अनिमिष वह अद्वितीय वीर सैकड़ों शत्रुओं को पराजित करता है। हे वीरों! आप लोग अपलक अपने सङ्क्रन्दन के द्वारा शत्रुओं को त्रस्त करने वाले, विविध आक्रामक मुद्राओं से युद्ध में लगने वाले, बाणधारी, अजेय इन्द्र के साथ संलग्न होकर शत्रुओं को पराजित करो। (क्योंकि) वे इन्द्र शत्रुओं को वश में करने वाले बाण तथा खड्गधारी वीरों को सैन्यदल में सम्यक् व्यवस्थित करते हुए सङ्ग्राम में शत्रुओं से युद्ध करके विजयी होने वाले हैं, हम सबकी रक्षा करें। हे बृहस्पते! आप राक्षसों का विनाश करने वाले, रथ द्वारा सर्वत्र भ्रमणकर्ता, शत्रुसेना को भङ्ग करने वाले हैं। वे हमारे प्रमृण (आतङ्कवादी) शत्रुओं को नष्ट करें। हे इन्द्र! आप शस्त्रादि बल के निपुण प्रयोजक, अनुभवी, अतिक्रूर, विजयप्रद बल से युक्त, वेगवान् उग्र, सब ओर से योद्धाओं से घिरे हुए, बली लोगों की सङ्गति से युक्त, अपने बल के लिये प्रसिद्ध विजेता हो; अतः आप युद्ध के लिये अपने रथ पर चढ़ो। हे एक समान जन्मधारी देवों! आप शत्रुविनाशक, वज्रबाहु, विजेता, अपने ओज से

शत्रुओं को नष्ट करने वाले इन्द्र को युद्ध के लिये उत्साहित कीजिये। जो अपने बल से शत्रुप्रदेशों को (उनके अभिगोत्रों = किलों) को तोड़ने वाले इन्द्रदेव हैं, वे युद्ध में हमारी सेना को संरक्षित करें। शत्रुओं के अहङ्कार को ध्वस्त करके विजयी होने वाली देवसेनाओं का नेतृत्व इन्द्र तथा बृहस्पति मिलकर करते हैं तथा इस प्रकार की सेना के पीछे मरुद्गण भी (विजयप्राप्ति के लिये) चलें। फिर सोम शान्ति स्थापित करें। युद्ध के प्राङ्गण में अविचलित मन से शत्रुसेना को दलन करने में समर्थ देवों, आदित्यों, मरुद्गणों, वरुण तथा इच्छानुसार वृष्टि करने वाले इन्द्र की सेना का जयघोष गूँज रहा है। हे ऐश्वर्ययुक्त इन्द्र! आप अपने हथियारों को भली-भाँति तीक्ष्ण करके देवसेना के वीरों का उत्साह बढ़ायें तथा अश्वों की भाँति उन्हें युद्धार्थ शीघ्रगमन के लिये प्रेरित करें। हे शत्रुमर्दक इन्द्र! विजयी रथों के जयनिनाद सब दिशाओं में गूँजें। युद्ध में जब रथों पर ध्वजाएँ फहराने लगें तब इन्द्र तथा हमारे शस्त्र भरपूर क्षमता के साथ उत्तेजित होकर शत्रुसेना पर निर्णायक प्रहार कर विजयी हों तथा हमारी विजयी वीर सेना देवों द्वारा सुरक्षित रहे। हे अध्वे (सिंहवाहिनी सेना)! तू अपनी भयङ्करता से शत्रु की सेना के अङ्गों को छिन्न-भिन्नकर दूर फेंक दे, जिससे वे मोह-शोक के अन्धकार में डूब जायँ। हे मन्त्र से तीक्ष्ण किये शस्त्रों! आप हमारे द्वारा छोड़ने पर शत्रुसेना पर एक साथ प्रहार करके उसे सन्तप्त करें। अनेक शरीरों में प्रविष्ट होकर सभी का विनाश करें, किसी शत्रु को जीवित न छोड़ें। हे वीरों! आप लोग शत्रुसेना पर तीव्रता से आक्रमण कर विजयी हों। आपके नेता इन्द्र आपको विजयसुख प्रदान करें; आपके शस्त्रादि का बल बढ़ें। हे मरुद्गणों! यह सामने से शत्रुवाहिनी अपने मद में चूर होकर हमारी ओर बढ़ रही है; उस सेना को अन्धकार से ढँक दें कि वे आपस में ही एक-दूसरे को न पहिचानते हुए भ्रमित होकर लड़कर मर जायँ। जिस युद्ध में हमारे योद्धाओं के प्रहार इधर-उधर होते हैं, उसमें बृहस्पति, अदिति तथा इन्द्र हमारा कल्याण करें। वीर लोग अपने शरीर के मर्माङ्गों को आहत होने से बचाने के लिये कवच से आच्छादित करते हैं; अतः इन कवचों को वरुण सुदृढ़ता दें तथा राजा सोम अमृत से वीरों को पुष्ट करें, जिससे देव विजयी हों।

विभ्राट्(सूर्य)सूक्तम्

**विभ्राडिति सप्तदशानां विभ्राट् ऋषिर्जगती छन्दः सूर्यो देवता नेत्रन्यासे विनियोगः॥ ॐ विभ्राड्बृहत्पिबतु-
सोम्म्यम्मद्ध्वयुर्द्दधद्यज्ञपतावविह्रुतम्। वातजूतोयोऽअभिरक्षतित्मनाप्प्रजाःपुपोष पुरुधाविराजति॥१॥ उदुत्यञ्जात-
वेदसन्देवंवहन्तिकेतवः। दृशेविश्श्वायसूर्य्यम्॥२॥ येनापावकचक्षसाभुरण्यन्तञ्जनाँ२ अनु। त्वंवरुणपश्यसि॥३॥
देव्व्यावद्ध्वर्य्यूऽआगतꣳरथेनसूर्य्यत्वचा। मद्ध्वायज्ञꣳसमञ्जाथे। तम्प्रत्क्नथायंवेनश्चित्रन्देवानाम्॥४॥ तम्प्रत्क्न-
थापूर्वथाविश्वथेमथाज्ज्येष्ठतातिम्बर्हिषदꣳस्वर्विदम्। प्रतीचीनंवृजनन्दोहसेधुनिमाशुञ्जयन्तमनुयासुवर्द्धसे॥५॥ अयं-
वेनश्चोदयत्पृश्निगर्ब्भाज्योतिर्ज्जरायूरजसोविमाने। इममपाꣳसंगमेसूर्य्यस्यशिशुन्नविप्रामतिभीरिहन्ति॥६॥ चित्रन्दे-
वानामुदगादनीकञ्चक्षुर्म्मित्रस्यवरुणास्याग्नेः॥ आप्प्राद्यावापृथिवीऽअन्तरिक्षꣳसूर्य्यऽआत्माजगतस्तस्थुषश्च॥७॥
आनऽइडाभिर्व्विदथेसुशस्तिविश्वानरःसवितादेवऽएतु। अपियथायुवानोमत्सथानोविश्वञ्जगदभिपित्वेमनीषा॥८॥ यद-
द्यकच्चवृत्रहन्नुदगाऽअभिसूर्य्य। सर्व्वन्तदिन्द्रतेवशे॥९॥ तरणिर्व्विश्श्वदर्शतोज्ज्योतिष्कृदसिसूर्य्य। विश्श्वमाभासि-
रोचनम्॥१०॥ तत्सूर्य्यस्यदेवत्वन्तन्महित्वम्मद्ध्याकर्तोर्व्विततꣳसञ्जभार। यदेदयुक्तहरितःसधस्थादाद्रात्रीवासस्त-
नुतेसिमस्मै॥११॥ तन्मित्रस्यव्वरुणस्याभिचक्षेसूर्य्योरूपङ्कृणुतेद्योरुपस्थे। अनन्तमन्यद्द्रुशदस्यपाजःकृष्णमन्य-
द्धरितःसम्भरन्ति॥१२॥ बण्महाँ२ऽअसिसूर्य्यबडादित्यमहाँ२ऽअसि। महस्तेसतोमहिमापनस्यतेद्धादेवमहाँ२ऽअसि॥१३॥
बट्सूर्य्यश्श्रवसामहाँ२ऽअसिसत्रादेवमहाँ२ऽअसि। मह्नादेवानामसुर्य्यःपुरोहितोविभुज्योतिरदाभ्यम्॥१४॥ श्रायन्तऽ-
इवसूर्य्यंविश्वेदिन्द्रस्यभक्षत। वसूनिजातेजनमानऽओजसाप्प्रतिभागन्नदीधिम॥१५॥ अद्यादेवाऽउदितासूर्य्यस्य निरꣳ-**

इवसूर्य्यंविश्वेदिन्द्रस्यभक्षत। वसूनिजातेजनमानऽओजसाप्रतिभागन्नदीधिम॥१५॥ अद्यादेवाऽउदितासूर्य्यस्य निरꣳहसःपिपृतानिरवद्यात्। तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीऽउतद्यौः॥१६॥ आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्यञ्च। हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन्॥१७॥ इति नेत्रत्रयाय वौषट्॥५॥

विभ्राट् सूक्त—सर्वप्रथम विनियोग-हेतु 'विभ्राडिति सप्तदशानां विभ्राड्ऋषिः जगतीछन्दः सूर्यो देवता नेत्रन्यासे विनियोगः' कहकर जल छोड़े।

जो वायुवेग से युक्त, विशेष दीप्तिमान्, पूर्ण ऐश्वर्यशाली, पूर्णायु वाला, यज्ञपति को धारण कर पुष्ट करने वाला तथा अपनी शक्ति से प्रजाओं की सर्वतोभावेन रक्षा करने वाला है, उसी की भाँति तुम भी सोमादि मधुर औषधियों के रस का पान करो। विश्व को दृश्यमान बनाने के लिये उस वेदज्ञ, सबके प्रकाशक, दिव्य गुण-सम्पन्न ईश्वर के अस्तित्व की सिद्धि के लिये किरणें ऊपर की ओर उठती हैं। हे वरुण! आप सबके पापों (दु:खों) के निवारक हैं; हे पवित्र करने वाले पावक! जिस प्रकाश से सबमें पालक (ईश्वर) के तुम दर्शन करते हो, उसी प्रकार से तुम सभी मनुष्यों को देखो। हे दिव्य अध्वर्यू अश्विनी कुमारों! आप सूर्य के समान चमकीले रथ में बैठकर यहाँ आओ और मधुर हवि से सम्यक् रूप से यज्ञ को सम्पन्न करो, जिससे उस प्राचीन यज्ञ की भाँति यह हमारा यज्ञ भी कान्तिमान् तथा दिव्य तेज से समन्वित हो। उस इन्द्र की प्राचीन लोग तथा हमारे पूर्वज एवं आज के लोग स्तुति करते रहे हैं, उसी प्रकार उन स्तुतियों से हे इन्द्र! तू भी बढ़कर प्रसन्न होता है, इसीलिये तुम श्रेष्ठ की स्तुति मैं भी अपने शत्रुओं को जीतने के लिये करता हूँ। परम तेजस्वी देव अन्तरिक्ष से जल को प्रेरित कर वर्षा के रूप में पृथ्वी पर लाते हैं। जलरूप में प्राप्त उस वस्तु को पुत्रजन्म की भाँति सुखद मानकर मनीषी लोग विविध स्तुतियों से सूर्यदेव की वन्दना करते हैं। हे सोमदेव! मर्क नामक असुर के विनाश के लिये आपको नियमानुसार ग्रहण किया गया है। मित्र, वरुण, अग्नि आदि जो कि देवताओं के नेत्ररूप हैं एवं सूर्यदेव अपनी दिव्य किरणों से इस पृथ्वी, द्युलोक तथा अन्तरिक्ष को जगमगाते हैं। उन्हीं देव के लिये यह आहुति समर्पित है। हम सब प्राणियों के हितैषी सविता देव! आप हमारे उत्तम अन्नों से युक्त यज्ञशाला में पधारें। हे सदैव चैतन्यशील देव! आप यहाँ तृप्त होकर सम्पूर्ण जगत् को बुद्धि प्रदान कर तृप्त करें। सूर्य जिस प्रकार अन्धकार को नष्ट करता है, उसी प्रकार से शत्रुओं को नष्ट करने वाले हे इन्द्र! आप जहाँ-कहीं भी उदित होते हैं, वे सब स्थल आपके अधिकार में आ जाते हैं। सूर्यदेव की यह दिव्यता तथा महिमा अत्यन्त व्यापक है, जो संसार के मध्य स्थित होकर विस्तीर्ण नक्षत्रमण्डल का निर्माण तथा समाप्ति करने वाली है। जब वे सूर्यदेव अपनी लाल एवं हरी किरणों को आकाश से समेट कर अपने भीतर धारण करते हैं तब रात्रि इस ब्रह्माण्ड के ऊपर गहन अन्धकार डाल देती है। हे सूर्यदेव! आप संसार को तारने वाले, संसार के दर्शन-योग्य तथा तेजोत्पादक हैं; आप अपनी आभा से संसार को रोचित करते हैं। द्युलोक के गोद में स्थित सूर्यदेव मित्र तथा वरुण का वह रूप प्रकट करते हैं, जिससे वे सब लोगों को सब ओर से देखते हैं। वे शुद्ध, चैतन्य तथा निर्गुण हैं; किन्तु अन्य प्रकार से वे सगुण रूप में प्रकट होते हैं, जिसे सब दिशाएँ धारण करती हैं। हे सूर्यदेव! आप महानतम हैं। हे आदित्य! आपकी महानता से वे सब आपकी स्तुति करते हैं। आप निश्चित महान् हैं। आप धन-सम्पत्ति को प्रकट करने वाले होकर महान् हैं। आप प्राणी-हितैषी, देवों में अग्रगण्य, सर्वव्यापी, अविनाशी, तेजस्वी तथा यज्ञकर्ता हैं। सूर्यप्रकाश से विस्तृत किरणें समस्त भौतिक वस्तुओं को भोगती हैं, उसी भाँति हम सभी भावी पीढ़ियों के लिये सूर्य के तेज को धारण करे। हे देवों! आज के इस सूर्योदय की दिव्य किरणें हमें पापों से बचायें, अपयश से बचायें तथा वरुण, समुद्र, पृथ्वी तथा द्युलोक हमारे मनोरथों को पूरा करे। सविता देव उष:काल की किरणों के रथ पर सवार होकर अन्तरिक्ष में भ्रमण करते हुए देवों एवं मानवों को कर्म में प्रवृत्त करते हैं। वे समस्त लोकों का निरीक्षण करते हैं॥ १-१७॥

अस्य शतरुद्रियस्याघोर ऋषिः। रुद्रो देवता नमस्तऽइति गायत्रीछन्दो यात इति तिसृणामनुष्टुप् छन्दोऽअध्यवोचदिति तिसृणां पङ्क्तिश्छन्दो नमोस्त्वित्यादि सप्तानामनुष्टुप्छन्दो मान इति द्वयोः कुत्स ऋषिर्जगतीच्छन्द एकरुद्रो देवता नमोहिरण्यबाहव इत्यादीनि यजूꣳषि एकरुद्रो देवता द्रापेऽअन्धसऽइत्युपरिष्टाद्बृहती छन्द इमारुद्रायेति जगतीछन्दो यात इत्यनुष्टुप् छन्दः परिणोमीढुष्टम इति त्रिष्टुप् छन्दो विकिरिद्रविलोहितसहस्राणिसहस्रश इत्यनुष्टुप् छन्दोऽङ्क असङ्ख्यातेस्यादिदशानामनुष्टुप्छन्दो बहुरुद्रो देवता नमोऽस्त्वित्यादि त्रीणि यजूꣳषि बहुरुद्रदैवत्यानि व्वयꣳसोमेति गायत्रीछन्द एषते इति यजुरवरुद्रमिति पङ्क्तिश्छन्दो भेषजमिति ककुप् छन्दस्त्र्यम्बकमिति द्वे अनुष्टुभावे- तत्तइत्यास्तारपङ्क्तिश्छन्दस्त्र्यायुषमित्युष्णिक् छन्दः। शिवोनामेतियजुर्न्नतँव्विदेति द्वे त्रिष्टुभौ अस्त्रन्यासे विनियोगः। ॐ नमस्तेरुद्रमन्न्यवऽउतोतऽइषवेनमः बाहुब्भ्यामुततेनमः॥१॥ यातेरुद्रशिवातनूरघोरापापकाशिनी। तयानस्तन्न्वा- शन्तमयागिरिशन्ताभिचाकशीहि॥२॥ यामिषुङ्गिरिशन्तहस्तेबिभर्ष्यस्तवे। शिवाङ्गिरित्रताङ्कुरुमाहिꣳसीः पुरुषञ्ज- गत्॥३॥ शिवेनव्वचसात्वागिरिशाच्छाव्वदामसि। यथानः सर्व्वमिज्जगदयक्ष्मꣳसुमनाऽअसत्॥४॥ अद्ध्यवोच- दधिवक्ताप्रथमोदैव्व्योभिषक्। अहीꣳश्चसर्व्वाञ्जम्भयन्त्सर्व्वाश्चयातुधान्न्योधराचीः परासुव॥५॥ असौयस्ताम्रोऽ- अरुणऽउतबब्भ्रुः सुमङ्गलः। येचैनꣳरुद्राऽअभितोदिक्षुश्रिताः सहस्रशो वैषाꣳहेडऽईमहे॥६॥ असौयोवसर्प्पतिनील- ग्रीवोव्विलोहितः। उतैनङ्गोपाऽअदृश्रन्नदृश्रन्नुदहार्य्यः सदृष्टोमृडयातिनः॥७॥ नमोस्तुनीलग्रीवायसहस्राक्षायमीढुषे। अथोयेऽअस्यसत्वानोहन्तेब्भ्योकरन्नमः॥८॥ प्रमुञ्चधन्न्वनस्त्वमुभयोरार्त्त्न्योर्ज्ज्याम्। याश्चतेहस्तऽइषवः पराताभग- वोव्वप॥९॥ विज्ज्यन्धनुः कपर्दिनोव्विशल्ल्योबाणवाँ२ऽउत। अनेशन्नस्ययाऽइषवऽआभुरस्यनिषङ्गधिः॥१०॥ याते- हेतिर्मीढुष्टमहस्तेबभूवतेधनुः। तयास्मान्विश्श्वतस्त्वमयक्ष्मयापरिभुज॥११॥ परितेधन्न्वनोहेतिरस्म्मान्वृणक्तुव्विश्श्वतः। अथोयऽइषुधिस्तवारेऽअस्म्मन्निधेहितम्॥१२॥ अवतत्त्यधनुष्ट्वꣳसहस्राक्षशतेषुधे। निशीर्य्यशल्ल्यानाम्मुखाशिवोनः सुमनाभव॥१३॥ नमस्तऽआयुधायानाततायधृष्ण्णवे। उभाब्भ्यामुततेनमोबाहुब्भ्यान्तवधन्न्वने॥१४॥ मानोमहान्तमुतमा- नोऽअर्ब्भकम्मानऽउक्षन्तमुतमानऽउक्षितम्। मानोव्वधीः पितरम्मोतमातरम्मानः प्रियास्तन्न्वोरुद्ररीरिषः॥१५॥ मानस्तो- केतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः। मानोव्वीरान्रुद्रभामिनोव्वधीर्हविष्मन्तः सदमित्त्वाहवामहे॥१६॥ इत्यादि षट्षष्टि ६६ मन्त्रान् पठित्वा ॐ वयꣳसोम०॥६७॥ एषते रुद्र०॥६८॥ अवरुद्रमदी०॥६९॥ भेषज- मसि०॥७०॥ त्र्यम्बकं यजामहे०॥७१॥ एतत्तेरुद्रावसन्तेन०॥७२॥ त्र्यायुषंजमदग्ने०॥७३॥ शिवोनामासि०॥७४॥ नमस्तेरुद्रमन्यव इत्यादि पुनःषोडश मन्त्रान्॥९०॥ (पुनः) एषतेरुद्रभाग०॥९१॥ अवरुद्रमदी०॥९२॥ नमस्ते रुद्र०॥९३॥ याते रुद्र०॥९४॥ नतंविदाथयऽइमा०॥९५॥ विश्वकर्माह्यनिष्ट०॥९६॥ मीढुष्टमशिवतम०॥९७॥ विकिरिद्रविलोहित०॥९८॥ सहस्राणिसहस्रशो०॥९९॥ असङ्ख्याता०॥१००॥ इत्यस्त्राय फट्॥६॥ एतच्छतरुद्रियं वदन्ति।

शतरुद्रिय सूक्त—इस शतरुद्रिय के अघोर ऋषि, रुद्रदेवता नमस्ते० इस मन्त्र से गायत्री छन्द है। 'यातेरुद्र०' इत्यादि तीन मन्त्रों में अनुष्टुप् छन्द है। 'अध्यवोचद्०' इत्यादि तीन मन्त्रों में पङ्क्ति छन्द है। नमः इत्यादि सात में अनुष्टुप् छन्द है। फिर 'मानोमहान्त०' इत्यादि दो मन्त्रों के कुत्स ऋषि, जगती छन्द एकरुद्र देवता हैं। फिर 'नमो हिरण्यबाहवे०' इत्यादि के एकरुद्र देवता हैं। 'द्रापेऽअन्धस०' इत्यादि से ऊपर बृहती छन्द है। 'इमारुद्राय०' इसमें जगती च्छन्द, यात० इत्यादि में अनुष्टुप् छन्द है। परिणोमीढुष्टम् में त्रिष्टुप् छन्द है। 'विकिरद्रविलोहित- सहस्राणिसहस्राक्ष०' इसमें अनुष्टुप् छन्द, 'असङ्ख्याता रुद्रा०' इन दश मन्त्रों में अनुष्टुप् छन्द 'बहुरुद्रदेवता, नमोस्तु०' इत्यादि तीन यजुओं में बहुरुद्र देवता हैं। 'वयꣳ सोम०' इत्यादि में गायत्री छन्द है। 'एषते०' इस यजु में तथा अवरुद्र० इत्यादि में पङ्क्ति छन्द है। 'भेषजमसि०' इत्यादि में 'ककुप्' छन्द है। त्र्यम्बकं इत्यादि दो मन्त्रों में

अनुष्टुप् छन्द, अवेतत्त इत्यादि में तारपङ्क्ति छन्द, त्र्यायुषं० में उष्णिक् छन्द, शिवोनामा० इत्यादि यजु में तथा 'नतं विदा०' इस यजु में त्रिष्टुप् छन्द है। इसका अस्त्रन्यास में विनियोग किया जाता है।

तदनन्तर 'नमस्ते रुद्र०' इत्यादि ६६ मन्त्रों को पढ़कर 'ॐ वयं ँ सोम०, एषते रुद्र, अवरुद्रमदी०, भेषजमसि, त्र्यम्बकं यजामहे, एतत्ते रुद्रावसन्तेन०, त्र्यायुषं जमदग्ने, शिवो नामासि,' यहाँ तक ७४ मन्त्र हो जाते हैं। पुनः 'नमस्तेरुद्रमन्यव०' इत्यादि सोलह मन्त्रों को पढ़े तो ७४+१६=९० सङ्ख्या हो जाती है। पुनः एषते रुद्रभागा, अवरुद्रमदी०, नमस्तेरुद्र०, यातेरुद्र०, न तं विदाथय ऽइमा०, विश्वकर्माह्यनिष्ट०, मीढुष्टम शिवतम०, 'विकिरिद्रविलोहितः०', सहस्राणि सहस्रशो, असङ्ख्याता०— इन एक सौ मन्त्रों का पाठ कर 'अस्त्राय फट्' कहना (करना) चाहिये। इसको शतरुद्रिय कहते हैं।

> अग्निदाहात्सुरापानादकृत्याचरणात्तथा । सुवर्णहरणाच्चैव वृषलीगमनात्तथा॥ १॥
> ब्रह्महत्यादिकात् पापाच्छतरुद्रियपाठतः। सुनिस्तीर्यैव गच्छन्ति ब्राह्मणाः शिवसन्निधौ॥ २॥

एवं पञ्चन्यासं कृत्वा साष्टाङ्गं प्रणम्य अष्टभिर्मन्त्रैर्नमस्कारं कुर्य्यात्॥ ॐ हिरण्यगर्भꣳसमवर्तताग्रेभूतस्यजातः-पतिरेकऽआसीत्। सदाधारपृथिवींद्यामुतेमाङ्कस्मैदेवायहविषाविधेम॥१॥ यःप्राणतोनिमिषतोमहित्वैकइद्राजाजगतो-बभूव। यईशेअस्यद्विपदश्चतुष्पदःकस्मैदेवाय हविषाविधेम॥२॥ ॐ ब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विसीमतःसुरुचो-व्वेनऽआवः। सबुध्नयाऽउपमाऽअस्यव्विष्ठाःसतश्च योनिमसतश्चव्विवः॥३॥ महीद्यौःपृथिवीचनऽइमंयज्ञम्मिमिक्षताम्। पिपृतान्नोभरीमभिः॥४॥ उपश्वासयपृथिवीमुतद्यांपुरुत्रातेमरुतांविष्ठितंजगत्। संदुंदुभेसजूरिंद्रेणदेवैर्दूराद्दवीयोअपसेध-शत्रून्॥५॥ अग्नेनय सुपथा रायेअस्मान् विश्वानिदेववयुनानिविद्वान्। युयोध्यस्मज्जुहुराणमेनोभूयिष्ठांतेनम-उक्तिंविधेम॥६॥ यातेअग्नेयज्ञियातनूस्तयेह्यारोहात्मानम्। अच्छावसूनिकृण्वन्नस्मैनर्यापुरूणियज्ञोभूत्वायज्ञमासीद-स्वांयोनिंजातवेदोबभूवआजायमानः सक्षयएहि॥७॥ अथावः स्वाहाग्नयेदाशेमपरीलाभिर्घृतवद्भिश्चहव्यैः तेभिर्नोअग्ने अमृतैर्महोभिः श्रितम्पूर्भिरायसीभिर्निपाहि॥ ८॥ इत्यष्टावृचो जपित्वा अथाऽत्मानं रुद्ररूपं ध्यायेत्। अथ ध्यानम्—

> कैलासाचलसन्निभं त्रिनयनं पञ्चास्यमम्बायुतं नीलग्रीवमहीशभूषणधरं व्याघ्रत्वचा प्रावृतम्।
> अक्षस्रग्वरकुण्डिकाभयकरं चान्द्रीं कलां विभ्रतं गङ्गाम्भोविलसज्जटे दशभुजं वन्दे महेशं परम्॥ १॥

इति ध्यात्वा मानसोपचारैर्देवं सम्पूज्य यथाशक्ति मूलमन्त्रं जपेत्। जपान्ते पुनराचमनं प्राणायामं च विधाय जलं गृहीत्वा स्ववामभागे देवदक्षिणकरे ॐ गुह्यातिगुह्येति मन्त्रेण जपसमर्पणं कुर्य्यात्। इत्यभेदोपासनम्। यदि तु भेदेनोपासीत तदानीन्तनं पूजाविधि साङ्गं सोपचारं ब्रूते। तत्रैवं क्रमस्तावत् यन्त्रोद्धारस्तत्पूजा च।

शतरुद्रिय के पाठ की फलश्रुति—अग्निदाह, सुरापान, कृत्याचरण, सुवर्ण की चोरी, वृषलीगमन तथा ब्रह्महत्या इत्यादि पाप शतरुद्रिय के पाठ करने से नष्ट हो जाते हैं तथा पाठकर्ता ब्राह्मण पार होकर शिवजी के समीप पहुँच जाता है।

इस प्रकार पञ्चन्यास करके साष्टाङ्ग प्रणाम करके आठ मन्त्रों से जो आगे कहे गये हैं ('ॐ हिरण्यगर्भ०' से लेकर 'अथावः स्वाहाग्ने' इत्यादि तक), पाठ करके नमस्कार करे। फिर स्वयं का रुद्ररूप में ध्यान करे। 'कैलासाचलसन्निभं त्रिनयनं ---------- महेशं परम्।' यह ध्यान का मन्त्र है। ध्यान के उपरान्त मानसोपचार से शिव का पूजन कर यथाशक्ति मूल मन्त्र को जप कर जप के अन्त में आचमन, प्राणायाम करके हाथ में जल लेकर देवता के दक्षिण हस्त में 'गुह्यातिगुह्यगोप्ता त्वं०' इत्यादि मन्त्र से जप का समर्पण करे। यह अभेदोपासना है।

यदि भेदोपासना करनी हो तो तदानीन्तन पूजाविधि साङ्ग सोपचारपूर्वक कहता हूँ। वहीं पर क्रमशः यन्त्रोद्धार तथा उसकी पूजा कही जा रही है।

रुद्रपीठम्

प्रणम्य जगतामीशमुमादेहार्द्धधारिणम्। यन्त्रोद्धारमहं वक्ष्ये रुद्रकल्पानुसारतः॥ १॥
मध्ये वृत्तं समालिख्य तन्मध्ये च दशाक्षरम्। बहिरष्टदलं पद्मं ततः षोडशपत्रकम्॥ २॥
चतुर्विंशतिपत्राढ्यं द्वात्रिंशत्पत्रकं तथा। चत्वारिंशत्पत्रकं तु वृत्तं सूर्यसमप्रभम्॥ ३॥
पञ्चपद्मात्मकं वृत्तं चतुरस्रं च भूगृहम्। सत्त्वं रजस्तमश्चेति त्रिगुणैः परितो वृतम्॥ ४॥
चतुर्द्वारं द्वारदेशे बहिर्नागसमावृतम्। रुद्रपीठमिति ख्यातं देवतास्तत्र विन्यसेत्॥ ५॥
चत्वारिंशच्छतं चैकं देवतानामुदाहृतम्। कर्णिकामध्यदेशे तु रुद्रं पञ्चास्यमालिखेत्॥ ॥

श्रीरुद्रयन्त्रम्



श्रीरुद्रयन्त्रम् (स्कान्दे)



रुद्रयन्त्र का उद्धार—उमा को अर्धाङ्ग में धारण करने वाले जगदीश को प्रणाम करके मैं रुद्रकल्प नामक ग्रन्थ के अनुसार रुद्रयन्त्र (रुद्रपीठ) के उद्धार (निर्माण विधि) का वर्णन करता हूँ। मध्य में एक वृत्त बनाकर उसके मध्य में दशाक्षर मन्त्र लिखे। फिर उस वृत्त के बाहर अष्टदल कमल बनाये। उसके बाहर षोडश पत्र कमल बनाये। फिर उसके बाहर चौबीस दल का कमल बनाये। फिर उसके बाहर बत्तीस दल का कमल बनाये। पुन: उसके बाहर चालीस पत्रात्मक कमल का निर्माण करे। इस प्रकार से सूर्य के समान कान्तिमान पाँच कमलयुक्त वृत्त बनाने के पश्चात् फिर उसके बाहर चौकोर भूगृह बनाये और उसके चारो ओर सत्त्व (श्वेत), रज (लाल) तथा तम (कृष्णवर्ण) का घेरा निर्मित करे। भूगृह में चारो (मुख्य) दिशाओं में चार द्वारों का निर्माण करे। प्रत्येक द्वार पर बाहर नागों का निर्माण करे। इसे रुद्रपीठ कहते हैं। इस रुद्रपीठ में देवताओं का न्यास करना चाहिये। इस रुद्रपीठ में चार सौ एक देवता होते हैं, जिनका स्थापन तथा पूजन करना चाहिये। कर्णिका के मध्य में पञ्चमुख शिव को बनाना चाहिये।

अथ पीठपूजा—तत्रादौ स्वे स्वे स्थाने मण्डूकादिपरतत्त्वान्तपीठदेवता: पूर्ववदावाह्य ॐ मण्डूकादिपरतत्त्वान्तपीठदेवताभ्यो नम: इति गन्धपुष्पै: सम्पूज्य पूर्वादिषु ॐ वामायै नम: ॥ १ ॥ ॐ ज्यैष्ठायै नम: ॥ २ ॥ ॐ रौद्र्यै नम: ॥ ३ ॥ ॐ काल्यै नम: ॥ ४ ॥ ॐ कलविकरिण्यै नम: ॥ ५ ॥ ॐ बलविकरिण्यै नम: ॥ ६ ॥ ॐ बलप्रमथिन्यै नम: ॥ ७ ॥ ॐ सर्वभूतदमन्यै नम: ॥ ८ ॥ पीठमध्ये 'ॐ मनोमन्यै नम:' इति पीठशक्ती पूजयेत्। तत: पुष्पाण्यञ्जलिना गृहीत्वा 'ॐ नमो

भगवते सकलगुणात्मशक्तियुक्तायाऽनन्ताय योगपीठात्मने नमः' इति मन्त्रेण पीठोपरि पुष्पाञ्जलिनासनं दद्यात्। ततः पीठमध्ये ॐ महीद्यौरित्यादिमन्त्रैः पूर्ववत्ताम्रकलशं संस्थाप्य ॐ तत्त्वायामीति वरुणमावाह्य, ॐ अपाम्पतिवरुणाय नमः इति षोडशोपचारैः सम्पूज्य, कलशस्य मुखे विष्णुरित्यभिमन्त्र्य देवदानवसंवादे इत्यादि प्रार्थयेत्। ततः कलशोपरि पट्टवस्त्रं प्रसार्य तत्र गन्धेन रुद्रयन्त्रं विलिख्य तन्मध्ये पलस्वर्णनिर्मितां रुद्रप्रतिमां अग्न्युत्तारणपूर्वकं मूलेन संस्थाप्य, प्राणप्रतिष्ठां कृत्वा, आवाहनादिपुष्पान्तैरुपचारैस्तत्तत्पूर्वोक्तैर्मन्त्रैः सम्पूज्य आवरणपूजां कुर्य्यात्। तद्यथा मध्ये—'ॐ नमो भगवते रुद्राय' इति सम्पूज्य तत्र पश्चिमादिचतुर्दिक्षु क्रमेण ॐ सद्योजाताय नमः॥ १॥ ॐ वामदेवाय नमः॥ २॥ ॐ अघोराय नमः॥ ३॥ ॐ तत्पुरुषाय नमः॥ ४॥ मध्ये—ॐ ईशानाय नमः॥ ५॥ इति पूजयेत्। ततः अष्टारेषु पश्चिमत आरभ्य प्रदक्षिणक्रमेण ॐ नन्दिने नमः॥ १॥ ॐ महाकालाय नमः॥ २॥ ॐ गणेश्वराय नमः॥ ३॥ ॐ वृषभाय नमः॥ ४॥ ॐ भृङ्गिरिटये नमः॥ ५॥ ॐ स्कन्दाय नमः॥ ६॥ ॐ उमायै नमः॥ ७॥ ॐ चण्डीश्वराय नमः॥ ८॥ इति प्रथमावरणम्॥ १॥ ततः षोडशदले तेनैव क्रमेण ॐ अनन्ताय नमः॥ १॥ ॐ सूक्ष्माय नमः॥ २॥ ॐ शिवाय नमः॥ ३॥ ॐ एकपदे नमः॥ ४॥ ॐ एकरुद्राय नमः॥ ५॥ ॐ त्रिमूर्तये नमः॥ ६॥ ॐ श्रीकण्ठाय नमः॥ ७॥ ॐ वामदेवाय नमः॥ ८॥ ॐ ज्येष्ठाय नमः॥ ९॥ ॐ श्रेष्ठाय नमः॥ १०॥ ॐ रुद्राय नमः॥ ११॥ ॐ कालाय नमः॥ १२॥ ॐ कलविकरणाय नमः॥ १३॥ ॐ बलाय नमः॥ १४॥ ॐ बलविकरणाय नमः॥ १५॥ ॐ बलप्रमथनाय नमः॥ १६॥ इति द्वितीयावरणे पूजयेत्॥ २॥ ततश्चतुर्विंशतिदले तेनैव क्रमेण ॐ अणिमायै नमः॥ १॥ ॐ महिमायै नमः॥ २॥ ॐ लघिमायै नमः॥ ३॥ ॐ गरिमायै नमः॥ ४॥ ॐ प्राप्त्यै नमः॥ ५॥ ॐ प्राकाम्यायै नमः॥ ६॥ ॐ ईशितायै नमः॥ ७॥ ॐ वशितायै नमः॥ ८॥ ॐ ब्राह्म्यै नमः॥ ९॥ ॐ माहेश्वर्य्यै नमः॥ १०॥ ॐ कौमार्य्यै नमः॥ ११॥ ॐ वैष्णव्यै नमः॥ १२॥ ॐ वाराह्यै नमः॥ १३॥ ॐ इन्द्राण्यै नमः॥ १४॥ ॐ चामुण्डायै नमः॥ १५॥ ॐ चण्डिकायै नमः॥ १६॥ ॐ असिताङ्गभैरवाय नमः॥ १७॥ ॐ रुरुभैरवाय नमः॥ १८॥ ॐ चण्डभैरवाय नमः॥ १९॥ ॐ क्रोधभैरवाय नमः॥ २०॥ ॐ उन्मत्तभैरवाय नमः॥ २१॥ ॐ कालभैरवाय नमः॥ २२॥ ॐ भीषणभैरवाय नमः॥ २३॥ ॐ संहारभैरवाय नमः॥ २४॥ इति तृतीयावरणे पूजयेत्॥ ३॥ ततो द्वात्रिंशत्पत्रके तेनैव क्रमेण ॐ भवाय नमः॥ १॥ ॐ शर्वाय नमः॥ २॥ ॐ ईशानाय नमः॥ ३॥ ॐ पशुपतये नमः॥ ४॥ ॐ रुद्राय नमः॥ ५॥ ॐ उग्राय नमः॥ ६॥ ॐ भीमाय नमः॥ ७॥ ॐ महादेवाय नमः॥ ८॥ ॐ अनन्ताय नमः॥ ९॥ ॐ वासुकये नमः॥ १०॥ ॐ तक्षकाय नमः॥ ११॥ ॐ कुलीरकाय नमः॥ १२॥ ॐ कर्कोटकाय नमः॥ १३॥ ॐ शङ्खपालाय नमः॥ १४॥ ॐ कम्बलाय नमः॥ १५॥ ॐ अश्वतराय नमः॥ १६॥ 'इमे नागा अष्टौ' ॐ वैन्याय नमः॥ १७॥ ॐ पृथवे नमः॥ १८॥ ॐ हैहयाय नमः॥ १९॥ ॐ अर्जुनाय नमः॥ २०॥ ॐ शाकुन्तलेयाय नमः॥ २१॥ ॐ भरताय नमः॥ २२॥ ॐ नलाय नमः॥ २३॥ ॐ रामाय नमः॥ २४॥ 'इति नृपाष्टकम्' ॐ हिमवते नमः॥ २५॥ ॐ निषधाय नमः॥ २६॥ ॐ विन्ध्याय नमः॥ २७॥ ॐ माल्यवते नमः॥ २८॥ ॐ पारियात्राय नमः॥ २९॥ ॐ मलयाय नमः॥ ३०॥ ॐ हेमकूटाय नमः॥ ३१॥ ॐ गन्धमादनाय नमः॥ ३२॥ 'इति गिर्य्यष्टकम्' इति चतुर्थावरणम्॥ ४॥ ततश्चत्वारिंशद्दले तेनैव क्रमेण ॐ इन्द्राय नमः॥ १॥ ॐ अग्नये नमः॥ २॥ ॐ ईशानाय नमः॥ ३॥ ॐ निर्ऋतये नमः॥ ४॥ ॐ वरुणाय नमः॥ ५॥ ॐ वायवे नमः॥ ६॥ ॐ कुबेराय नमः॥ ७॥ ॐ ईशानाय नमः॥ ८॥ ॐ शच्यै नमः॥ ९॥ ॐ स्वाहायै नमः॥ १०॥ ॐ वाराह्यै नमः॥ ११॥ ॐ खड्गिण्यै नमः॥ १२॥ ॐ वारुण्यै नमः॥ १३॥ ॐ वायव्यै नमः॥ १४॥ ॐ कौवेर्य्यै नमः॥ १५॥ ॐ ईशान्यै नमः॥ १६॥ ॐ वज्राय नमः॥ १७॥ ॐ शक्तये नमः॥ १८॥ ॐ दण्डाय नमः॥ १९॥ ॐ खड्गाय नमः॥ २०॥ ॐ पाशाय नमः॥ २१॥ ॐ अङ्कुशाय नमः॥ २२॥ ॐ गदायै नमः॥ २३॥ ॐ त्रिशूलाय नमः॥ २४॥ ॐ ऐरावताय नमः॥ २५॥ ॐ मेषाय नमः॥ २६॥ ॐ महिषाय नमः॥ २७॥ ॐ प्रेताय नमः॥ २८॥ ॐ मकराय नमः॥ २९॥ ॐ हरिणाय नमः॥ ३०॥ ॐ नराय नमः॥ ३१॥ ॐ वृषभाय नमः॥ ३२॥ ॐ ऐरावताय नमः॥ ३३॥ ॐ पुण्डरीकाय नमः॥ ३४॥ ॐ वामनाय नमः॥ ३५॥ ॐ कुमुदाय नमः॥ ३६॥ ॐ अञ्जनाय नमः॥ ३७॥ ॐ पुष्पदन्ताय नमः॥ ३८॥ ॐ सार्वभौमाय नमः॥ ३९॥

ॐ सुप्रतीकाय नमः ॥ ४० ॥ इति पञ्चमावरणम् ॥ ५ ॥ **ततो भूपुरे पूर्वादिक्रमेण पुनः ॐ इन्द्राय नमः ॥ १ ॥ ॐ अग्नये नमः ॥ २ ॥ ॐ यमाय नमः ॥ ३ ॥ ॐ निर्ऋतये नमः ॥ ४ ॥ ॐ वरुणाय नमः ॥ ५ ॥ ॐ वायवे नमः ॥ ६ ॥ ॐ कुबेराय नमः ॥ ७ ॥ ॐ ईशानाय नमः ॥ ८ ॥ (ईशानपूर्वयोर्मध्ये) ॐ ब्रह्मणे नमः ॥ ९ ॥ (निर्ऋतिपश्चिमयोर्मध्ये) ॐ अनन्ताय नमः ॥ १० ॥** इति षष्ठावरणे पूजयेत्। **ततो भूपुरस्य बाह्ये आग्नेयादिषु 'आग्नेय्याम्'** ॐ विरूपाक्षाय नमः ॥ १ ॥ **'नैर्ऋत्याम्' ॐ विरूपाय नमः ॥ २ ॥ 'वायव्याम्' ॐ पशुपतये नमः ॥ ३ ॥ 'ईशान्याम्'** ॐ ऊर्ध्वलिङ्गाय नमः ॥ ४ ॥ **पुनः भूपुराद्बहिः पूर्वादिदिक्षु क्रमेण 'पूर्वे' ॐ विप्रवर्णाय श्वेतरूपाय सहस्त्रफणमण्डिताय शेषाय नमः ॥ १ ॥ 'आग्नेय्याम्' ॐ वैश्यवर्णाय नीलरूपाय पञ्चाशत्फणाय उत्तुङ्गकायाय तक्षकाय नमः ॥ २ ॥ 'दक्षिणस्याम्' ॐ विप्रवर्णाय कुङ्कुमरूपाय सहस्त्रफणमण्डिताय अनन्ताय नमः ॥ ३ ॥ 'नैर्ऋत्याम्' ॐ क्षत्रियवर्णाय पीतरूपाय सप्तशतफणमण्डिताय उत्तुङ्गकायाय वासुकये नमः ॥ ४ ॥ 'पश्चिमायाम्' ॐ क्षत्रियवर्णाय पीतरूपाय सप्तशतफणाय शङ्खपालाय नमः ॥ ५ ॥ 'वायव्याम्' ॐ वैश्यवर्णाय कृष्णरूपाय पञ्चशत्फणाय उत्तुङ्गाय महापद्माय नमः ॥ ६ ॥ 'उत्तरस्याम्' ॐ शूद्रवर्णाय कृष्णारूपाय त्रिंशत्फणमण्डिताय कम्बलाय नमः ॥ ७ ॥ 'ईशान्याम्' ॐ शूद्रवर्णाय श्वेतरूपाय त्रिंशत्फणयुक्ताय कर्कोटकाय नमः ॥ ८ ॥ इति पूजयेत् ॥** इति सप्तमावरणम्।

रुद्रपीठ की पूजा-विधि—प्रारम्भ में अपने-अपने स्थानों पर मण्डूकादि परतत्त्वान्त पीठदेवताओं को पूर्ववत् आवाहित करके 'ॐ मण्डूकादिपरतत्त्वान्तदेवताभ्यो नमः' कहकर गन्ध-पुष्पादि से पूजित करे। पीठशक्तियों की पूजा फिर पूर्वादि दिशाओं में तथा मध्य में मूल में लिखित 'ॐ वामायै नमः' इत्यादि ९ मन्त्रों से करनी चाहिये। फिर पुष्पाञ्जलि लेकर 'ॐ नमो भगवते सकलगुणात्मशक्तियुक्तायानन्ताय योगपीठात्मने नमः' इस मन्त्र से पीठ के ऊपर पुष्पाञ्जलि द्वारा आसन प्रदान करना चाहिये।

कलश-स्थापन—फिर रुद्रपीठ के मध्य में 'ॐ महीद्यौः०' इत्यादि मन्त्रों के द्वारा पूर्व की भाँति ताम्रकलश को स्थापित करके 'ॐ तत्त्वायामि ब्रह्मणा०' इस मन्त्र से उसमें वरुणदेव का आवाहन कर 'ॐ अपाम्पतिवरुणाय नमः' इस मन्त्र के द्वारा षोडशोपचार पूजन कर 'कलशस्य मुखे विष्णुः' इत्यादि श्लोकों के द्वारा कलश की प्रार्थना करे। फिर कलश के ऊपर रेशमी वस्त्र अथवा श्रेष्ठ वस्त्र पर गन्ध से रुद्रयन्त्र लिखकर ओढ़ा दे। यन्त्र के बीच में एक पल भार की सोने की रुद्रमूर्ति बनवाकर रखे। मूर्ति का पहिले अग्न्युत्तारण कर लेना चाहिये। फिर पूजन आरम्भ करे।

मध्यपूजन—यन्त्र के मध्य में 'ॐ नमो भगवते रुद्राय' से पूजन करे। फिर पश्चिमादि चारो दिशाओं में 'ॐ सद्योजाताय नमः' इत्यादि दोनों मन्त्रों से पूजन करे।

आवरण पूजा—फिर मूल में लिखित 'ॐ नन्दिने नमः' इत्यादि आठ मन्त्रों से पश्चिम से लेकर प्रदक्षिणक्रम से प्रथम आवरण में पूजा करे। फिर षोडश दल कमल में पश्चिमादि क्रम से 'ॐ अनन्ताय नमः' इत्यादि मूल में लिखित १६ मन्त्रों से द्वितीयावरण की पूजा करे। फिर चौबीस दल वाले कमल में पश्चिमादि क्रम से 'ॐ अणिमायै नमः' इत्यादि २४ मन्त्रों से तृतीयावण की पूजा करे। फिर बत्तीस दल वाले कमल में 'ॐ भवाय नमः' इत्यादि ३२ मन्त्रों से चतुर्थावरण में पूजन करे। फिर पाँचवें आवरण में चालीस दलों वाले कमल में पश्चिम से लेकर क्रमशः 'ॐ इन्द्राय नमः' इत्यादि ४० मन्त्रों से पूजन करे। फिर षष्ठावरण में भूपुर में पूर्वादि क्रम से 'ॐ इन्द्राय नमः' इत्यादि दश मन्त्रों से दश दिक्पालों का पूजन करे। फिर भूपुर के बाह्य भाग में आग्नेयादि आठों दिशाओं में प्रदक्षिणक्रम से मूल में लिखित 'ॐ विरूपाक्षाय नमः' इत्यादि ८ मन्त्रों से सप्तमावरण की पूजा करे।

विमर्श—यहाँ पर दो प्रकार के रुद्रयन्त्र दिये हैं, जिनमें एक स्कन्दपुराण के अनुसार तथा दूसरा रुद्रकल्प के अनुसार है। ये दोनों चित्र ग्रन्थकार पं० चतुर्थीलाल गौड द्वारा निर्मित हैं; अतः जिस यन्त्र में पञ्चमुख रुद्र मध्य में विराजमान हैं, उसमें दिये अनुसार पूजित करे। यन्त्र में क्रमशः पूजन के मन्त्र भी लिखित हैं।

रुद्रस्तवः

एवमावरणपूजां कृत्वा 'ॐ नमो भगवते रुद्राय' इति मूलान्ते धूपदीपनैवेद्याचमनीयताम्बूलदक्षिणानीराजन-त्रि:प्रदक्षिणादिभिः श्रीरुद्रं सम्पूज्य दशाक्षरेण पुष्पाञ्जलिं दत्त्वा छत्रचामरपरिमलपुष्पमालाआदर्शदर्शनं समर्पयेत्। ततो रुद्रस्तवेन स्तुवीत—

ॐ नमो विरिञ्चिविष्णवीशभेदेन परमात्मने। सर्गसंस्थितिसंहारव्यावृत्तव्यक्तमूर्त्तये ॥ १ ॥
नमश्चतुर्धा प्रोद्भूतभूतभीतात्मने भुवः। भूरिभारार्तिसंहर्त्रे भूतनाथाय शूलिने ॥ २ ॥
विश्वग्रासाय विकसत्कालकूटविषाशिने। तत्कलङ्काङ्कितग्रीवनीलकण्ठाय ते नमः ॥ ३ ॥
नमो ललाटनयने प्रोल्लसत्कृष्णवर्त्मने। ध्वस्तस्मरनिरस्ताधियोगिध्याताय शम्भवे ॥ ४ ॥
नमो देहार्द्धकान्ताय दग्धदक्षाध्वराय च। चतुर्वर्गेष्टदिष्टार्थदायिने मायिनेऽणवे ॥ ५ ॥
स्थूलाय मूलभूताय शूलवारितविद्विषे। कालहन्त्रे नमश्चन्द्रखण्डमण्डितमौलये ॥ ६ ॥
दिग्वाससे कपर्दान्तर्भ्रान्ताहिशरदिन्दवे। देवदैत्योरगेन्द्रादिमौलिधृष्टाङ्घ्रये नमः ॥ ७ ॥
भस्माभ्यक्ताय भक्ताय भुक्तिमुक्तिप्रदायिने। सकृद्व्यक्तस्वरूपाय शङ्कराय नमो नमः ॥ ८ ॥

नमोन्धकान्तकरिपवेऽसुरद्विषे नमोऽस्तु ते द्विरदवरावभेदिने।
विषोल्लसत्फणिकुलबद्धमूर्त्तये नमः सदा वृषवरवाहनाय ते ॥ ९ ॥
वियन्मरुद्धुतवहवायुकुम्भिनीमखेशरव्यमृतमयूखमूर्त्तये ।
नमः सदा नरकायावभेदिने भवेह नो भयभङ्गकृद्विभो ॥ १० ॥

इति रुद्रस्तवेन स्तुत्वा देवं प्रदक्षिणीकृत्य तत्पदद्वन्द्वे साष्टाङ्गं प्रणम्य तत्पीठादीशानदिग्देशे तत्तोयकृते मण्डले रुद्रनैवेद्यांशं किञ्चिदल्पं गृहीत्वा 'चण्डेश्वराय शिवनैवेद्यभागं ददामि' इत्युक्त्वा प्रक्षिपेत्। तत आचम्य—

लेह्यपेयान्नपानानि ताम्बूलं स्त्रग्विलेपनम्। नैर्माल्यं भोजनं तुभ्यं दत्तमस्तु शिवाज्ञया ॥ १ ॥
यत्किञ्चित्क्रियते देव मया चण्ड तवाज्ञया। न्यूनाधिकं कृतं मोहात्परिपूर्णं तदस्तु मे ॥ २ ॥

इति प्रार्थयेत्। एवं चण्डं सम्पूज्य ततो जपं कुर्यात्। अस्य पुरश्चरणं दशलक्षमन्त्रात्मकम्। ततो जपान्ते सघृतपायसान्नेन अयुतहोमं कृत्वा तेनैव द्रव्येण आवरणदेवताभ्य एकैकाहुतीर्हुत्वा होमदशांशेन तर्पणं तद्दशांशेन मार्जनं शक्त्या ब्राह्मणभोजनं च कुर्य्यात्।

एवमर्चन्महादेवं पञ्चाङ्गन्यासपूर्वकम्। दशाक्षरजपासक्तो न सीदेत्स्वेष्टसाधने ॥ १ ॥
मनोहराणि गेहानि सुन्दर्यो वामलोचनाः। धनमिच्छापूरणान्तं लभते शिवसेवनात् ॥ २ ॥
प्रयोगान्पूर्वमन्त्रोक्तान्कुर्वीतात्र दशाक्षरे। दशाक्षरं भजन् विप्रो रुद्रजापी भवेत्सदा ॥ ३ ॥

इति महार्णवमन्त्रमहोदधिशान्तिसारादिप्रोक्तं दशाक्षरीरुद्रमन्त्रविधानं समाप्तम्।

इस प्रकार आवरणपूजा सम्पन्न करके 'ॐ नमो भगवते रुद्राय' इस मूल मन्त्र (दशाक्षरी मन्त्र) से धूप, दीप, नैवेद्य, आचमनीय, ताम्बूल, दक्षिणा, नीराजन तथा तीन प्रदक्षिणा के द्वारा रुद्र को पूजित कर दशाक्षर मन्त्र से पुष्पाञ्जलि देकर छत्र, चामर, परिमल, पुष्पमाला तथा दर्पण समर्पित करने के उपरान्त रुद्रस्तव से स्तुति करे—

रुद्रस्तव—विष्णु, विरिञ्चि (ब्रह्मा), शिव के भेद से जो सृष्टि, संस्थिति, संहाररूपी व्यावृत्ति के रूप में अव्यक्तमूर्ति परमात्मा है, उसे नमस्कार है। चार प्रकार (अण्डज, पिण्डज, स्वेदज, उद्भिज) से उत्पन्न प्राणियों को

भयभीत करने वाले तथा पृथ्वी के भाराक्रान्त होने पर उसकी पीड़ा को संहार द्वारा हरण करने वाले, त्रिशूलधारी, भूतनाथ को नमस्कार है। विश्व को ग्रासरूप में निगलने के लिये उत्पन्न कालकूट को खाने वाले तथा उसके काले चिह्न के रूप में नीलकण्ठ बनने वाले को नमस्कार है। ललाटनयन, प्रोल्लसत् कृष्णवर्त्म, कामदेव के ध्वंसक, योगियों के द्वारा ध्यायित शम्भु को नमस्कार है। देहार्ध में कान्ता से युक्त, दक्षयज्ञ के विनाशक, चतुर्वर्ग को प्रदान करने वाले, मायापति अणुस्वरूप को नमस्कार है। स्थूल, मूलभूत, त्रिशूल से शत्रुओं का संहार करने वाले, कालनाशक, चन्द्रखण्ड से मण्डित शिर वाले को नमस्कार है। दिगम्बर, कपर्दी, सर्पवेष्टित, शरद के चन्द्र के समान वर्ण वाले, देव, दैत्य, सर्पराज आदि को शिर पर धारण करने वाले को नमस्कार है। भस्माभ्यक्त, भक्त को भुक्ति-मुक्तिप्रदायक, तुरन्त प्रकट होने वाले शङ्कर को नमस्कार है। हे अन्धक दैत्य के नाशकर्ता, असुरद्वेषी, द्विरदवर का अवभेदन करने वाले, विष से उल्लसित सर्पकुल को लपेटने वाले, वृषवाहन वाले! आपको नमस्कार है॥ १-१०॥

इस प्रकार से रुद्रस्तव के द्वारा शिव की स्तुति करके प्रदक्षिणा कर उनके चरणयुगल में साष्टाङ्ग प्रणाम कर उस पीठ के ईशानकोण में जल से मण्डल बनाकर रुद्र के नैवेद्य में से कुछ अंश उनके गण चण्डेश्वर को 'शिवनैवेद्य में से भाग देता हूँ' ऐसा कहकर फेंक दे (डाल दे)। फिर आचमन कर 'लेह्य, पेय, अन्नपान, ताम्बूल, माला, विलेपन, निर्माल्य, भोजन आदि को शिव की आज्ञा से आपको देता हूँ। हे देव चण्डेश्वर! जो कुछ भी किया जाता है, वह न्यूनाधिक होने पर भी आपकी आज्ञा से पूर्ण हो।' ऐसी प्रार्थना चण्ड से करे। इस प्रकार चण्ड की पूजा करके जप करे। फिर दशाक्षरी मन्त्र का दश लाख जप कर पुरश्चरण सम्पन्न करे। जप की समाप्ति पर घृत-पायस-अन्नमिश्रित अयुत (१०,०००) होम करे तथा आवरणदेवताओं को एक-एक आहुति देकर होम का दशांश तर्पण, तद्दशांश मार्जन, तद्दशांश ब्राह्मणभोजन कराये। इस प्रकार से पञ्चाङ्ग न्यासपूर्वक महादेव की अर्चना करके दशाक्षर का जप करने वाला अभीष्ट, सिद्धि में असफल नहीं होता है, उसे मनोहर गृहसुन्दरी स्त्री, धन आदि की प्राप्ति होती है। दशाक्षर के जप के उपरान्त सदैव रुद्रजप भी करना चाहिये।

पञ्चरुद्रविधानानि

हेमाद्रिग्रहार्णवशान्तिसारेषु तत्र तावद्रुद्रमाहात्म्यम्। जाबालश्रुतिः—'किं जाप्येनामृतत्वं नो ब्रूहि शतरुद्रियेण' इति। कैवल्योपनिषदि—यः शतरुद्रियमधीते सोग्निपूतो भवति। स वायुपूतो भवति। स सुरापानात्पूतो भवति। स गुरुतल्पगमनात्पूतो भवति। स स्वर्णस्तेयात्पूतो भवति। स ब्रह्महत्यायाः पूतो भवति। अकृत्यात्पूतो भवति। अनेन ज्ञानमाप्नोति संसारार्णवनाशनम्। तस्मादेवं विदित्वैव कैवल्यफलमश्नुत इति। पराशरोऽपि—मद्यं पीत्वा गुरुदाराश्च गत्वा स्तेयं कृत्वा ब्रह्महत्यां च कृत्वा। भस्मच्छन्नो भस्मशय्यां शयानो रुद्राध्यायी मुच्यते सर्वपापैः॥ १॥ इदमहरहः कृते मासमात्रं ज्ञेयम्। तदुक्तं पाराशरेण—

रुद्राध्यायी भवेद्भक्त्या मासमेकमतन्द्रितः। प्रायश्चित्तं भवेदेतद्रहस्यस्य न संशयः॥

पाद्मे शिवगीतायाम्—

यस्तु रुद्रं जपेन्नित्यं ध्यायमानो ममाकृतिम्। षडक्षरं वा बाणं वा निष्कामो विजितेन्द्रियः॥
अथाथर्वशिरोमन्त्रं केवलं वा रघूत्तम। स तेनैव च देहेन शिवः सञ्जायते ध्रुवम्॥

पञ्चरुद्र-विधान—जाबालश्रुति में कहा है—यदि शतरुद्रिय का जप नहीं किया तो फिर अन्य किस जप से अमृत की प्राप्ति होगी।

कैवल्य उपनिषद् में भी कहा गया है—जो शतरुद्रिय का अध्ययन (पाठ) करता है, वह अग्निपूत (पवित्र) होता है। वायुपूत होता है। वह गुरुपत्नी-गमन के दोष से मुक्त होता है। वह स्वर्ण की चोरी से पापमुक्त होता है। ब्रह्महत्या के पाप से रहित होता है। दुष्कृत्य के दोष से मुक्त होता है। इससे प्राप्त ज्ञान के द्वारा संसाररूपी समुद्र का नाश होता है तथा कैवल्य (मुक्ति) की प्राप्ति होती है।

पराशर ने भी कहा है—मद्य पीकर, गुरुदारा-गमन कर, चोरी कर, ब्रह्महत्या कर जो भस्म रमाकर भस्म में शयन करता है तथा रुद्र का पाठ करता है, वह सब पापों से मुक्त हो जाता है। पद्मपुराणान्तर्गत शिवगीता में कहा है—

जो मेरे स्वरूप का ध्यान करता हुआ नित्य रुद्रजप करता है; षडक्षर मन्त्र का जप करता हुआ जितेन्द्रिय होकर लिङ्गपूजा करता है अथवा हे रघूत्तम! वह केवल रुद्र अथर्वशीर्ष का जप करता है तो वह व्यक्ति उसी शरीर से निश्चित ही शिव हो जाता है।

वायुपुराणे—

सर्वेषु ग्रहदोषेषु दुःस्वप्नाद्भुतदर्शने। जपन्रुद्रान् सकृद्विप्रः सर्वदोषैः प्रमुच्यते॥
अनपत्यत्वदोषेषु शाकिन्यादिग्रहेषु च। सर्वज्वरविनाशाय रुद्रजाप्यो न संशयः॥
रोगवान् पापवाँश्चैव रुद्रं जप्त्वा जितेन्द्रियः। रोगात्पापात्प्रमुक्तोसावतुलं सुखमश्नुते॥

हेमाद्रौ कौशिकबौधायनौ—

रुद्रैकादशनी त्वेषा सर्वकामफलप्रदा। सर्वपापक्षयकरी सर्वशान्तिप्रदायिनी॥

विष्णुधर्मोत्तरेऽपि—

रुद्राणां च तथा जाप्यं सर्वाघविनिषूदनम्। सर्वकामकरो होमस्तथा सर्वत्र शान्तिदः॥
अजाविकानामश्वानां कुञ्जराणां तथा गवाम्। मनुष्याणां नरेन्द्राणां बालानां योषितामपि॥
ग्रामाणां नगराणां च देशानामपि भार्गव। उपद्रुतानां धर्मज्ञ व्याधितानां तथैव च॥
मारके समनुप्राप्ते रिपुजे च तथा भये। रुद्रहोमः पराशान्तिः पायसेन घृतेन वा॥

हेमाद्रौ कालिकापुराणे—

यः पुनः सततं भक्त्या अभ्यर्च्य शशिशेखरम्। जपेद्ध्यायेत्सदा रुद्रात्सोऽपि याति परं पदम्॥
अथैहते फलं किञ्चिदैहिकं पुष्कलं तथा। तानेव हि जपेद्रुद्रान् शुचिर्भूत्वा समाहितः॥
अथ वेदं जगत्सर्वं वशीकर्तुं समीहते। तदा रुद्रं जपेद्धूयो ध्यायमानो महेश्वरम्॥

इति रुद्रफलम्।

वायुपुराण में कहा है—सभी ग्रहदोषों में, बुरे स्वप्न देखने में एक बार जप करने वाला ब्राह्मण उनके दोषों से मुक्त हो जाता है। सन्तानहीनता, डाकिनी-शाकिनी आदि ग्रहों की पीड़ा, सभी ज्वर आदि रुद्र के जप से निस्सन्देह नष्ट होते हैं। जो रोगी या पापी जितेन्द्रिय होकर रुद्रजप करता है, वह रोग तथा पाप से मुक्त होकर सुखी होता है।

हेमाद्रि में कौशिक बौधायन का कथन है—यह रुद्रैकादशिनी सभी कामनाओं को पूरा करती है। सभी पापों की नाशिक तथा सम्पूर्ण शान्ति देने वाली है।

विष्णुधर्मोत्तर में भी कहा है—रुद्रों का जप सम्पूर्ण पापों का नाशक है। सम्पूर्ण कामनाओं का दायक है। उसी प्रकार रुद्रहोम भी शान्तिदायक होता है। भेड़ों-बकरियों, अश्वों, हाथियों तथा गायों, मनुष्यों, राजा लोगों, बालकों,

स्त्रियों, ग्रामों, नगरों तथा देशों की भी शान्ति हे भार्गव! हो जाती है। हे धर्मज्ञ! इन सबके उपद्रव तथा कष्ट, रोग, महामारी तथा शत्रुभय पायस तथा घृत से होम करने पर शान्त हो जाते हैं।

हेमाद्रि में कालिकापुराण का उद्धरण है—जो भक्तिपूर्वक चन्द्रमौलि (शिव) का जप एवं ध्यान नित्य करता है, वह परमपद को प्राप्त होता है। इहलोक तथा परलोक में फल चाहने वाले को रुद्रजप करना चाहिये। जिस प्रकार अथर्ववेद के जप से सभी कामनाएँ पूर्ण होती हैं, उसी प्रकार रुद्रजप का भी फल मिलता है।

रुद्रप्रकारः

रुद्रश्च त्रिविधः—जपरुद्रो होमरुद्रोऽभिषेकरुद्रश्च। तत्र जपरुद्रः केवलजपात्मको होमाङ्गश्चेति द्वेधा। होमरुद्रे तर्पणादि। अभिषेकरुद्रे च पूजा ब्राह्मणभोजनं सिद्धम्। तत्रापि जपादिरुद्रश्च पञ्चधा। तद्भेदानाह—

शृणुष्व भो महाप्राज्ञ रुद्रभेदान्वदामि ते। रुद्राः पञ्चविधाः प्रोक्ता देशिकैरुत्तरोत्तरम्॥ १॥
साङ्गस्त्वाद्यो रूपकाख्यः सशीर्षो रुद्र उच्यते। एकादशगुणैस्तद्वद्रुद्रिसंज्ञो द्वितीयकः॥ २॥
एकादशभिरेताभिस्तृतीयो लघुरुद्रकः। लघ्वेकादशभिः प्रोक्तो महारुद्रश्चतुर्थकः॥ ३॥
पञ्चमः स्यान्महारुद्र एकादशभिरन्तिमः। अतिरुद्रः समाख्यातः सर्वेभ्यो ह्युत्तमोत्तमः॥ ४॥ इति।

रुद्रपद्धतौ—

साङ्गमाद्यं जपेद्रूपं केवलानि नवान्तरे। साङ्गं सशीर्षं चान्त्यं तु निरङ्गमिति केचन॥ १॥
षडङ्गानि जपेत्पूर्वमध्यायं रुद्रियं ततः। तदन्ते जपतेऽष्टर्चं वयं सोममहच्छिरः॥ २॥

रुद्र के प्रकार—रुद्र तीन प्रकार का होता है—१. जपरुद्र, २. होमरुद्र तथा ३. अभिषेकरुद्र। उनमें से जपरुद्र (रुद्राष्टाध्यायी का पाठ) केवल जपात्मक (पाठात्मक) होता है तथा होमात्मक रुद्र के दो भेद होते हैं। होमरुद्र में तर्पणादि होता है। अभिषेक रुद्र में पूजा तथा ब्राह्मणभोजन होते हैं। रुद्रों के पाँच भेद भी माने गये हैं। उनके भेदों को कहते हैं—हे महाप्राज्ञ! सुनो, अब मैं तुमसे रुद्र के भेदों को कहता हूँ। देशिकों (गुरुओं) ने रुद्रों के पाँच प्रकार कहे हैं, जो उत्तरोत्तर होते हैं। प्रथम रुद्र साङ्ग आद्यरूपक नामक सशीर्ष रुद्र होता है। उससे एकादशसंज्ञक रुद्र द्वितीय होता है। फिर इस द्वितीय की एकादश आवृत्ति में तीसरा लघुरुद्र होता है। लघु के एकादश से चौथा महारुद्र होता है। फिर उसके ग्यारह से अन्तिम अतिरुद्र होता है, वह सभी रुद्रों में उत्तम होता है॥ १-४॥

रुद्रपद्धति में कहा है—आदिरुद्र में केवल साङ्गरूपक का जप (पीठ) केवल नौ के अन्तर से करे। अन्तिम रुद्र का जप साङ्ग (षडङ्गसहित) तथा शीर्षसहित करे। कुछ के मत से निरङ्ग जप करना चाहिये। प्रथम षडङ्गों का जप करके फिर रुद्राध्याय का जप करना चाहिये। अन्त में 'वयं सोम' इत्यादि आठ ऋचाओं का जप किया जाता है। यही शीर्ष है॥ १-२॥

जपादिरुद्रप्रयोगः

तत्र तावत् कृच्छ्रचान्द्रायणं पराकं च कृत्वा अशक्तश्च तत्प्रतिनिधिरूपां धेनुं वा तन्मूल्यं च दत्त्वा अयुतगायत्रीजपं च स्वयं ब्राह्मणद्वारा वा कुर्यात्। एवं प्रायश्चित्तं सम्पाद्य चन्द्रतारादिबलान्विते सुमुहूर्त्ते प्रातर्नित्यकर्म समाप्य सपत्नीको यजमानः स्वासने प्राङ् उदङ्मुखो वा उपविश्य भस्मत्रिपुण्ड्रं रुद्राक्षमालां च धृत्वा पवित्रपाणिः 'ॐ नमो भगवते रुद्राय' इति मन्त्रेणाचमनं प्राणायामं च कुर्यात्। ततः ॐ आनो भद्रा इत्यादिशान्तिपाठं पठित्वा सुमुखश्चैकदन्तश्चेति गणपतिस्मरणपूर्वकं देशकालौ सङ्कीर्त्य 'अमुकगोत्रोऽमुकशर्माहं श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं मम इह जन्मनि जन्मान्तरे

च कृतकायिकवाचिकमानसिकसांसर्गिकज्ञाताज्ञातमहापातकोपपातकानां व्याधिरूपेण परिपच्यमानानां विनाशार्थं वाऽमुककामनासिद्ध्यर्थं श्रीपरमेश्वरप्रीत्यर्थम् अमुकरुद्रहोमेन वा अमुकरुद्राभिषेकेण एतावन्तं कालं श्रीसदाशिवं स्वयं ब्राह्मणद्वारा वा यक्ष्ये' एवं तत्तत्कामनया सङ्कल्प्य 'तदङ्गत्वेन गणपतिपूजनं पुण्याहवाचनं मातृकापूजनं नान्दीश्राद्धमाचार्यादिवरणं च करिष्ये' इति च सङ्कल्प्य गणपतिपूजनादिआचार्यवरणान्तं पूर्ववत्कुर्य्यात्। ततो जपरुद्रे शिवालयादिषु जपस्थानं प्रकल्प्य, होमरुद्रे मण्डपकुण्डादि च कुर्य्यात्। ततो जापकः कृतनित्यक्रियः धृतभस्मत्रिपुण्ड्ररुद्राक्षः सपवित्रकरः आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य 'मम यजमानस्य वा अमुककामनासिद्ध्यर्थममुकरुद्रजपं करिष्ये, तदङ्गत्वेन भूतशुद्धिं प्राणप्रतिष्ठामन्तर्मातृकाबहिर्मातृकान्यासं श्रीकण्ठादिकलान्यासं च करिष्ये' इति सङ्कल्प्य भूतशुद्ध्यादिबहिर्मातृकान्यासान्तं पद्धतिकाण्डोक्तमार्गेण कृत्वा शिवपञ्चाक्षरोदितं श्रीकण्ठादिकलामातृकान्यासं च सम्पाद्य रुद्रन्यासान् कुर्य्यात्। ते चानादेशे सर्वेऽप्यङ्गुष्ठानामिकाभ्यां कार्य्याः।

जपादि रुद्रप्रयोग—प्रथम कृच्छ्रचान्द्रायण व्रत करके, अशक्ति में उसके प्रतिनिधिरूप गोदान अथवा उसका मूल्य देकर अयुत सङ्ख्या में स्वयं या ब्राह्मण द्वारा गायत्री-जप करे। इस प्रकार प्रायश्चित्त का सम्पादन करके चन्द्र-तारा बलान्वित सुमुहूर्त्त में प्रातः के नित्यकर्म को समाप्त कर सपत्नीक यजमान पूर्वाभिमुख अथवा उत्तराभिमुख बैठकर भस्मत्रिपुण्ड्र तथा रुद्राक्षमाला को धारण करके पवित्रहस्त होकर 'ॐ नमो भगवते रुद्राय' इस मन्त्र से आचमन तथा प्राणायाम करके 'ॐ आनो भद्रा०' इत्यादि शान्तिपाठ पढ़कर 'सुमुखश्चैकदन्तश्च' इनका पाठ गणपतिस्मरणपूर्वक करके देश-काल का उच्चारण कर मूल में लिखित 'अमुकगोत्रोऽमुक .... नान्दीश्राद्धमाचार्यवरणमहं करिष्ये' इत्यादि को पढ़कर सङ्कल्प करके गणपति-पूजन, आचार्यवरण-पर्यन्त सब कृत्य पूर्ववत् सम्पन्न करके होमरुद्र में मण्डप तथा कुण्डादि का निर्माण करे। फिर रुद्रजप-हेतु शिवालय आदि में जपस्थान की व्यवस्था करके जापक नित्यकर्म से निपटकर भस्म, त्रिपुण्ड्र तथा रुद्राक्ष धारण कर, पवित्री धारण कर, प्राणप्रतिष्ठा, अन्तर्मातृका, बहिर्मातृकान्यास तथा निश्चित सङ्ख्या में रुद्राक्षजप करने का सङ्कल्प करे। फिर भूतशुद्धि आदि सब कार्य पद्धतिकाण्ड में बतायी गयी विधि के अनुसार करके शिवपञ्चाक्षर के अनुष्ठान में जो भी कण्ठादि कलामातृकान्यास एवं रुद्रन्यास कहे गये हैं, उन्हें करे। उन्हें अङ्गूठे तथा अनामिका के द्वारा सम्पन्न करे (जब तक कि अन्य प्रकार से न्यास करना न कहा गया हो)।

छन्दःपुरुषन्यासः

तत्र तावत्प्रथमं छन्दःपुरुषन्यासः—ॐ तिर्यग्विलाय चमसायोर्ध्वबुध्न्याय च्छन्दःपुरुषाय नमः शिरसि॥ १॥ ॐ गौतमभरद्वाजाभ्यां नमः नेत्रयोः॥ २॥ ॐ विश्वामित्रजमदग्निभ्यां नमः श्रोत्रयोः॥ ३॥ ॐ वसिष्ठकश्यपाभ्यां नमः नासापुटयोः॥ ४॥ ॐ अत्रये नमः वाचि॥ ५॥ ॐ गायत्र्यग्निभ्यां नमः शिरसि॥ १॥ ॐ उष्णिक्सवितृभ्यां नमः ग्रीवायाम्॥ २॥ ॐ बृहतीबृहस्पतिभ्यां नमः हनौ॥ ३॥ ॐ बृहद्रथन्तरद्यावापृथिवीभ्यां नमः बाह्वोः॥ ४॥ ॐ त्रिष्टुबिन्द्राभ्यां नमः नाभौ॥ ५॥ ॐ जगत्यादित्याभ्यां नमः श्रोण्योः॥ ६॥ ॐ अतिच्छन्दाप्रजापतिभ्यां नमः लिङ्गे॥ ७॥ ॐ यज्ञायज्ञियवैश्वानराभ्यां नमः गुदे॥ ८॥ ॐ अनुष्टुब्विश्वेभ्यो देवेभ्यो नमः ऊर्वोः॥ ९॥ ॐ पंक्तिमरुद्भ्यो नमः जानुनोः॥ १०॥ ॐ द्विपदाविष्णुभ्यां नमः पादयोः॥ ११॥ ॐ विच्छन्दावायुभ्यां नमः नासापुटस्थप्राणेषु॥ १२॥ ॐ न्यूनाक्षरच्छन्दोभ्यो नमः मस्तकादिपादान्तं सर्वाङ्गेषु॥ १३॥ इति छन्दःपुरुषन्यासः।

छन्दपुरुषन्यास—'ॐ तिर्यक् विलाय चमसायोर्ध्वबुध्न्याय नमः' इत्यादि मूल में लिखित पाँच मन्त्रों से शरीर के विभिन्न अङ्गों में क्रमशः शिर, नेत्रद्वय, कर्णद्वय, नासापुटद्वय, वाक् (जीभ) में न्यास करे। पुनः 'ॐ

गायत्री अग्निभ्यां नमः शिरसि' इत्यादि तेरह मन्त्रों से क्रमशः शिर, ग्रीवा, हनु (ठोढ़ी), भुजाएँ, नाभि, श्रोणि (कूल्हे), लिङ्ग, गुद, ऊरू, जानु, गुदों, नासापुट तथा सर्वाङ्ग में न्यास करना चाहिये।

पञ्चाङ्गरुद्राणां न्यासः

मनोजूतिरित्यस्याङ्गिरसबृहस्पतिऋषिर्यजुश्छन्दः विश्वेदेवा देवता हृदयन्यासे विनियोगः। ॐ मनोजूतिर्जुषता० हृदयाय नमः॥ १॥ अबोध्यग्निरित्यस्य बुधोङ्गिरा ऋषी त्रिष्टुप्छन्दः अग्निदेवता शिरोन्यासे विनियोगः। ॐ अबोध्यग्निः स० शिरसे स्वाहा॥ २॥ मूर्द्धानमित्यस्य भरद्वाजऋषिस्त्रिष्टुप्छन्दः वैश्वानरोऽग्निर्देवता शिखान्यासे विनियोगः। ॐ मूर्द्धानन्दिवो० शिखायै वषट्॥ ३॥ मर्माणित इत्यस्य विवस्वान् ऋषिः त्रिष्टुप्छन्दः, लिङ्गोक्ता देवता, कवचन्यासे विनियोगः। ॐ मर्माणिते वर्म्मणा० कवचाय हुम्॥ ४॥ विश्वतश्चक्षुरित्यस्य विश्वकर्माभौवनऋषिस्त्रिष्टुप्छन्दः विश्वकर्मादेवता नेत्रन्यासे विनियोगः। ॐ विश्वतश्चक्षुरुत० नेत्रत्रयाय वौषट्॥ ५॥ मानस्तोक इत्यस्य कुत्स ऋषिर्जगती छन्दः। एको रुद्रो देवता। अस्त्रन्यासे विनियोगः। ॐ मानस्तोके तनये० अस्त्राय फट्॥ ६॥ इति लघुषडङ्गन्यासः प्रथमः॥ १॥

पञ्चाङ्ग रुद्रों का न्यास—'मनोजूति' इस मन्त्र के अङ्गिरस बृहस्पति ऋषि, यजुः छन्द, विश्वेदेवा देवता, हृदयन्यास में विनियोग है। ऐसा कहकर विनियोग मन्त्र पढ़े। फिर इसी भाँति मूल में निर्दिष्ट कुल छः मन्त्रों से विनियोगपूर्वक क्रमशः हृदय, शिर, शिखान्यास, कवचाय हुम्, नेत्रत्रयाय वौषट् तथा अस्त्राय फट्—इन छः अङ्गों में न्यास करना चाहिये। यह लघु षडङ्गन्यास प्रथम प्रकार का न्यास होता है।

मन्त्रन्यासः

यातेरुद्र इति परमेष्ठी ऋषिः अनुष्टुप्छन्दः। एको रुद्रो देवता। शिखान्यासे विनियोगः। ॐ यातेरुद्रशिवातनूरघोरा० शिखायाम्॥ १॥ अस्मिन्महत्यर्णवे इत्यस्य परमेष्ठी ऋषिः। अनुष्टुप्छन्दः। बहुरुद्रो देवता। शिरोन्यासे विनियोगः। ॐ अस्मिन्महत्यर्णवे० शिरसि॥ २॥ असङ्ख्यातेति परमेष्ठी ऋषिः। अनुष्टुप्छन्दः। बहवो रुद्रा देवताः। ललाटन्यासे विनियोगः। ॐ असङ्ख्याता० ललाटे॥ ३॥ त्र्यम्बकमित्यनयोः क्रमेण वसिष्ठप्रजापती०। अनुष्टुप्त्र्यम्बको०। नेत्रन्यासे०। ॐ त्र्यम्बकं यजा० नेत्रयोः॥ ४॥ मानस्तोक इति कुत्स ऋषिः। जगती छन्दः। एको रुद्रो देवता। नासिकान्यासे०। ॐ मानस्तोके० नासिकायाम्॥ ५॥ अवतत्येत्यस्य परमेष्ठी ऋषिः। अनुष्टुप् छन्दः। एको रुद्रो देवता। मुखन्यासे विनियोगः। ॐ अवतत्यधनु० मुखे॥ ६॥ नीलग्रीवा इति द्वयोः परमेष्ठी ऋषिः। अनुष्टुप् छन्दः। बहवो रुद्रा देवताः। कण्ठन्यासे विनियोगः। ॐ नीलग्रीवाः शि० कण्ठे॥ ७॥ नमस्त आयुधायेत्यस्य परमेष्ठी० अनुष्टुप्० एको रुद्रो०। प्रकोष्ठन्यासे०। ॐ नमस्तऽआयु० प्रकोष्ठे॥ ८॥ (मणिबन्धादूर्ध्वं कूर्पराधोभागः प्रकोष्ठः)। येतीर्थानीति परमेष्ठी०। अनुष्टुप्० बहवो रुद्रा० न्यासे०। ॐ येतीर्थानि०। हस्तयोः॥ ९॥ नमो वः किरिकेभ्यः इति परमेष्ठी०। सामोष्णिग्यजुरुष्णिगतिच्छन्दांसि बहुरुद्रा०। हृदयन्यासे विनियोगः। ॐ नमोवः किरिकेभ्य० हृदये॥ १०॥ नमोहिरण्यबाहव इति परमेष्ठी ऋषिः। अत्रैकादशाक्षराणां यजुस्त्रिष्टुप्छन्दः। अष्टाक्षराणां यजुरनुष्टुप्०। दशाक्षरस्य यजुः पङ्क्तिः हिरण्यबाहुसादयो मन्त्रवर्णावगता उभयतो नमस्कारा बहवो रुद्रा० नाभिन्यासे विनियोगः। ॐ नमो हिरण्यबाहवे० पुष्टानां पतये नमः। नाभौ॥ ११॥ इमारुद्रायेति कुत्स०। जगती०। एको रुद्रो दे०। गुह्यन्यासे०। ॐ इमारुद्राय० गुह्ये॥ १२॥ मानोमहांतमितिकुत्स०। जगती० एको रुद्रो०। ऊरुन्यासे०। ॐ मानोमहांत०। ऊर्वोः॥ १३॥ एषत इत्यस्य प्रजापति०। सामपङ्क्तिर्यजुर्जगतीछन्दः। रुद्रो०। ऊरुन्यासे० ॐ एषते रुद्रभाग० जानुनोः॥ १४॥ अवरुद्रमित्यस्य प्रजापति०। पङ्क्ति०। रुद्रो०। जङ्घान्यासे०। ॐ अवरुद्र० जङ्घयोः॥ १५॥ [जानुगुल्फयोरन्तरालं जङ्घा] अध्यवोचदित्यस्य परमेष्ठी०। पङ्क्तिच्छन्दः। एको रुद्रो०। कवचन्यासे०। ॐ अध्यवोचद०। कवचमुद्रया

कवचम्॥ १६॥ नमोबिल्मिन इत्यस्य परमेष्ठी० षडक्षराणां यजुर्गायत्री०। पञ्चाक्षरयोर्दैवीपङ्क्तिः। सप्ताक्षरस्य यजुरुष्णिग्बिल्मिनादयो मन्त्रवर्णा विगताः। अन्यतरतो नमस्कारा बहवो रुद्रा देवता उपकवचन्यासे० ॐ नमो बिल्मिने०। हनन्यायच [कवचाद्विपरीतमुपकवचम्। कवचोपरि तथैवेत्युपकवचमित्यन्ये]॥ १७॥ नमोस्तु नीलग्रीवायेत्यस्य परमेष्ठी० अनुष्टुप्०। एको रुद्रो०। तृतीयनेत्रन्यासे०। ॐ नमोस्तु नीलग्री० [मुष्टितो विमुक्तया मध्यमया तृतीयनेत्रे]॥ १८॥ प्रमुञ्चेत्यस्य परमेष्ठी०। अनुष्टुप्०। एको रुद्रो दे०। अस्त्रन्यासे०। ॐ प्रमुञ्चध्व०। अस्त्रम्॥ १९॥ यएतावन्तश्चेत्यस्य परमेष्ठी०। अनुष्टुप्०। बहवो रुद्रा०। दिग्बन्धने०। ॐ यएतावन्तश्च० दिक्षु विदिक्षु च परस्परतर्जन्यङ्गुष्ठाग्रस्फोटनेन दिग्बन्धः॥ २०॥ इति शिखाद्यस्त्रान्तो दिग्बन्धसहित एकोनविंशतिविधो द्वितीयो न्यासः॥ २॥

रुद्राध्याय के मन्त्रों का न्यास—'याते रुद्र०' इत्यादि प्रथम मन्त्र के परमेष्ठी ऋषि, अनुष्टुप् छन्द, एकरुद्र देवता, शिखान्यास में विनियोग है। फिर पूरा मन्त्र पढ़कर शिखा में न्यास करे। 'अस्मिन् महत्यर्णवे०' मन्त्र के परमेष्ठी ऋषि, अनुष्टुप् छन्द, बहुरुद्र देवता शिरोन्यास में विनियोग है। मन्त्र से शिरोन्यास करे। 'ॐ असङ्ख्याता रुद्रा०' इस मन्त्र के परमेष्ठी ऋषि, अनुष्टुप् छन्द, बहवो रुद्रा देवता है। इसका ललाटन्यास में विनियोग करे तथा न्यास करे। 'ॐ त्र्यम्बकं यजामहे०' इत्यादि दोनों मन्त्रों के क्रमशः वसिष्ठ तथा प्रजापति ऋषि हैं। दोनों में अनुष्टुप् छन्द है तथा दोनों के त्र्यम्बक देवता हैं। दोनों मन्त्रों से नेत्रों में न्यास करे। 'मानस्तोकेतनये०' इत्यादि मन्त्र के कुत्स ऋषि, जगती छन्द, एकरुद्र देवता एवं नासिका न्यास में विनियोग है। नासिका में न्यास करे। 'अवतत्य धनुष्ट ँ सहस्राक्ष शतेषुधे०' इत्यादि मन्त्र के परमेष्ठी ऋषि, अनुष्टुप् छन्द, एकरुद्र देवता है, मुखन्यास में विनियोग करे। 'ॐ नीलग्रीवा शितिकण्ठा०' इत्यादि दोनों के परमेष्ठी ऋषि, अनुष्टुप् छन्द, बहवो रुद्र देवता एवं कण्ठन्यास में विनियोग है। 'ॐ नमस्त आयुधायानातताय०' इत्यादि के परमेष्ठी ऋषि, अनुष्टुप् छन्द, एकरुद्र देवता, प्रकोष्ठन्यास में विनियोग करे (कलाई से कोहनी तक का हाथ का अङ्ग प्रकोष्ठ कहलाता है)। 'येतीर्थानि०' मन्त्र के परमेष्ठी ऋषि, अनुष्टुप् छन्द बहवोरुद्र देवता हैं। इसका हस्त (हथेलियों) के न्यास में विनियोग है। फिर मूल में देखकर क्रमशः हृदय, नाभि, गुह्य, दोनों ऊरु (घुटनों से ऊपर टाँग), जानु, जङ्घा (पिण्डली), कवच, तृतीय नेत्र, अस्त्र, दिग्बन्धन—इस प्रकार से इक्कीस प्रकार के न्यास विनियोगपूर्वक करना चाहिये। ये शिखा से अस्त्रपर्यन्त दिग्बन्ध सहित इक्कीस न्यास द्वितीय न्यास कहलाते हैं।

दशाक्षरमन्त्रन्यासः

दशाक्षरमन्त्रस्य प्रजापति०। विराट्०। रुद्रो०। न्यासे० ॐ नमो मूर्द्धनि। ॐ नं नमः शिखायाम्। ॐ मों नमो ललाटे। ॐ भं नमो मुखे०। ॐ गं नमः कण्ठे। ॐ वं नमः हृदये। ॐ तें नमः दक्षिणहस्ते। ॐ रुं नमः वामहस्ते। ॐ द्रां नमः नाभौ। ॐ यं नमः पादयोः॥ १०॥ इति दशाक्षरीमन्त्रन्यासस्तृतीयः॥ ३॥

दशाक्षर मन्त्रन्यास—'अस्य दशाक्षरमन्त्रस्य प्रजापति ऋषिः विराट् छन्दः, रुद्रो देवता, न्यासे विनियोगः' यह कहकर न्यास का जल छोड़े तथा 'ॐ नमो भगवते रुद्राय' मन्त्र के दश अक्षरों में 'नमः' जोड़कर क्रमशः शिर, शिखा, ललाट (माथा), मुख, कण्ठ, हृदय, दक्षिण हस्त, वामहस्त, नाभि तथा दोनों पैरों—इन दश अङ्गों में (मूल में लिखित के अनुसार) न्यास करे। यह तृतीय प्रकार का न्यास है।

सम्पुटन्यासः

अथ सम्पुटाख्यो न्यासः; स च मुद्रिताञ्जलिना प्राच्यादिदिक्षु वक्ष्यमाणमन्त्रैः कार्यः। तद्यथा—त्रातारमित्यस्य गर्ग ऋषिः। त्रिष्टुप् छन्दः। इन्द्रो देवता। सम्पुटीकरणे विनियोगः। ॐ त्रातारमिन्द्र० ॐ इन्द्राय नमः। इति प्राच्याम्॥ १॥

त्वन्नोऽअग्र इत्यस्य हिरण्यस्तूप आङ्गिरस० त्रिष्टुप् छन्दः। अग्निर्देवता सम्पुटीकरणे०। ॐ त्वन्नोऽअग्ने० ॐ अग्नये नमः। इत्याग्नेय्याम्॥ २॥ सुगन्नुः पन्था० मित्यस्य प्रजापति० त्रिष्टुप्०। यमो देवता। सम्पुटी०। ॐ सुगन्नुःपन्थां ॐ यमाय०। इति दक्षिणस्याम्॥ ३॥ असुन्वन्तमित्यस्य प्रजापति० त्रिष्टुप्० निर्ऋतिः सं०। ॐ असुन्वन्तम० ॐ निर्ऋतये नमः। इति नैर्ऋत्याम्॥ ४॥ तत्त्वायामीत्यस्य शुनःशेप० त्रिष्टुप्०। वरुणो०। सं०। ॐ तत्त्वायामि० ॐ वरुणाय नमः। इति प्रतीच्याम्॥ ५॥ आनोनियुद्भिरित्यस्य वसिष्ठ० त्रिष्टुप्०। वायुः०। सं०। ॐ आनोनियुद्भि० ॐ वायवे नमः। इति वायव्याम्॥ ६॥ वयठं०सोमेत्यस्य बन्धु०। गायत्री०। सोमो०। सं०। ॐ वयठं०सोम० ॐ सोमाय नमः। इत्युदीच्याम्॥ ७॥ तमीशानमित्यस्य गौतम०। जगती०। ईशानो०। सं०। ॐ तमीशान० ॐ ईशानाय०। इतीशान्याम्॥ ८॥ अस्मेरुद्रा इत्यस्य प्रगर्थ०। त्रिष्टुप्०। ब्रह्मा०। सं०। ॐ अस्मे रुद्रा० ॐ रुद्राय नमः। इत्यूर्ध्वम्॥ ९॥ स्योनापृथिवीत्यस्य मेधातिथि०। गायत्री छन्दः। अनन्तो देवता सम्पुटीकरणे विनियोगः। ॐ स्योनापृथिवी० ॐ अनन्ताय नमः इत्यधः॥ १०॥ एवं दिक्षु विदिक्षु च इन्द्रादीन् प्रणमेत्। इति सम्पुटाख्यश्चतुर्थो न्यासः॥ ४॥

सम्पुटन्यास—'त्रातारमिन्द्र' इत्यादि मन्त्र का सम्पुटन्यास में विनियोग (मूलानुसार) करके बन्द अञ्जलि क्रमशः १. पूर्व, २. आग्नेय, ३. दक्षिण, ४. नैर्ऋत्य, ५. पश्चिम, ६. वायव्य, ७. उत्तर, ८. ईशान, ९. ऊर्ध्व (ईशान तथा पूर्व के बीच) तथा १०. अधः (नैर्ऋत्य एवं पश्चिम के बीच) में न्यास कर दिशा-विदिशा में इन्द्रादि को प्रणाम करे। यह सम्पुट नामक चौथा न्यास होता है।

बृहत्षडङ्गन्यासः

अथ बृहत्षडङ्गन्यासः—यज्जाग्रत इति षड्ऋचस्य शिवसङ्कल्प ऋषिः। त्रिष्टुप् छन्दः। मनो देवता। हृदयन्यासे विनियोगः॥ ॐ यज्जाग्रतो०॥ १॥ येन कर्माण्य०॥ २॥ यत्प्रज्ञान०॥ ३॥ येनेदं भूतं०॥ ४॥ यस्मिन्नृच०॥ ५॥ सुषारथि०॥ ६॥ इति हृदयाय नमः॥ १॥ (मुष्टिविनिर्गताङ्गुष्ठौ संयुतौ कृत्वा हृदये न्यसेत्।) सहस्रशीर्षेति षोडशर्चस्य पुरुषसूक्तस्य नारायण ऋषिः आद्यानां पञ्चदशानामनुष्टुप् छन्दः। यज्ञेनयज्ञमित्यस्य त्रिष्टुप्०। जगद्बीजम्। पुरुषो देवता। शिरोन्यासे विनियोगः। ॐ सहस्रशीर्षा०॥ १६॥ शिरसे स्वाहा (इति मुष्टिनिर्गताङ्गुष्ठौ संयुक्तौ न्यस्ततर्जनीकौ कृत्वा शिरसि न्यसेत्)॥ २॥ अद्भ्यः सम्भृत इति षड्ऋचस्योत्तरनारायणस्य नारायणपुरुष ऋषिः। आद्यानां तिसृणां त्रिष्टुप् छन्दः। चतुर्थपञ्चमयोरनुष्टुप्०। षष्ठस्य त्रिष्टुप् छन्दः। आदित्यो देवता। शिखान्यासे विनियोगः। ॐ अद्भ्यः संभृत० ६ शिखायै वषट् (इति मुष्टिपुटौ करौ कृत्वाङ्गुष्ठावधःप्रसक्ताग्रे कनिष्ठे चोर्ध्वतः कृत्वा शिखायां न्यसेत्)॥ ३॥ आशुःशिशान इति सप्तदशानामप्रतिरथ ऋषिः। त्रिष्टुप् छन्दः। इन्द्रो देवता। कवचन्यासे विनियोगः। ॐ आशुःशिशानो०॥ १७॥ कवचाय हुम् (इत्यङ्गुष्ठौ प्रसक्ततर्जन्यौ च त्रिकोणवत् कृत्वा मूर्द्धनि पश्चान्मुखं कृत्वोभयपार्श्वतः करौ हृदयान्तं नयन् हृदये न्यसेत्)॥ ४॥ बिभ्राडिति सप्तदशानां बिभ्राड् ऋषिः। जगती छन्दः। सूर्यो देवता। नेत्रन्यासे विनियोगः॥ ॐ बिभ्राड् बृहत्पिबतु०॥ १७॥ नेत्रत्रयाय वौषट् (इति नेत्रोन्मुखं हस्तं कृत्वा प्रसक्ताङ्गुष्ठकनिष्ठिकां च कृत्वा मध्यमां किञ्चित्प्रसार्य इतराङ्गुलीर्नयन् नेत्रेषु न्यसेत्)॥ ५॥ नमस्ते इत्यादिषोडशर्चस्य परमेष्ठी ऋषिः। नमस्त इत्यस्य गायत्री यात इति तिसृणामनुष्टुप्०। अध्यवोचदिति त्रयाणां पङ्क्ति०। नमोस्त्विवतिसप्तानामनुष्टुप्०। मान इति द्वयोः कुत्स ऋषिः। जगती छन्दः। सर्वासामेको रुद्रो देवता। अस्त्रन्यासे विनियोगः। ॐ नमति रुद्र० हवामहे॥ १६॥ इत्यस्त्राय फट् (इति किञ्चित्तर्जनीं प्रसार्य मध्यमाङ्गुष्ठयोगेन अस्त्राय फडित्यस्त्रम्)॥ ५॥ इति बृहत्षडङ्गन्यासः पञ्चमः॥ ५॥ ततः ॐ एषते रुद्रभाग० इति मन्त्रेण योनिमुद्राप्रदर्शनम्। एवं पञ्चाङ्गन्यासान् विधाय रुद्ररूपमात्मानं ध्यायेत्।

बृहत्षडङ्ग न्यास—मूल में लिखे अनुसार 'यज्जाग्रतो दूर०' इन छः मन्त्रों से मुट्ठी के बाहर अङ्गूठा बाँधकर हृदयन्यास करे। फिर अङ्गूठे को मुट्ठी से अलग कर तर्जनी ऊपर करके 'सहस्रशीर्षा०' मन्त्रों से शिरसे स्वाहा न्यास

करे। फिर मुट्ठी में कनिष्ठा को ऊपर कर 'अद्भ्यः सम्भृतः' इन छः ऋचाओं से शिखा न्यास करे। फिर अङ्गूठे से तर्जनी लगाकर त्रिकोण का आकार बनाकर 'आशुःशिशानो०' इत्यादि सत्रह ऋचाओं से 'कवचाय हुम्' करे। फिर विभ्राड् से नेत्रों की ओर हाथ करके अङ्गूठा तथा कनिष्ठा मिलाकर मध्यमा को थोड़ा-सा फैलाकर शेष अङ्गुलियों से नेत्रों में न्यास करे। फिर तर्जनी को कुछ फैलाकर मध्यमा तथा अङ्गूठे के योग से अस्त्राय फट् न्यास मूलोक्त नमस्ते रुद्रमन्यव इत्यादि १६ मन्त्रों से करे। यह बृहत्षडङ्ग न्यास नामक पाँचवाँ न्यास है। फिर 'ॐ एषते रुद्र भाग' इस मन्त्र को पढ़कर योनिमुद्रा का प्रदर्शन करे तथा पाँचों प्रकार के न्यासों के उपरान्त 'मैं स्वयं रुद्ररूप हूँ' इस प्रकार का ध्यान (आगे लिखे मन्त्रों से) करे।

अथ ध्यानम्—

अथात्मानं रुद्ररूपं ध्यायेत्पञ्चमुखं शिवम्। प्रतिवक्त्रं त्रिनेत्रं च दशहस्तं दशायुधम्॥ १॥
कमण्डलुं साक्षसूत्रं बाणशूलधरं हरम्। दण्डं डमरुखट्वाङ्गाभयपात्रं पिनाकिनम्॥ २॥
अष्टसिद्धियुतं सौम्यं सर्वाभरणभूषितम्। नीलग्रीवं शशाङ्कार्द्धशेखरं स्मितसुन्दरम्॥ ३॥
शुद्धस्फटिकसङ्काशं नागयज्ञोपवीतिनम्। गजचर्मपरीधानं व्याघ्रचर्मोत्तरीयकम्॥ ४॥
वृषस्कन्धसमारूढमुमादेहार्द्धधारिणम्। दुर्दन्तं कपिलजटं शिखामुद्योतकारिणम्॥ ५॥
अमृतेनाप्लुतं हृष्टं दिव्यभोगसमाकुलम्। दैवतैश्च समायुक्तं सुरासुरनमस्कृतम्॥ ६॥
शाश्वतं सच्चिदानन्दं ध्रुवमक्षरमव्ययम्। अजातममृतं नित्यं सर्वव्यापिनमीश्वरम्॥ ७॥
एवं रुद्रतनुं सर्वे यक्षराक्षसपन्नगाः। डाकिनीशाकिनीभूतपिशाचा जृम्भका ग्रहाः॥ ८॥
ज्वलन्तं ते प्रपश्यन्ति प्रलयानलसन्निभम्। एवं ध्यात्वा द्विजः सम्यक् ततो यजनमारभेत्॥ ९॥

स्वयंभूत रुद्र का ध्यान इस प्रकार करना चाहिये—स्वयं का स्वरूप पञ्चमुख शिव का है, ऐसा ध्यान करे। प्रत्येक मुख में तीन नेत्र हैं, दश हाथ तथा दश आयुध हैं। कमण्डलु, अक्षसूत्र, बाण, शूल, दण्ड, डमरू, खट्वाङ्ग, अभयपात्र तथा धनुष को शिव जी धारण किये हैं। वे आठ सिद्धियों से युक्त, सौम्य, सर्वाभरण-भूषित, नीलकण्ठ, अर्धचन्द्रधारी, स्मित मुख वाले सुन्दर हैं। वे शुद्धस्फटिक के समान शरीर वाले, सर्प के यज्ञोपवीत को धारण किये हुए, हाथी के चर्म का परिधान पहिने तथा व्याघ्रचर्म का उत्तरीय धारण किये हैं। वे वृषभ की पीठ पर (कन्धे पर) बैठे हुए अर्धनारी नटेश्वर देह वाले हैं। दुर्दन्त, कपिल जटाओं वाले तथा शिखा से प्रकाशित हैं। जो अमृत से आप्लुत, हृष्ट, दिव्य भोगों से युक्त, देवताओं से युक्त तथा सुरों एवं असुरों के द्वारा नमस्कृत हैं; जो शाश्वत, सच्चिदानन्द, ध्रुव, अक्षर, अव्यय, अजन्मा, अमर, नित्य तथा सर्वव्यापी ईश्वर है; इसी प्रकार सभी यक्ष, राक्षस, नाग, डाकिनी, शाकिनी, भूत, पिशाच, जृम्भकग्रह इत्यादि जो प्राणी हैं, वे रुद्र के रूप को प्रलयाग्नि के समान जलता हुआ देखते हैं। इस प्रकार से द्विज को रुद्ररूप का ध्यान करके सम्यक् रूप से यजन आरम्भ करना चाहिये॥ १-९॥

विमर्श—मूल में ध्यान के लिये जो आठवाँ श्लोक है, उसके शब्दों के अर्थों को यहाँ स्पष्ट किया जा रहा है—

यक्ष—एक ऐसी जाति का मनुष्य या गुणों से युक्त मनुष्य, जो दूसरों से येन-केन प्रकारेण धन प्राप्त करता है और उससे खुद भोग-विलास करता है तथा उसी में से कुछ अंश निर्धनों को एवं याचकों को दान भी कर देता है। प्राचीन काल में यह जाति हिमालय में निवास करती थी। इस जाति का प्रमुख पशु भी 'यक्षपशु' कहलाता था। उस गाय-जैसे प्राणी को आजकल 'याक' कहते हैं।

राक्षस—दादागिरी तथा जोर-जबरदस्ती से जनता से कर के रूप में (रङ्गदारी टैक्स) वसूलने वाली जाति राक्षस कहलाती थी। आजकल के 'दबङ्ग' तथा 'दादा' कहे जाने वाले लोग, नक्सली तथा आतङ्कवादी सभी राक्षस ही हैं।

पन्नग—नाग जाति के लोग, जो कि प्राकृतिक गुफाओं में रहते थे तथा बिना आग पर पका भोजन करते थे। इराक के कुर्द कबीले के लोग, रूस में सर्बिया के सर्ब (सर्प) तथा भारत में पूर्वी राज्य नागाप्रदेश के लोग प्राचीन नाग जाति के ही वंशज हैं। पन्नग तथा नाग का अर्थ साँप भी होता है।

डाकिनी—दुर्गा की एक सेविका का नाम है। भयंकर शब्द करने वाली महिला योद्धाओं को डाकिनी कहा जाता था। आजकल का डाइन शब्द भी इसी डाकिनी शब्द का अपभ्रंश है। ब्रह्मपुराण के अनुसार देवी की सेना में साढ़े तीन करोड़ डाकिनी थीं। नरभक्षी 'डायनासोर' जैसे विशाल प्राणियों को भी डाकिनी कहा जाता था। जिनका शब्द भी भयंकर होता था; जिन्हें आज कल वैज्ञानिकों ने Hominivorous नाम दिया है। अंग्रेजी Dinosauros शब्द संस्कृत के 'डाकिनी सरट' का लैटिन भाषा में रूपान्तरमात्र है। पुंल्लिङ्ग डाकिनः (डाकिनस्) शब्द से ग्रीक शब्द Deinos बना है, जिसका अर्थ डरावना होता है।

शाकिनी—शाकिनी भी देवी की सहचारी मानी गयी है। शाकिनी का दूसरा अर्थ 'शाकोत्पादक भूमि' भी होता है। सदाशिव की शक्ति भी शाकिनी है। तन्त्रसार के अनुसार षोडश स्वर-संयुक्त विशुद्ध महाचक्र में शाकिनी-सहित शिव का न्यास किया जाता है। युद्ध में पराक्रम दिखाने वाली तथा केवल शाकाहार पर जीवित रहने वाली स्त्रियाँ भी शाकिनी कही जाती थीं। प्राचीनकाल शाकाहारी सरट (Herbivorous saurus) जैसे Apatosaurus (Brontosaurus) तथा Brachiosaurus आदि को भी संस्कृत वाङ्मय में शाकिनी तथा शाकिनः (शाकिनस्) कहा गया था। विविध प्रकार के Bacteria भी इन शब्दों से बोधित होते हैं।

भूत—इसका अर्थ अशरीरी आत्मा, प्रेत, कीटाणु, छाया, प्रकाश आदि होता है। फारसी का फौत (मरा हुआ) तथा अंग्रेजी का Photo और ग्रीक भाषा के Phot एवं Phos शब्द भूत शब्द के ही अपभ्रंश हैं।

पिशाच—पिशित (कच्चा मांस या मछली) खाने वाले को पिशाच कहते हैं। प्राचीन काल में इस जाति (कबीलों) के लोग कच्चा मांस ही खा जाते थे तथा प्राणियों का रक्त भी पीते थे। जो केवल मछली तथा मांस के कच्चे आहार पर जीवित रहता है वह शब्दार्थ में पिशाच होता है। ये अदृश्य आत्मा की भाँति तथा रोगकारक कीटाणुओं के रूप में भी होते हैं।

जृम्भक—जृम्भक का अर्थ 'जम्भाई लेने वाला' होता है। जो आलसी जीव या मनुष्य खा-पीकर पड़े-पड़े जम्भाई लेता है, वह जृम्भक कहलाता है। रुद्र के एक गण का नाम भी जृम्भक है। एक बार श्वास लेकर फिर जोर के साथ प्रश्वास छोड़ने को जृम्भा कहते हैं। अजगर तथा प्राचीन डायनासोर भी जृम्भक होते थे। जम्भाई के साथ निकलने वाले रोगकारक कीटाणु भी जृम्भक हैं। वैद्यक ग्रन्थों में जृम्भा का लक्षण इस प्रकार है—

पीत्वैकं श्वासमनिलः पुनस्त्यजति वेगवान्। आलस्यनिद्रायुक्तस्य स जृम्भ इति उच्यते॥

एवं श्रीरुद्रं ध्यात्वा मानसोपचारैः सम्पूज्य यथाशक्ति 'ॐ नमो भगवते रुद्राय' इति मूलमन्त्रं जपेत्। यदि तु भेदेनोपासीत तदानीन्तनीं पूजां पात्रासादनं शैवपीठपूजापूर्वकं पद्धतिकाण्डोक्तविधिना मण्डलमध्ये स्वर्णमय्यां रुद्रप्रतिमायां लिङ्गे वा वेदोक्तमन्त्रैः पुष्पान्तां पूजां कृत्वा पूर्वोक्तरुद्रयन्त्रोक्तावरणदेवताः सम्पूज्य धूपदीपनैवेद्यादि-नीराजनान्तैरुपचारैरर्चनं विधाय रुद्रस्तवेन स्तुत्वा वेदमन्त्रैर्देवमूर्द्धनि पुष्पाञ्जलिं दत्त्वा प्रदक्षिणात्रयं कृत्वा 'ॐ नमस्तेऽस्तु

भगवन् विश्वेश्वराय महादेवाय त्र्यम्बकाय त्रिपुरान्तकाय त्रिकाग्निकालाय कालाग्निरुद्राय नीलकण्ठाय सर्वेश्वराय श्रीमहादेवाय नमः' इति नत्वा।

नमः सर्वहितार्थाय जगदाधारहेतवे। साष्टाङ्गोऽयं प्रणामस्ते दीनत्वेन मया कृतः॥

इति साष्टाङ्गं प्रणम्य विविधैः स्तोत्रैः स्तुत्वा पूजां निवेदयेत्। ततस्तन्मना रुद्रं ध्यायन् जपं कुर्यात्।

मूल मन्त्र का जप—इस प्रकार ध्यान करने के उपरान्त रुद्र का मानसिक उपचार से पूजन कर यथाशक्ति 'ॐ नमो भगवते रुद्राय' इस मन्त्र का जप करे। यदि भेदोपासना करनी हो तो पद्धतिकाण्ड में वर्णित विधि के अनुसार उसकी पूजा, पात्रासादन, शैवपीठ की पूजा आदि करनी चाहिये। मण्डल के मध्य में स्वर्णमयी रुद्रप्रतिमा या लिङ्ग में वेदोक्त मन्त्रों के द्वारा पूजा करके पूर्व में वर्णित 'रुद्रयन्त्र' के आवरणदेवताओं का पूजन कर धूप, दीप, नैवेद्य, नीराजन आदि उपचारों से पूजा करके रुद्रस्तव से स्तुति कर वेदमन्त्रों के द्वारा देवमूर्ति के शिर पर पुष्पाञ्जलि छोड़नी चाहिये। फिर तीन प्रदक्षिणा करके 'ॐ नमस्तेऽस्तु भगवन् विश्वेश्वराय, महादेवाय, त्र्यम्बकाय, त्रिपुरान्तकाय, त्रिकाग्निकालाय, कालाग्निरुद्राय नीलकण्ठाय सर्वेश्वराय श्रीमहादेवाय नमः' यह कहकर प्रणाम करना चाहिये। फिर 'नमः सर्वहितार्थाय जगदाधारहेतवे। साष्टाङ्गोऽयं प्रणामस्ते दीनत्वेन मया कृतः॥' इस मन्त्र से साष्टाङ्ग प्रणाम कर विविध स्तोत्रों से पूजा करके पूजा को निवेदित करके मन में रुद्र का ध्यान करके जप आरम्भ करना चाहिये।

रुद्रजपक्रमः

अथ जपक्रमः—ॐ नमस्तेरुद्रमन्यवऽउतोतऽइषवेनमः बाहुभ्यामुततेनमः॥१॥ यातेरुद्रशिवातनूरघोरापापकाशिनी। तयानस्तन्वाशन्तमयागिरिशन्ताभिचाकशीहि॥२॥ यामिषुङ्गिरिशन्तहस्तेबिभर्ष्यस्तवे। शिवाङ्गिरित्रतां कुरुमाहिंꣳसीःपुरुषञ्जगत्॥३॥ शिवेनवचसात्वागिरिशाच्छावदामसि। यथानःसर्वमिज्जगदयक्ष्मꣳसुमनाऽअसत्॥४॥ अध्यवोचदधिवक्ताप्रथमोदैव्योभिषक्। अहींश्चसर्वाञ्जम्भयन्त्सर्वाश्चयातुधान्योधराचीः परासुव॥५॥ असौयस्ताम्रोऽअरुणऽउतबभ्रुःसुमङ्गलः। येचैनꣳरुद्राऽअभितोदिक्षुश्रिताःसहस्रशोवैषाꣳहेडईमहे॥६॥ असौयोवसर्पतिनीलग्रीवोविलोहितः। उतैनङ्गोपाऽअदृश्रन्नदृश्रन्नुदहार्यः सदृष्टोमृडयातिनः॥७॥ नमोस्तु नीलग्रीवायसहस्राक्षायमीढुषे। अथोयेऽअस्यसत्त्वानोहन्तेभ्योकरन्नमः॥८॥ प्रमुञ्चधन्वनस्त्वमुभयोरार्त्न्योर्ज्याम्। याश्चतेहस्तऽइषवःपरातार्भगवोवप॥९॥ विज्यन्धनुःकपर्दिनोविशल्योबाणवाꣳऽउत। अनेशन्नस्ययाऽइषवऽआभुरस्यनिषङ्गधिः॥१०॥ यातेहेतिर्मीढुष्टमहस्तेबभूवतेधनुः। तयास्मान्विश्वतस्त्वमयक्ष्मयापरिभुज॥११॥ परितेधन्वनोहेतिरस्मान्वृणक्तुविश्वतः। अथोयऽइषुधिस्तवारेऽअस्मन्निधेहितम्॥१२॥ अवतत्यधनुष्ट्वꣳसहस्राक्षशतेषुधे। निशीर्यशल्यानाम्मुखाशिवोनः सुमनाभव॥१३॥ नमस्तऽआयुधायानातताय धृष्णवे। उभाभ्यामुततेनमोबाहुभ्यान्तवधन्वने॥१४॥ मानोमहान्तमुतमानोऽअर्भकम्मानऽउक्षन्तमुतमानऽउक्षितम्। मानोवधीःपितरम्मोतमातरम्मानः प्रियास्तन्वो रुद्ररीरिषः॥१५॥ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः। मानोवीरान्रुद्रभामिनो वधीर्हविष्मंतःसदमित्त्वा हवामहे॥१६॥ नमोहिरण्यबाहवेसेनान्येदिशाञ्चपतयेनमोनमोवृक्षेभ्योहरिकेशेभ्यःपशूनाम्पतयेनमोनमःशष्पिञ्जरायत्त्विषीमतेपथीनाम्पतयेनमोनमोहरिकेशायोपवीतिनेपुष्टानाम्पतयेनमोनमोबभ्लुशाय॥१७॥ नमोबभ्लुशायव्याधिनेन्नानाम्पतयेनमोनमोभवस्यहेत्यैजगताम्पतयेनमोनमोरुद्रायाततायिनेक्षेत्राणाम्पतयेनमोनमः सूतायाहन्त्यैवनानाम्पतये नमोनमो रोहिताय॥१८॥ नमोरोहिताय। स्थपतयेवृक्षाणाम्पतयेनमोनमोभुवन्तयेवारिवस्कृतायौषधीनाम्पतयेनमोनमोमन्त्रिणेवाणिजायकक्षाणाम्पतयेनमोनमऽउच्चैर्घोषायाक्रन्दयतेपत्तीनापतयेनमोनमः

कृत्स्नायतया॥१९॥ नमः कृत्स्नायतया। धावते सत्वनाम्पतये नमो नमः सहमानाय निव्व्याधिन ऽआव्व्याधिनीनाम्पतये नमो नमो निषङ्गिणे ककुभाय स्तेनानाम्पतये नमो नमो निचेरवे परिचरायारण्यानाम्पतये नमो नमो वञ्चते॥२०॥ नमो वञ्चते। परिवञ्चते स्तायूनाम्पतये नमो नमो निषङ्गिण ऽइषुधिमते तस्कराणाम्पतये नमो नमः सृकायिभ्यो जिघांᳰसद्भ्यो मुष्णताम्पतये नमो नमोऽसिमद्भ्यो नक्तञ्चरद्भ्यो व्विकृन्तानाम्पतये नमः॥२१॥ नम ऽउष्णीषिणे। गिरिचराय कुलुञ्चानाम्पतये नमो नम ऽइषुमद्भ्यो धन्वायिभ्यश्च वो नमो नम ऽआतन्वानेभ्यः प्प्रतिदधानेभ्यश्च वो नमो नम ऽआयच्छद्भ्योऽस्यद्भ्यश्च वो नमो नमो व्विसृजद्भ्यः॥२२॥ नमो व्विसृजद्भ्यो विद्ध्यद्भ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमः शयानेभ्य ऽआसीनेभ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो नमः सभाभ्यः॥२३॥ नमः सभाभ्यः। सभापतिभ्यश्च वो नमो नमोऽश्वेभ्योऽश्वपतिभ्यश्च वो नमो नम ऽआव्व्याधिनीभ्यो व्विविद्ध्यन्तीभ्यश्च वो नमो नम ऽउगणाभ्यस्तृंᳰहतीभ्यश्च वो नमो नमो गणेभ्यः॥२४॥ नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्व्रातेभ्यो व्व्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो व्विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो नमः सेनाभ्यः॥२५॥ नमः सेनाभ्यः। सेनानिभ्यश्च वो नमो नमो रथिभ्यो ऽअरथेभ्यश्च वो नमो नमः क्षत्तृभ्यः संग्रहीतृभ्यश्च वो नमो नमो महद्भ्यो ऽअर्भकेभ्यश्च वो नमः॥२६॥ नमस्तक्षभ्यः। नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेः कम्मरिभ्यश्च वो नमो नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमो नमः श्वनिभ्यो मृगयुभ्यश्च वो नमो नमः श्वभ्यः॥२७॥ नमः श्वभ्यः। श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च नमः। शर्व्वाय च पशुपतये च नमो नीलग्ग्रीवाय च शितिकण्ठाय च नमः कपर्द्दिने॥२८॥ नमः कपर्द्दिने च व्व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च नमो गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च नमो ह्रस्वाय॥२९॥ नमो ह्रस्वाय च व्वामनाय च नमो बृहते च व्वर्षीयसे च नमो व्वृद्धाय च सवृधे च नमोऽग्र्याय च प्प्रथमाय च नम ऽआशवे॥३०॥ नम ऽआशवे। चाजिराय च नमः शीघ्र्याय च शीभ्याय च नम ऽऊर्म्म्याय चावस्वन्याय च नमो नादेयाय च द्वीप्प्याय च॥३१॥ नमो ज्ज्येष्ठाय च कनिष्ठाय च नमः पूर्व्वजाय चापरजाय च नमो मद्ध्यमाय चापगल्भाय च नमो जघन्याय च बुध्न्याय च नमः सोभ्याय॥३२॥ नमः सोभ्याय च प्प्रतिसर्य्याय च नमो याम्याय च क्षेम्म्याय च नमः श्लोक्याय चावसान्याय च नम ऽउर्व्वर्य्याय च खल्ल्याय च नमो वन्याय॥३३॥ नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्प्रतिश्रवाय च नम ऽआशुषेणाय चाशुरथाय च नमः शूराय चावभेदिने च नमो बिल्मिने॥३४॥ नमो बिल्मिने। च कवचिने च नमो व्वर्म्मिणे च व्वरूथिने च नमः श्रुताय च श्रुतसेनाय च नमो दुन्दुभ्याय चाहनन्याय च नमो धृष्णवे॥३५॥ नमो धृष्णवे। च प्प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च॥३६॥ नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्प्याय च नमः कुल्याय च सरस्याय च नमो नादेयाय च व्वैशन्ताय च नमः कूप्याय॥३७॥ नमः कूप्याय चावट्याय च नमो व्वीद्ध्र्याय चातप्प्याय च नमो मेग्घ्याय च व्विद्युत्याय च नमो व्वर्ष्याय चावर्ष्याय च नमो व्वात्याय॥३८॥ नमो व्वात्याय। च रेष्म्याय च नमो व्वास्तव्याय च व्वास्तुपाय च नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च नमः शङ्गवे॥३९॥ नमः शङ्गवे। च पशुपतये च नम ऽउग्राय च भीमाय च नमोऽग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो व्वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय॥४०॥ नमः शम्भवाय। च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च॥४१॥ नमः पार्य्याय। चावार्य्याय च नमः प्प्रतरणाय चोत्तरणाय च नमस्तीर्त्थ्याय च कूल्याय च नमः शष्प्याय च फेन्याय च नमः सिकत्याय॥४२॥ नमः सिकत्याय च प्प्रवाह्याय च नमः किंᳰशिलाय च क्षयणाय च नमः कपर्द्दिने च पुलस्तये च नम ऽइरिण्याय च प्प्रपत्थ्याय च नमो व्व्रज्ज्याय॥४३॥ नमो व्व्रज्ज्याय च गोष्ठ्याय च नमस्तल्प्याय च गेह्याय च नमो हृदय्याय च निवेष्प्याय च नमः काट्याय च गव्हरेष्ठाय च नमः शुष्क्याय॥४४॥ नमः शुष्क्याय च हरित्याय च नमः पांᳰसव्याय च रजस्याय च नमो लोप्याय चोलप्याय च नम ऽऊर्व्व्याय च सूर्व्याय च नमः पर्णाय॥४५॥ नमः पर्णाय। च पर्णशदाय च नम ऽउद्गुरमाणाय चाभिघ्नते च नम ऽआखिदते च प्प्रखिदते च नम ऽइषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमो नमो वः किरिकेभ्यो देवानांᳰहृदयेभ्यो नमो व्विचिन्वत्केभ्यो नमो व्विक्षिणत्केभ्यो नम ऽआनिर्ह-

तेब्भ्यं॑ः॥४६॥ द्रापे॒ऽअन्ध॑सस्पते॒दरि॑द्रनी॒ललोहितः। आसांप्प्र॒जाना॑मे॒षाम्प॑शू॒नाम्मा॒भेर्मारो॒ङ्म्मोच॑नः॒किञ्च॒नाम॑मत्॥४७॥ इ॒मारु॒द्राय॑। त॒वसे॑कप॒र्द्दिने॑क्षयद्वी॑रायप्प्रभ॑रामहेम॒तीः। यथा॒शमस॑द्द्वि॒पदे॒चतु॑ष्प्पदे॒विश्श्व॑म्पु॒ष्टंग्रामे॑अ॒स्मिन्ननातु॒रम्॥४८॥ याते॑रुद्द्रशि॒वातनूः॒शि॒वाविश्श्वाहा॑भेषजीशि॒वारु॒तस्य॑भेष॒जीतया॑नोमृडजी॒वसे॑॥४९॥ परि॑नोरु॒द्द्रस्य॑हे॒तिर्वृ॑णक्तु॒परि॑त्वे॒षस्य॑दुर्म्म॒तिर॑घा॒योः। अव॑स्थि॒राम॒घव॑द्भ्यस्तनुष्व॒मीढ्व॑स्तो॒काय॒तन॑याय॒मृड॥५०॥ मीढु॑ष्टम॒शिव॑तम। शि॒वोनः॑सु॒मना॒भव। प॒रमे॒व्वृक्ष॒ऽआयु॑धन्नि॒धाय॒कृत्तिं॒व्वसा॑न॒ऽआच॑र॒पिना॑कु॒म्बिब्भ्र॒दाग॑हि॥५१॥ विकि॑रिद्द्र॒विलो॑हित॒नम॑स्तेऽअस्तुभगवः। यास्ते॑स॒हस्र॑ꣳहे॒तयो॒न्न्यम॒स्मन्निव॑पन्तु॒ताः॥५२॥ स॒हस्रा॑णिसहस्र॒शोबा॒ह्वोस्तव॑हे॒तयः॑। तासा॒मीशा॑नोभगवः परा॒चीना॒मुखा॑कृधि॥५३॥ अ॒सं॒ङ्ख्याता॑स॒हस्रा॑णि॒येरु॒द्द्राऽअधि॒भूम्या॑म्। तेषा॑ꣳसहस्रयोज॒नेव॒धन्वा॑नितन्मसि॥५४॥ अ॒स्मिन्म॑ह॒त्त्य॑र्ण॒वे॒न्तरि॑क्षेभ॒वाऽअधि॑। तेषा॑ꣳस०॥५५॥ नील॑ग्ग्रीवाः शितिक॒ण्ठादिव॑ꣳ०रु॒द्द्राऽउप॑श्श्रि॒ताः। तेषा॑ꣳस०॥५६॥ नील॑ग्ग्रीवाःशितिक॒ण्ठाःश॒र्व्वाऽअ॒धःक्ष॑माच॒राः। तेषा॑ꣳस०॥५७॥ येव्वृ॒क्षेषु॑श॒ष्प्पिञ्ज॑रा॒नील॑ग्ग्रीवा॒विलो॑हिताः॒तेषा॑ꣳस०॥५८॥ येभू॒ताना॒मधि॑पतयोविशि॒खासः॑कप॒र्द्दिनः॑। तेषा॑ꣳस०॥५९॥ येप॒थाम्प॑थि॒रक्ष॑य॒ऽऐलबृ॒दाऽआ॒यु॒र्य्युधः॑। तेषा॑ꣳस०॥६०॥ येती॒र्त्था॒निप्प्र॒चर॑न्ति॒सृका॑हस्ता॒निष॒ङ्गिणः॑। तेषा॑ꣳस०॥६१॥ येन्ने॑षु॒विवि॒द्ध्य॑न्ति॒पात्रे॑षु॒पिब॑तो॒जना॑न्। तेषा॑ꣳस०॥६२॥ यऽए॒ताव॑न्तश्श्च॒भूया॑ꣳसश्श्च॒दिशो॑रु॒द्द्रावि॑तस्थि॒रे। तेषा॑ꣳस०॥६३॥ नमो॑स्तुरु॒द्द्रेभ्यो॒येदि॒वि॒येषां॑व॒र्षमिष॑वः। तेभ्यो॒दश॒प्प्राची॒र्द्दश॑ दक्षि॒णदश॒प्प्रती॑ची॒र्द्दशोदी॑ची॒र्द्दशो॒र्ध्वाः। तेभ्यो॒नमो॑ऽअस्तु॒तेनो॑वन्तु॒तेनो॑मृडयन्तु॒तेयन्द्वि॒ष्मोय॑श्च॒नोद्वेष्टि॒तमे॑षा॒ञ्जम्भे॑दध्मः॥६४॥ नमो॑स्तुरु॒द्द्रेभ्यो॒येन्तरि॑क्षे॒येषां॒व्वात॒ऽइष॑वः। तेभ्यो॒०॥६५॥ नमो॑स्तुरु॒द्द्रेभ्यो॒येपृ॑थि॒व्यांय्येषा॒मन्न॒मिष॑वः। तेभ्यो॒दश॒प्राची॒र्द्दश॑दक्षि॒णादश॒प्प्रती॑ची॒र्द्दशो॒र्ध्वाः। तेभ्यो॒नमो॑ऽअस्तु॒ते॒नो॑वन्तु॒तेनो॑मृडयन्तु॒तेयंद्वि॒ष्मोय॑श्च॒नोद्वेष्टि॒तमे॑षां॒जम्भे॑दध्मः॥६६॥इति रुद्राध्यायं पठित्वा—

ॐ वाज॑श्चमेप्प्रस॒वश्च॑मे॒प्प्रय॑तिश्चमे॒प्प्रसि॑तिश्चमेधी॒तिश्च॑मे॒क्क्रतु॑श्चमे॒स्वर॑श्चमे॒श्लोक॑श्चमेश्श्रा॒वश्च॑मे॒श्श्रुति॑श्चमे॒ज्ज्योति॑श्चमे॒स्व॑श्चमेय॒ज्ञेन॑ कल्प्यन्ताम्॥१॥ प्रा॒णश्श्च॑मेपान॒श्श्च॑मेव्व्या॒नश्श्च॒मे॒सु॑श्चमेचि॒त्तञ्च॑म॒ऽआधी॑तञ्चमे॒व्वाक्च॑मे॒मन॑श्चमे॒चक्षु॑श्चमे॒श्श्रोत्रं॑चमे॒दक्ष॑श्चमे॒बल॑ञ्चमेय॒ज्ञेन॑कल्प्यन्ताम्॥२॥ ओज॑श्चमे॒सह॑श्चम॒ऽआ॒त्मा॒च॑मेत॒नूश्च॑मे॒शर्म॑चमे॒व्वर्म्म॑चमे॒ङ्गा॑निचमे॒स्थी॑निचमे॒परू॑ꣳषिचमे॒शरी॑राणिचम॒ऽआयु॑श्चमेज॒राच॑मेय॒ज्ञेन॑ कल्प्यन्ताम्॥३॥ ज्ज्यैष्ठ्य॑ञ्चम॒ऽआधि॑पत्यञ्चमेम॒न्युश्च॑मे॒भाम॑श्चमे॒म॑श्चमे॒म्भ॑श्चमेजे॒माच॑मेमहि॒माच॑मेव्वरि॒माच॑मेप्प्रथि॒माच॑मेव॒र्षिमाच॑मेव्वृ॒द्धञ्च॑मे॒व्वृद्धि॑श्चमेय॒ज्ञेन॑कल्प्यन्ताम्॥४॥ इत्याद्यं चमकानुवाकं पठेत्॥१॥

पुनः ॐ नमस्तेरुद्र इत्यादि (६६) पठित्वा ॐ स॒त्त्यञ्च॑मेश्श्र॒द्धाच॑मे॒जग॑च्चमे॒धन॑ञ्चमे॒विश्श्व॑ञ्चमे॒मह॑श्चमेक्क्री॒डाच॑मे॒मोद॑श्चमेजा॒तञ्च॑मेजनि॒ष्ष्यमा॑णञ्चमे॒सू॒क्तञ्च॑मेसुकृ॒तञ्च॑मेय॒ज्ञेन॑कल्प्यन्ताम्॥५॥ ऋ॒तञ्च॑मे॒मृतं॑ञ्चमेय॒क्ष्मञ्च॒मेना॑मयच्चमेजी॒वातु॑श्चमेदीर्घायु॒त्वञ्च॑मेनमि॒त्रञ्च॑मे॒भय॑ञ्चमे॒सु॒खञ्च॑मे॒शय॑नञ्चमे॒सू॒षाश्च॑मेसु॒दिन॑ञ्चमेय॒ज्ञेन॑कल्प्यन्ताम्॥६॥ य॒न्ताच॑मेध॒र्त्ताच॑मे॒क्षेम॑श्चमे॒धृति॑श्चमे॒विश्श्व॑ञ्चमे॒मह॑श्चमे॒संव्वि॑च्चमे॒ज्ञात्र॑ञ्चमे॒सूश्च॑मेप्प्र॒सूश्च॑मे॒सीर॑ञ्चमे॒लय॑श्चमेय॒ज्ञेन॑कल्प्यन्ताम्॥७॥ शंच॑मे॒मय॑श्चमेप्प्रि॒यञ्च॑मेनुका॒मश्च॑मे॒काम॑श्चमेसौमन॒सश्च॑मे॒भग॑श्चमे॒द्द्रवि॑णश्चमेभ॒द्रञ्च॑मे॒श्श्रेय॑श्चमे॒वसी॑यश्चमे॒यश॑श्चमे॒य॒ज्ञेन॑कल्प्यन्ताम्॥८॥ इति द्वितीयं चमकानुवाकं पठेत्॥२॥

पुनः ॐ नमस्ते० इत्यादि (६६) पठित्वा ॐ ऊर्क्च॑मेसू॒नृता॑चमे॒पय॑श्चमे॒रस॑श्चमेघृ॒तञ्च॑मे॒मधु॑चमे॒सग्ग्धि॑श्चमे॒सपी॑तिश्चमेकृ॒षिश्च॑मे॒व्वृष्टि॑श्चमे॒जैत्र॑ञ्चम॒ऽऔद्भि॑द्यञ्चमेय॒ज्ञेन॑कल्प्यन्ताम्॥९॥ र॒यिश्च॑मे॒राय॑श्चमेपु॒ष्टञ्च॑मे॒पुष्टि॑श्चमेवि॒भुच॑मेप्र॒भुच॑मेपू॒र्णञ्च॑मेपू॒र्णत॑रञ्चमे॒कुय॑वञ्चमे॒क्षित॑ञ्चमे॒न्नञ्च॒मेक्षु॑च्चमेय॒ज्ञेन॑कल्प्यन्ताम्॥१०॥ वि॒त्तञ्च॑मे॒वेद्य॑ञ्चमेभू॒तञ्च॑मेभवि॒ष्ष्यच्च॑मेसु॒गञ्च॑मेसुप॒त्थ्यञ्च॑मऽऋ॒द्धञ्च॑म॒ऽऋद्धि॑श्चमेक्लृ॒प्तञ्च॑मे॒क्लृप्ति॑श्चमेम॒तिश्च॑मेसुम॒तिश्च॑मेय॒ज्ञेन॑कल्प्यन्ताम्॥११॥ व्व्री॒हय॑श्चमे॒यवा॑श्चमे॒माषा॑श्चमे॒तिला॑श्चमेमु॒द्गाश्च॑मे॒खल्ल्वा॑श्चमेप्प्रि॒यङ्ग॑वश्चमे॒णव॑श्चमे॒श्यामा॒काश्च॑मेनी॒वारा॑श्चमे॒गो॒धूमा॑श्चमेम॒सूरा॑श्चमेय॒ज्ञेन॑कल्प्यन्ताम्॥१२॥ इति तृतीयं चमकानुवाकं पठेत्॥३॥

पुनः ॐ नमस्ते इत्यादि (६६) पठित्वा ॐ अश्म्माचमेमृत्तिकाचमेगिरयश्श्चमेपर्व्वताश्श्चमेसिकताश्श्चमे-वुनस्प्पतयश्श्चमेहिरण्यञ्चमेयश्श्चमेश्यामञ्चमेलोहञ्चमेसीसञ्चमेत्रपुचमेयज्ञेनकल्प्पन्ताम्॥१३॥ अग्निश्चमऽआपश्श्चमे-व्वीरुधश्श्चमऽओषधयश्चमेकृष्टपच्याश्श्चमेग्राम्म्याश्श्चमेपशवऽआरण्याश्श्चमेव्वित्तञ्चमेव्वित्तिश्चमेभूतञ्चमेभूतिश्श्चमेयज्ञेन-कल्प्पन्ताम्॥१४॥ वसुश्चमेवसतिश्श्चमेकर्म्मचमेशक्तिश्श्चमेर्त्थश्श्चमऽएमश्श्चमऽइत्याचमेगतिश्श्चमेजज्ञेनकल्प्पन्ताम्॥१५॥ इति चतुर्थं चमकानुवाकं पठेत्॥४॥

पुनः नमस्ते इत्यादि (६६) पठित्वा ॐ अग्निश्श्चमऽ इन्द्रश्श्चमेसोमश्श्चमऽइन्द्रश्श्चमेसविताचमऽइन्द्रश्श्चमे-सरस्वतीचमऽइन्द्रश्श्चमेपूषाचमऽइन्द्रश्श्चमेबृहस्पतिश्चमऽइन्द्रश्चमेयज्ञेनकल्प्पन्ताम्॥१६॥ मित्रश्श्चमऽइन्द्रश्श्चमेव्वरुण-श्श्चमऽइन्द्रश्श्चमेधाताचमऽइन्द्रश्श्चमेत्त्वष्टाचमऽइन्द्रश्श्चमेमरुतश्श्चमऽइन्द्रश्श्चमेव्विश्वेचमेदेवाऽइन्द्रश्चमेयज्ञेनकल्प्पन्ताम्॥१७॥ पृथिवीचमऽइन्द्रश्श्चमेन्तरिक्षञ्चमऽइन्द्रश्श्चमेद्यौश्चमऽइन्द्रश्श्चमेसमाश्श्चमऽइन्द्रश्श्चमेनक्षत्राणिचमऽइन्द्रश्चमेदिशश्श्चमऽ-इन्द्रश्श्चमेयज्ञेनकल्प्पन्ताम्॥१८॥ इति पञ्चमं चमकानुवाकं पठेत्॥५॥

पुनः ॐ नमस्ते इत्यादि (६६) पठित्वा अᳬशुश्श्चमेरश्मिश्श्चमेदाब्भ्यश्श्चमेधिपतिश्श्चमऽउपाᳬशुश्श्चमेन्तर्य्या-मश्श्चमऽऐन्द्रवायवश्श्चमेमैत्रावरुणश्श्चमऽआश्विनश्श्चमेप्प्रतिप्प्रस्थानश्श्चमेशुक्रश्श्चमेमन्थीचमेयज्ञेनकल्प्पन्ताम्॥१९॥ आग्रयणश्श्चमेव्वैश्श्वदेवश्श्चमेद्ध्रुवश्श्चमेवैश्वानरश्चमऽऐन्द्राग्नश्श्चमेमहावैश्श्वदेवश्श्चममरुत्वतीयाश्श्चमेनिष्केवल्यश्श्च-मेसावित्रश्श्चमेसारस्वतश्श्चमेपात्क्नीवतश्श्चमेहारियोजनश्श्चमेयज्ञेनकल्प्पन्ताम्॥२०॥ स्रुचश्श्चमेचमसाश्श्चमेव्वाय-व्व्यानिचमेद्रोणकलशश्श्चमेग्ग्रावाणश्श्चमेधिषवणेचमेपूतभृच्चमऽआधवनीयश्श्चमेव्वेदिश्श्चमेबर्हिश्श्चमेवभृथश्श्चमे-यज्ञेनकल्प्पन्ताम्॥२१॥ इति षष्ठं चमकानुवाकं पठेत्॥६॥

पुनः ॐ नमस्ते इत्यादि (६६) पठित्वा ॐ अग्निश्श्चमेघर्म्मश्श्चमेर्कश्श्चमेसूर्य्यश्श्चमेप्प्राणश्श्चमेश्श्वमेधश्श्चमे-पृथिवीचमेदितिश्चमेदितिश्श्चमेद्यौश्श्चमेङ्गुलयश्शक्करयोदिशश्श्चमेयज्ञेनकल्प्पन्ताम्॥२२॥ व्व्रतञ्चमऽऋतवश्श्चमेत-पश्श्चमेसंव्वत्सरश्श्चमेहोरात्रेऽऊर्व्वष्ठीवेबृहद्रथन्तरञ्चमेयज्ञेनकल्प्पन्ताम्॥२३॥ इति सप्तमं चमकानुवाकं पठेत् ॥७॥

पुनर्नमस्ते रु० इत्यादि (६६) पठित्वा एकाचमेतिस्रश्श्चमेतिस्रश्श्चमेपञ्चचमेपञ्चचमेसप्तचमेसप्तचमेनवचमे-नवचमऽएकादशचमऽएकादशचमेत्रयोदशचमेपञ्चदशचमेपञ्चदशचमेसप्तदशचमेसप्तदशचमेनवदशचमऽएकविᳬ-शतिश्श्चमऽएकविᳬशतिश्श्चमेत्रयोविᳬशतिश्श्चमेत्रयोविᳬशतिश्श्चमेपञ्चविᳬशतिश्श्चमेपञ्चविᳬशतिश्श्चमे-सप्तविᳬशतिश्श्चमेसप्तविᳬशतिश्श्चमेनवविᳬशतिश्श्चमेनवविᳬशतिश्चमऽएकत्रिᳬशच्चमऽएकत्रिᳬ-शच्चमेत्रयस्त्रिᳬशच्चमेमेयज्ञेनकल्प्पन्ताम्॥२४॥ इत्यष्टयं चमकानुवाकं पठेत् ॥८॥

पुनर्नमस्तेरुद्र इत्यादि (६६) पठित्वा चतस्रश्श्चमेष्टौचमेष्टौचमेद्द्वादशचमेद्वादशचमेषोडशचमेषोडचमेविᳬ-शतिश्श्चमेव्विᳬशतिश्श्चमेचतुर्व्विᳬशतिश्श्चमेचतुर्विᳬशतिश्श्चमेष्टाविᳬशतिश्श्चमेष्टाविᳬशतिश्श्चमेद्वात्रिᳬ-शच्चमेद्वात्रिᳬशच्चमेषट्त्रिᳬशच्चमेचत्वारिᳬशच्चमेचत्वारिᳬशच्चमेचतुश्श्चत्वारिᳬशच्चमेचतुश्श्चत्वारिᳬशच्चमेष्टा-चत्वारिᳬशच्चमेयज्ञेनकल्प्पन्ताम्॥२५॥ इति नवमं चमकानुवाकं पठेत्॥९॥

पुनर्नमस्तेरुद्र इत्यादि (६६) पठित्वा त्र्यविश्श्चमेत्र्यवीचमेदित्यवाट्चमेदित्यौहीचमेपञ्चाविश्श्चमेपञ्चा-वीचमेत्रिवत्सश्श्चमेत्रिवत्साचमेतुर्य्यवाट्चमेतुर्य्यौहीचमेयज्ञेनकल्प्पन्ताम्॥२६॥ षष्ठवाट्चमेषष्ठौहीचमऽउक्षाचमेव्व-शाचमऽऋषभश्श्चमेव्वेहच्चमेनड्वाँश्श्चमेधेनुश्श्चमेयज्ञेनकल्प्पन्ताम्॥२७॥ इति दशमानुवाकं पठेत्।

इति केवलानि नव पठित्वा पुनर्नमस्ते (६६) इत्यादि पठित्वा ॐ व्वाजायस्वाहाप्प्रसवायस्वाहापिजाय-स्वाहाक्क्रतवेस्वाहाव्वसवेस्वाहाहर्प्पतयेस्वाहान्हेमुग्ग्धायस्वाहामुग्ग्धायवैनᳬशिनायस्वाहाव्विनᳬशिनऽआन्त्यायनाय-

स्वाहान्त्यायभौवुनायुस्वाहाभुवनस्युपतयेस्वाहाधिपतयेस्वाहाप्प्रजापतयेस्वाहाइयन्तेराण्मित्रायंयुन्तासियमनऽऊर्ज्जे-त्वाव्वृष्टयैत्वाप्प्रजानान्त्वाधिपत्याय॥२८॥ आयुर्य्यज्ञेन कल्प्पताम्प्प्राणोयज्ञेनकल्प्पताञ्चक्षुर्य्यज्ञेनकल्प्पताᳬश्श्रोत्रं-यज्ञेनकल्प्पताम्व्वाग्ग्यज्ञेनकल्प्पताम्मनोयज्ञेनकल्प्पतामात्मायज्ञेनकल्प्पताम्ब्रह्मायज्ञेनकल्प्पताञ्ज्योतिर्य्यज्ञेनकल्प्पताᳬ-स्वर्य्यज्ञेनकल्प्पताम्पृष्ठंय्यज्ञेनकल्प्पतांयुज्ञोयज्ञेनकल्प्पताम्। स्तोमश्श्चयजुश्श्चऽऋक्चसामचबृहच्चरथन्तरञ्चस्वर्द्देवाऽ-अंगन्मामृताऽअभूमप्प्रजापतेᳲप्प्रजाऽअभूम व्वेट्स्वाहा॥२९॥ इत्येकादशमनुवाकं पठेत्॥११॥ एवमाद्यं रूपं साङ्ग-हृदयादिषडङ्गसहितं पठित्वा ततो नव केवलानि च जप्त्वा अन्त्यमेकादशं वयर्ठ०सोम इत्यादि सशीर्षकं साङ्गं निरङ्गं वा पठेत्।

अथ शीर्षकमनुवाकम्। ॐ वयर्ठ०सोमव्व्रतेतवमनस्तनूषुबिब्भ्रतᳲ॥ प्रजावन्तᳲसचेमहि॥१॥ एषते रुद्रभागᳲसहस्वस्राम्बिकयातज्जुषस्वस्वाहैषतेरुद्रभागऽआखुस्तेपशुᳲ॥२॥ अवरुद्रमदीमह्यवदेवंत्र्यम्बकम्। यथानो-व्वस्यसस्करद्यथानᳲश्श्रेयसस्करद्यथानोव्व्यवसाययात्॥३॥ भेषजमसि भेषजङ्गवेश्श्वायपुरुषायभेषजम्। सुखम्मेषाय-मेष्यै॥४॥ त्र्यम्बकंयजामहेसुगन्धिम्पुष्टिवर्द्धनम्। उर्व्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात्॥ त्र्यम्बकंयजामहेसुगन्धि-म्पतिवेदनम्। उर्व्वारुकमिवबन्धनादितोमुक्षीयमामुतᳲ॥५॥ एतत्तेरुद्रावसन्तेनपरोमूजवतोतीहि। अवततधन्वापिनाका-वसᳲ। कृत्तिवासाऽअहिर्ठ०सन्नᳲशिवोतीहि॥६॥ त्र्यायुषञ्जमदग्नेᳲकश्यपस्यत्र्यायुषम्। यद्देवेषुत्र्यायुषन्तन्नोऽअस्तुत्र्या-युषम्॥७॥ शिवोनामासिस्वधितिस्तेपितानमस्तेऽअस्तुमामाहिर्ठ०सीᳲ। निर्वर्तयाम्प्यायुषेन्नाद्यायप्प्रजननायरायस्पोषाय-सुप्प्रजास्त्वायसुवीर्य्याय॥८॥ इति पठेत् । एवं साङ्गादिसशिरोऽन्तं जपं कृत्वा तदन्ते ॐ ऋचं वाचम् इत्यादिशान्ति-पाठं पठेत्।

हरिः ॐ ऋचंव्वाचम्प्रपद्येमनोयजुᳲप्प्रपद्येसामप्प्राणम्प्रपद्येचक्षुᳲश्श्रोत्रंप्रपद्येव्वागोजᳲसहौजोमयिप्राणापानौ॥१॥ यन्मेछिद्रञ्चक्षुषोहृदयस्यमनसोव्वातितृण्णम्बृहस्पतिर्म्मेतद्दधातु। शन्नोभवतुभुवनस्ययस्पतिः॥२॥ भूर्भ्भुवᳲस्वᳲ तत्सवितुर्वरेण्यम्भर्गोदेवस्यधीमहि। धियोयोनᳲप्प्रचोदयात्॥३॥ कयानश्चित्रऽआभुवदूतीसदावृधᳲसखा। कया शचिष्ठयाव्वृता॥४॥ कस्त्वा सत्योमदानांमर्ठ०हिष्ठोमत्सदन्धसᳲ। दृढाचिदारुजेव्वसु॥५॥ अभीषुणᳲसखीनामविताजरितॄणाम्। शतम्भवास्यूतिभिः॥६॥ कयात्वन्नऽऊत्याभिप्रमन्दसेव्वृषम्। कयास्तोतृब्भ्यऽआभर॥७॥ इन्द्रोव्विश्श्वस्यराजतिशन्नोऽअस्तुद्विपदेशञ्चतुष्पदे॥८॥ शन्नोमित्रᳲशंवरुणᳲशन्नोभवत्वर्य्यमा। शन्नऽइन्द्रोबृहस्पतिᳲ शन्नोविष्णुरुरुक्रमᳲ॥९॥ शन्नोव्वातᳲपवताᳬशन्नस्तपतुसूर्य्यᳲ। शन्नᳲकनिक्रदद्देवᳲपर्ज्जन्योऽअभिवर्षतु॥१०॥ अहानिशम्भवन्तुनᳲशर्ठ०रात्रिᳲप्प्रतिधीयताम्। शन्नऽइन्द्राग्नीभवतामवोभिᳲशन्नऽइन्द्रावरुणारातहव्या। शन्नऽइन्द्रापूष-णाव्वाजसातौशमिन्द्रासोमासुविताय्यशंय्योᳲ॥११॥ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये। शंय्योरभिस्त्रवन्तुनᳲ॥१२॥ स्योनापृथिविनोभवानृक्षरानिवेशनी यच्छानᳲशर्म्मसप्प्रथाᳲ॥१३॥ आपोहिष्ठामयोभुवस्तानऽऊर्ज्जेदधातन। महेरणाय चक्षसे॥१४॥ योवᳲशिवतमोरसस्तस्यभाजयतेहनᳲ। उशतीरिवमातरᳲ॥१५॥ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ। आपोजनयथाचनᳲ॥१६॥ द्यौᳲ शान्तिरन्तरिक्षर्ठ०शान्तिᳲपृथिवीशान्तिरापᳲशान्तिरोषधयᳲशान्तिᳲ। वनस्पतयᳲशान्ति-र्विश्श्वेदेवाᳲशान्तिर्ब्रह्मशान्तिःसर्वर्ठ०शान्तिᳲशान्तिरेवशान्तिᳲसामाशान्तिरेधि॥१७॥ दृतेदृर्ठ०हमामित्रस्यमाचक्षुषा सर्व्वाणिभूतानिसमीक्षन्ताम्। मित्रस्याहञ्चक्षुषासर्वाणिभूतानिसमीक्षे। मित्रस्यचक्षुषासमीक्षामहे॥१८॥ दृतेदृर्ठ० हमा०। ज्ज्योक्तेसन्दृशिजीव्व्यासञ्ज्योक्तेसन्दृशिजीव्व्यासम्॥१९॥ नमस्तेहरसेशोचिषेनमस्तेऽअस्त्वर्च्चिषे। अन्न्याँस्तेऽअस्मत्त-पन्तुहेतयᳲपावकोऽअस्मब्भ्यर्ठ०शिवोभव॥२०॥ नमस्तेऽअस्तुविद्युतेनमस्तेस्तनयित्नवे। नमस्तेभगवन्नस्तुयतᳲ-स्वᳲसमीहसे॥२१॥ यतोयतᳲसमीहसेततोनोऽअभयङ्कुरु। शन्नᳲ कुरुप्प्रजाभ्योभयन्नᳲपशुभ्यᳲ॥२२॥ सुमित्त्रियानऽ-

आपुऽओषधयःसन्तु। दुर्म्मित्रियास्तस्म्मैसन्तुयोस्म्मान्द्वेष्टियञ्चव्वयंद्विष्म्मः॥२३॥ तच्चक्षुर्द्देवहितम्पुरस्ताच्छुक्क्रमुच्चरत्। पश्श्येमशरदःशतञ्जीवेमशरदःशतꣳशृणुयामशरदः शतम्प्रब्ब्रवामशरदःशतमदीनाःस्यामशरदःशतम्भूयश्चशरदः शतात्॥२४॥ ॐ शान्तिः शान्तिः शान्तिः इति शान्तिपाठं पठेत्। एवं कर्तुमशक्तश्चेत्तदा दशाक्षरं यथाशक्ति जपेत्। ततः ॐ इमारुद्द्रायतवसेकपर्द्दिनेक्क्षयद्वीराय प्रभरामहेमतीः। यथाशमसद्द्विपदेचतुष्प्पदेव्विश्श्वम्पुष्टग्रामेऽअस्मिन्ननातुरम्॥१॥ इति मन्त्रेण अर्घपात्रोदकं गृहीत्वा देवदक्षिणे धर्मार्थकाममोक्षादिष्वीप्सितफलप्राप्त्यर्थं यथाशक्ति यत्कृतरूपादिजपेन स्वयं वा ऋत्विग्द्वारा कारितेन प्रणतजनानुकम्पी सच्चिदानन्दरूपपरमात्मा श्रीसदाशिवमहारुद्रः प्रीयतामिति पठित्वोत्सृजेत्। ततो देवाभिमुखः कृताञ्जलिपुटः सन्—

ॐ जपन्यासार्चनं देव यत्कृतं तु मयाद्य वै। न्यूनातिदोषरहितं कृतं कर्म्म मया प्रभो॥
भवत्वेतत्कृपासिन्धो क्षमस्व च नमोऽस्तु ते। पूजान्यासादिकं देव कृतं यत्त्वदनुग्रहात्॥
तेन मत्कर्म्मणा रुद्र प्रीतो भव वरप्रदः। नमः शिवाय शान्ताय सगणायादिहेतवे॥
निवेदयामि चात्मानं त्वं गतिः परमेश्वरः। न्यूनातिरिक्तं तत्पूर्णं प्रसादात्तव शङ्कर॥
एतत्कृतेन देवेश सदा मे वरदो भव।

एवं देवं क्षमाप्य आत्मानं निवेद्य पुष्पाञ्जलिं दत्त्वा पुनः स्तुत्वा मन्त्रहीन०॥१॥ आवाहनं न जानामि०॥२॥ इति साष्टाङ्गं प्रणमेत्।

एवं प्रत्यहं कृत्वा पञ्चरुद्राणां मध्ये यस्य रुद्रस्य यावद्भिर्ब्राह्मणैर्यावद्भिर्दिनैः पूर्वं सङ्कल्पः कृतस्तावत्पर्यन्तमुक्तप्रकारेण अक्षारलवणाशनाधःशयनादिनियमैर्जपं कुर्य्यात्। ततः समाप्ते जपे जपोक्तप्रकारेण समग्रं दशांशेन वा शतांशेन तिलादिद्रव्यैर्होमादिकं कुर्यात्। अभिषेके तु शिवमूर्ध्नि हिरण्यादिकलशेन सन्ततधारां मधुना सर्पिषा पयसा वेक्षुरसेन नारिकेलोदकेन वाऽऽम्ररसेन वा कदलीभवेन रसेन शुद्धोदकेन वा निषिञ्चेत्। पूर्वोक्तपूजादिकं कृत्वा अभिषेकः कर्तव्यः।

रुद्रजप का क्रम—(शुक्लयजुर्वेदीय रुद्राष्टाध्यायी के पञ्चमाध्याय) मूल में लिखे 'नमस्तेरुद्रमन्यवऽउतोतइषवे नमः। बाहुभ्यामुतते नमः॥' इस प्रथम मन्त्र से लेकर कुल ६६ मन्त्रों का जप (पाठ) करे। रुद्राध्याय के उपरान्त 'ॐ वाजश्च मे०' इत्यादि चार मन्त्रों के चमकानुवाक को पढ़कर पुनः पूरा 'नमस्ते रुद्र०' इत्यादि ६६ मन्त्रों का नमकाध्याय पढ़े। फिर आगे के 'ॐ सत्यञ्च मे श्रद्धा च मे०' इत्यादि पाँचवें से लेकर आठवें मन्त्र तक के चार मन्त्रों का द्वितीय चमकानुवाक पढ़कर पुनः उसी रुद्राध्याय के ६६ मन्त्रों (नमकाध्याय) को पढ़े। फिर 'ऊर्क्क च मे सूनृता च मे०' इत्यादि तृतीय चमकानुवाक के नवें मन्त्र से लेकर बारहवें मन्त्र तक के कुल चार मन्त्रों को (तृतीय चमकानुवाक को) पढ़कर पुनः 'नमस्ते रुद्र०' इत्यादि नमकाध्याय (६६ मन्त्र) पढ़े। फिर 'अश्मा चमे०' इत्यादि चार मन्त्रों के चतुर्थ चमकानुवाक को पढ़कर पुनः ६६ मन्त्रों के रुद्राध्याय (नमकाध्याय) को पढ़े। फिर 'ॐ अग्निश्च मे०' इत्यादि सोलहवें मन्त्र से लेकर अठारहवें मन्त्र-पर्यन्त के तीन मन्त्रों के पाँचवें चमकानुवाक को पढ़कर पुनः 'नमस्ते रुद्र०' इत्यादि नमकाध्याय को पढ़े। फिर 'ॐ अꣳशुश्च मे०' इत्यादि उन्नीसवें मन्त्र से लेकर इक्कीसवें मन्त्र-पर्यन्त के त्रिमन्त्रात्मक छठें चमकाध्याय को पढ़कर पुनः नमकाध्याय को पढ़े। फिर 'अग्निश्च मे धर्मश्च मे०' इत्यादि दो मन्त्रों के सप्तम चमकाध्याय को पढ़कर पुनः नमकाध्याय पढ़े। फिर 'एका च मे, तिस्रश्च मे०' इत्यादि चौबीसवें मन्त्र के अष्टम चमकानुवाक को पढ़कर पुनः 'नमस्ते रुद्र' इत्यादि ६६ मन्त्रों के नमकाध्याय को पढ़े। फिर 'चतस्रश्च मे०' इत्यादि पच्चीसवें मन्त्र के

एकमन्त्रात्मक नवम चमकानुवाक को पढ़कर पुनः नमकाध्याय पढ़े। फिर 'त्र्यविश्च मे त्र्यवी च मे०' इत्यादि छब्बीसवें तथा सत्ताईसवें मन्त्रयुक्त दशम चमकानुवाक को पढ़कर पुनः नमकाध्याय का पाठ करे। तदुपरान्त 'ॐ वाजाय स्वाहा प्रसवाय स्वाहा०' इत्यादि अट्ठाइसवें उन्तीसवें मन्त्रों के ग्यारहवें चमकानुवाक को पढ़े। फिर उसके आगे 'वयः सोम०' इत्यादि आठ मन्त्रों के शीर्षानुवाक को पढ़े। तदुपरान्त 'ॐ ऋचं वाचं प्रपद्ये०' इत्यादि २४ मन्त्रों के शान्तिपाठ को पढ़ना चाहिये। तदुपरान्त 'ॐ इमा रुद्रायतवसे०' इत्यादि मन्त्र से अर्घपात्र के अर्घोदक द्वारा देवता के दक्षिण पार्श्व में अर्घ्य दे। फिर देवता के सम्मुख हाथ जोड़कर 'ॐ जपन्यासार्चनं देव०' इत्यादि चार श्लोकों (मूल में लिखित) तथा 'मन्त्रहीनं क्रियाहीनं' एवं 'आवाहनं न जानामि०' इन श्लोकों को पढ़कर साष्टाङ्ग प्रणाम करना चाहिये। यह सब क्रिया प्रतिदिन करके जिस रुद्र के लिये जितनी सङ्ख्या के ब्राह्मणों द्वारा जप पूर्वसङ्कल्प के अनुसार कराया है तथा जितने दिनों का सङ्कल्प किया है, उतने दिन-पर्यन्त उक्त प्रकार से क्षार तथा लवण रहित भोजन करते हुए, भूमि पर शयन करते हुए जप को समाप्त करे और जपोक्त प्रकार से दशांश अथवा शतांश होम तिलादि द्रव्यों से करना चाहिये। अभिषेक शिव के शिर पर सुवर्ण आदि धातु के कलश (अभाव में ताम्रकलश) से मधु, घृत, गोदुग्ध, ईख के रस, नारियल के पानी, आम के रस अथवा केले के स्वरस और शुद्ध जल से पूर्वोक्त पूजा करके करना चाहिये।

रुद्रहोमविधिः

तत्र तावत् जपान्ते मण्डपं छायामण्डपं वा यथावत्कृत्वा तन्मध्ये होमानुसारेण चतुरस्रं कुण्डं सलक्षणं विधाय तदीशान्यां रुद्रवेदीं नवग्रहमखपक्षे तत्रैव ग्रहवेदीं च कुर्य्यात्। ततः सुमुहूर्त्ते ॐ भद्रं कर्णेभिरित्यादिवेदघोषेण पश्चिमद्वारतो मण्डपं प्रविश्य रुद्रवेदीपश्चिमतः स्वासने प्राङ्मुख उपविश्य स्वदक्षिणस्थपत्न्या समारब्धः सपवित्रकरो मूलेनाचम्य प्राणानायम्य आनोभद्रा इत्यादिशान्तिपाठं पठित्वा सुमुखश्चेत्यादि गणपतिस्मरणपूर्वकं देशकालौ सङ्कीर्त्य 'अमुकगोत्रोऽमुकशर्माहममुकफलावाप्त्यै श्रीपरमेश्वरप्रीत्यर्थं स्वयं ब्राह्मणद्वारा वा कृतस्यामुकरुद्रजपस्य साङ्गता-सिद्ध्यर्थं समग्रं वा जपदशांशेन वा शतांशतस्तिलादिद्रव्यैर्होमं करिष्ये' इति सङ्कल्प्य गणेशपूजनं पुण्याहवाचनं मातृकापूजनं नान्दीश्राद्धमाचार्यादिवरणं दिग्रक्षणं च पूर्वोक्तपद्धतिकाण्डमार्गेण सर्वं कुर्यात्। ततः कुण्डे अग्निं प्रतिष्ठाप्य ग्रहपीठे ग्रहान् सम्पूज्य तदीशान्यां कलशं संस्थापयेत्। ततो रुद्रपीठे वस्त्रं प्रसार्य्य तत्र द्वादशलिङ्गतोभद्रं तन्मध्ये रुद्रयन्त्रं च विलिख्य तन्मध्ये ताम्रकलशोपरि पलसुवर्णेन तदर्द्धेन वा रचितां रुद्रप्रतिमां सावयवां संस्थाप्य प्राणप्रतिष्ठां कृत्वा मूलमन्त्रेण पुष्पान्तैरुपचारैः सम्पूज्य पूर्वोक्तयन्त्रावरणदेवतापूजां कृत्वा रुद्रं धूपदीपनैवेद्यताम्बूलदक्षिणानीराजनैरभ्यर्च्य साष्टाङ्गं प्रणम्य स्तुतिपाठैः स्तुत्वा होमं कुर्य्यात्। तत्राघारावाज्यभागान्ते ग्रहादिहोमं कृत्वा तिलपायसाज्यैः प्रधानदेवरुद्रहोमं कुर्य्यात्। तत्र होमक्रमः—होमस्तु त्रेधा, समग्रहोमः, जपदशांशहोमः शतांशहोमश्च। तत्राद्यः प्रधानभूतो जपाङ्गभूतश्च उत्तरौ त्वङ्गभूतावेवेति महार्णवः।'

रुद्रहोम-विधि—फिर जप की समाप्ति पर मण्डप अथवा छायामण्डप विधिपूर्वक बनाकर उसमें होम की आवश्यकता के अनुसार चौकोर लक्षणयुक्त कुण्ड बनाये। ईशान कोण में रुद्रवेदी तथा नवग्रहमख में उसी कोण में ग्रहवेदी बनाये। फिर सुमुहूर्त में 'ॐ भद्रं कर्णेभिः शृणुयाम देवा०' इत्यादि मन्त्रों का उच्चारण करते हुए पश्चिम द्वार से मण्डप में प्रवेश करके रुद्रवेदी के पश्चिम में अपने आसन पर पूर्वाभिमुख बैठकर अपने दक्षिण भाग में पत्नी को बैठाकर हाथों में पवित्री धारण करके मूल मन्त्र से आचमन तथा प्राणायाम करने के उपरान्त 'आनोभद्रा०' इत्यादि मन्त्रों से शान्तिपाठ पढ़कर 'सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः' इत्यादि श्लोकों को पढ़े।

फिर देश-कालादि का उच्चारण करके मूल में लिखित 'अमुकगोत्रोऽमुकशर्मा (वर्मा अथवा गुप्ता अथवा दासो) अहं अमुकफलावाप्त्यै श्रीपरमेश्वरप्रीत्यर्थं स्वयं वा ब्राह्मणद्वारा०' इत्यादि कहकर सङ्कल्प करे। तदनन्तर गणेशपूजन, पुण्याहवाचन, मातृकापूजन, नान्दीश्राद्ध, आचार्यादिवरण, दिग्रक्षण आदि सभी कर्म पूर्व में पद्धतिकाण्ड में कथित विधि से करे। फिर कुण्ड में अग्नि को स्थापित कर, ग्रहपीठ पर ग्रहों को पूजकर उसके ईशान में कलश स्थापित करे। फिर रुद्रपीठ पर वस्त्र बिछाकर द्वादशलिङ्गतोभद्र मण्डल बनाये। उस मण्डल के मध्य में रुद्रयन्त्र लिखे। उस रुद्रयन्त्र के मध्य में ताम्र कलश के ऊपर दो पल (आठ तोला = लगभग १०० ग्राम) सुवर्ण धातु की प्रतिमा अथवा एक पल (५० ग्राम) की रुद्रप्रतिमा सावयव बनवाकर उसकी प्राणप्रतिष्ठा कर मूल मन्त्र से पुष्पान्त तक उपचार से पूजन करे। फिर पूर्वोक्त यन्त्रावरण के देवताओं की पूजा करके रुद्र को धूप, दीप, नैवेद्य, ताम्बूल, दक्षिणा, नीराजन से अर्चित कर साष्टांग प्रणाम कर स्तुतिपाठों से स्तुति कर होम करे। होम में आघाराहुति, आज्यभाग तथा ग्रहहोम करके तिल, पायस तथा घृत से प्रधान देव रुद्रदेव का होम करे। होम तीन प्रकार का होता है—१. समग्र होम, २. जपदशांश होम तथा ३. शतांश होम। महार्णव के अनुसार समग्र होम प्रधान-भूत तथा जपाङ्गभूत होता है। दशांश तथा शतांश—ये दोनों अङ्गभूत होते हैं।

प्रधानरुद्रहोमः

तत्रादौ ऋत्विजः प्राङ्मुखा उदङ्मुखाश्च कुण्डसमीपे स्थित्वा भूतशुद्ध्यादिमातृकान्यासान्तं कृत्वा पूर्वोक्तरुद्रपञ्चाङ्गन्यासान् कुर्युः। ततः पञ्चाङ्गमन्त्रैः पञ्चभिः पञ्चाहुतीर्हुत्वा रुद्रहोमः कार्यः। तद्यथा—यज्जाग्रत इति षडर्चेन एकाहुतिम्। सहस्रशीर्षेति षोडशर्चेन सूक्तेनैकाहुतिम्। अद्भ्यः सम्भृत इति षडर्चेन एकाहुतिम्। आशुः शिशान इति द्वादशर्चेन एकाहुतिम्। विभ्राड् इति सप्तदशर्चेन एकाहुतिं च हुत्वा ततः प्रधानभूतेन रुद्राध्यायेन होमः।

अथ प्रधानरुद्रहोमक्रमः। स च एकधा १ त्रेधा २ षोढा ३ षोडशधा ४ चतुश्चत्वारिंशद्धा ५ अष्टाचत्वारिंशद्धा ६ एकषष्ट्युत्तरशतधा ७ पञ्चविंशत्युत्तरचतुःशतधा चेति ८ अष्टविभागानामन्यतमं पक्षमङ्गीकृत्य होमं कुर्य्यात्।

प्रधान रुद्रहोम—सभी ऋत्विज (वरित ब्राह्मण) पूर्व की ओर अथवा उत्तर की ओर मुख करके बैठें। भूतशुद्धि तथा मातृकान्यास-पर्यन्त सभी कर्म करके पूर्वकथित रुद्रपञ्चाङ्ग न्यासों को करे। फिर पञ्चाङ्ग मन्त्रों के द्वारा पाँच आहुतियों से होम कर रुद्रहोम करना चाहिये। वह इस प्रकार है—(१) 'यज्जाग्रतो०' इत्यादि छः ऋचाओं से एक आहुति दे। (२) 'सहस्रशीर्षा०' इत्यादि सोलह ऋचाओं से एक आहुति दे। (३) 'अद्भ्यः संभृतं' इत्यादि छः ऋचाओं से एक आहुति दे। (४) 'आशुः शिशानो०' इत्यादि बारह ऋचाओं से एक आहुति दे तथा (५) 'ॐ विभाड् बृहत्०' इत्यादि सत्रह ऋचाओं से एक आहुति दे। इस प्रकार पाँच आहुतियाँ देकर फिर प्रधानभूत रुद्राध्याय से होम करना चाहिये।

प्रधान रुद्रहोम के आठ भेद—प्रधान रुद्रहोम के ग्रन्थों में आठ पक्ष (भेद) वर्णित है—१. एकधा, २. त्रेधा, ३. षोढा (छः भाग), ४. षोडशधा (१६), ५. चतुश्चत्वारिंशद्धा (४४), ६. अष्टाचत्वारिंशद्धा (४८), ७. एकषष्ट्युत्तरशतधा (१६१), ८. पञ्चविंशत्युत्तरचतुश्शतधा (४२५)। इन आठ भेदों में किसी भी एक भेद को चुनकर उसके अनुसार होम करना चाहिये।

अत्र एकषष्ट्युत्तरशतधा मन्त्रविभागपक्षेण होमः; तत्र मन्त्राः—ॐ नमस्ते रुद्र० स्वाहा॥ १॥ ॐ याते रुद्र शिवा० स्वाहा॥ २॥ ॐ यामिषुङ्गिरि० स्वाहा॥ ३॥ ॐ शिवेनवचसा० स्वाहा॥ ४॥ ॐ अध्यवोच० स्वाहा॥ ५॥ ॐ

असौयस्ताम्रो० स्वाहा॥ ६ ॥ (मन्त्रान्ते स्वाहापदं सर्वत्र ज्ञेयम्)। ॐ असौयोव० ॥ ७॥ ॐ नमोस्तुनीलग्रीवा० ॥ ८ ॥ ॐ प्रमुञ्चधन्व० ॥ ९ ॥ ॐ विज्यन्धनु० ॥ १० ॥ ॐ यातेहेति० ॥ ११ ॥ ॐ परिते धन्वनो० ॥ १२ ॥ ॐ अवतत्य० ॥ १३ ॥ ॐ नमस्तऽआयुधाया० ॥ १४॥ मानो महान्त० ॥ १५ ॥ ॐ मानस्तोके० ॥ १६ ॥ ॐ नमो हिरण्यवाहवे सेनान्येदिशाञ्च पतये नमः स्वाहा ॥ १७ ॥ ॐ नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनाम्पतये नमः स्वाहा ॥ १८ ॥ ॐ नमः शष्पिञ्जरायत्त्विषीमते-पथीनाम्पतये नमः स्वाहा ॥ १९ ॥ॐ नमो हरिकेशायोपवीतिने पुष्टानाम्पतये नमः स्वाहा ॥ २० ॥ ॐ नमो बब्भ्लुशाय व्याधिनेत्रानाम्पतये नमः स्वाहा ॥ २१ ॥ ॐ नमोभवस्यहेत्यैजगताम्पतये नमः स्वाहा ॥ २२ ॥ ॐ नमो रुद्रायाततायिने क्षेत्राणाम्पये नमः स्वाहा ॥ २३ ॥ ॐ नमः सूतायाहन्त्यैवनानाम्पतये नमः स्वाहा ॥ २४॥ ॐ नमो रोहितायस्थपतये वृक्षाणाम्पतये नमः स्वाहा ॥ २५ ॥ ॐ नमोभुवन्तयेवारिवस्कृतायौषधीनाम्पतये नमः स्वाहा ॥ २६ ॥ ॐ नमोमन्त्रिणे व्वाणिजायकक्षाणाम्पतये नमः स्वाहा ॥ २७ ॥ ॐ नमऽउच्चैर्ग्घोषायाक्रन्दयतेपत्तीनाम्पतये नमः स्वाहा ॥ २८ ॥ ॐ नमः कृत्स्नायतायधावतेसत्त्वानाम्पतये नमः स्वाहा ॥ २९ ॥ ॐ सहमानायनिव्याधिनऽआव्याधिनीनाम्पतये नमः स्वाहा ॥ ३० ॥ ॐ नमोनिषङ्गिणेककुभायस्तेनानाम्पतये नमः स्वाहा ॥ ३१ ॥ ॐ नमोनिचेरवेपरिचरायारण्यानाम्पतये नमः स्वाहा ॥ ३२ ॥ ॐ नमो व्वञ्चतेपरिवञ्चतेस्तायूनाम्पतये स्वाहा ॥ ३३ ॥ ॐ नमोनिषङ्गिणऽइषुधिमतेतस्कराणाम्पतये नमः स्वाहा ॥ ३४॥ ॐ नमः सृकायिभ्योजिघाꣳसद्भ्योमुष्णताम्पतये नमः स्वाहा ॥ ३५ ॥ ॐ नमः सिमद्भ्योनक्तं चरद्भ्यो विकृन्तानाम्पतये नमः स्वाहा ॥ ३६ ॥ ॐ नमऽउष्णीषिणेगिरिचरायकुलुञ्चानाम्पतये नमः स्वाहा ॥ ३७ ॥ ॐ नमऽइषु-मद्भ्योधन्वायिभ्यश्चवो नमः स्वाहा ॥ ३८ ॥ ॐ नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमः स्वाहा ॥ ३९ ॥ ॐ नम आयच्छद्भ्योस्यद्भ्यश्च वो नमः स्वाहा ॥ ४० ॥ ॐ नमो विसृजद्भ्यो विध्यद्भ्यश्च वो नमः स्वाहा ॥ ४१ ॥ ॐ स्वपद्भ्यो जाग्रद्भ्यश्च वो नमः स्वाहा ॥ ४२ ॥ ॐ नमः शयानेभ्य आसीनेभ्यश्च वो नमः स्वाहा ॥ ४३ ॥ ॐ नमस्तिष्ठद्भ्योधावद्भ्यश्च वो नमः स्वाहा ॥ ४४॥ ॐ नमः सभाभ्यः सभापतिभ्यश्च वो नमः स्वाहा ॥ ४५ ॥ ॐ नमोश्वेभ्योश्वपतिभ्यश्च वो नमः स्वाहा ॥ ४६ ॥ ॐ नमऽआव्याधिनीभ्योव्विविध्यन्तीभ्यश्च वो नमः स्वाहा ॥ ४७ ॥ ॐ नम उगणाभ्यस्तृꣳहतीभ्यश्च वो नमः स्वाहा ॥ ४८ ॥ ॐ नमोगणेभ्यो गणपतिभ्यश्च वो नमः स्वाहा ॥ ४९ ॥ ॐ नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमः स्वाहा ॥ ५० ॥ ॐ नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमः स्वाहा ॥ ५१ ॥ ॐ नमोव्विरूपेभ्योविश्वरूपेभ्यश्च वो नमः स्वाहा ॥ ५२ ॥ ॐ नमः सेनाभ्यः सेनानिभ्यश्च वो नमः स्वाहा ॥ ५३ ॥ ॐ नमोरथिभ्योऽअरथेभ्यश्च वो नमः स्वाहा ॥ ५४ ॥ ॐ नमः क्षत्रिभ्यः सङ्ग्रहीतृभ्यश्च वो नमः स्वाहा ॥ ५५ ॥ ॐ नमो महद्भ्योअर्भकेभ्यश्च वो नमः स्वाहा ॥ ५६ ॥ ॐ नमस्तक्षभ्योरथकारेभ्यश्च वो नमः स्वाहा ॥ ५७ ॥ ॐ नमः कुलालेभ्यः कम्मरिभ्यश्च वो नमः स्वाहा ॥ ५८ ॥ ॐ नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमः स्वाहा ॥ ५९ ॥ ॐ नमः श्वनिभ्यो मृगयुभ्यश्च वो नमः स्वाहा ॥ ६० ॥ ॐ श्वभ्यः श्वपतिभ्यश्श्च वो नमः स्वाहा ॥ ६१ ॥ ॐ नमो भवाय च रुद्राय च स्वाहा ॥ ६२ ॥ ॐ नमः शर्वाय च पशुपतये च स्वाहा ॥ ६३ ॥ ॐ नमो नीलग्रीवाय च शितिकण्ठाय च स्वाहा ॥ ६४ ॥ ॐ नमः कपर्दिने च व्युप्तकेशाय च स्वाहा ॥ ६५ ॥ ॐ नमः सहस्राक्षाय च शतधन्वने च स्वाहा ॥ ६६ ॥ ॐ नमो गिरिशयाय च शिपिविष्टाय च स्वाहा ॥ ६७ ॥ ॐ नमो मीढुष्टमाय चेषुमते च स्वाहा ॥ ६८ ॥ ॐ नमो ह्रस्वाय च वामनाय च स्वाहा ॥ ६९ ॥ ॐ नमो बृहते च वर्षीयसे च स्वाहा ॥ ७० ॥ ॐ नमो व्वृद्धाय च सवृधे च स्वाहा ॥ ७१ ॥ ॐ नमोग्र्याय च प्रथमाय च स्वाहा ॥ ७२ ॥ ॐ नम आशवेचाजिराय च स्वाहा ॥ ७३ ॥ ॐ नमः शीघ्र्याय च शीभ्याय च स्वाहा ॥ ७४ ॥ ॐ नमः ऊर्म्याय चावस्वन्याय च स्वाहा ॥ ७५ ॥ ॐ नमो नादेयाय च द्वीपाय च स्वाहा ॥ ७६ ॥ ॐ नमो ज्येष्ठाय च कनिष्ठाय च स्वाहा ॥ ७७ ॥ ॐ नमः पूर्वजाय चापरजाय च स्वाहा ॥ ७८ ॥ ॐ नमो मध्यमाय चापगल्भाय च स्वाहा ॥ ७९ ॥ ॐ नमो जघन्याय च बुध्न्याय च

स्वाहा ॥ ८० ॥ ॐ नमः सोभ्याय च प्रतिसर्य्याय च स्वाहा ॥ ८१ ॥ ॐ नमो याम्याय च क्षम्याय च स्वाहा ॥ ८२ ॥ ॐ नमः श्लोकाय चावसान्याय च स्वाहा ॥ ८३ ॥ ॐ नम उर्व्वर्य्याय च खल्याय च स्वाहा ॥ ८४ ॥ ॐ नमो व्वन्याय च कक्ष्याय च स्वाहा ॥ ८५ ॥ ॐ नमः श्रवाय च प्रतिश्रवाय च स्वाहा ॥ ८६ ॥ ॐ नम आशुषेणाय चाशुरथाय च स्वाहा ॥ ८७ ॥ ॐ नमः शूराय चावभेदिने च स्वाहा ॥ ८८ ॥ ॐ नमो बिल्मिने च कवचिने च स्वाहा ॥ ८९ ॥ ॐ नमो व्वर्मिणे च व्वरूथिने च स्वाहा ॥ ९० ॥ ॐ नमः श्रुताय च श्रुतसेनाय च स्वाहा ॥ ९१ ॥ ॐ नमो दुन्दुभ्याय चाहनन्याय च स्वाहा ॥ ९२ ॥ ॐ नमो धृष्णवे च प्रमृशाय च स्वाहा ॥ ९३ ॥ ॐ नमो निषङ्गिणे चेषुधिमते च स्वाहा ॥ ९४ ॥ ॐ नमस्तीक्ष्णेषवे चायुधिने च स्वाहा ॥ ९५ ॥ ॐ नमः स्वायुधाय च सुधन्वने च स्वाहा ॥ ९६ ॥ ॐ नमः स्रुत्याय च पथ्याय च स्वाहा ॥ ९७ ॥ ॐ नमः काट्याय च नीप्याय च स्वाहा ॥ ९८ ॥ ॐ नमः कुल्याय च सरस्याय च स्वाहा ॥ ९९ ॥ ॐ नमो नादेयाय च व्वैशन्ताय च स्वाहा ॥ १०० ॥ ॐ नमः कूप्याय चावट्याय च स्वाहा ॥ १०१ ॥ ॐ नमो व्वीध्रयाय च तप्याय च स्वाहा ॥ १०२ ॥ ॐ नमो मेघ्याय च व्विद्युत्त्याय च स्वाहा ॥ १०३ ॥ ॐ नमो व्वर्ष्याय च वर्ष्याय च स्वाहा ॥ १०४ ॥ ॐ नमो व्वात्याय च रेष्म्याय च स्वाहा ॥ १०५ ॥ ॐ नमो व्वास्तव्याय च व्वास्तुपाय च स्वाहा ॥ १०६ ॥ ॐ नमः सोमाय च रुद्राय च स्वाहा ॥ १०७ ॥ ॐ नमस्ताम्राय चारुणाय च स्वाहा ॥ १०८ ॥ ॐ नमः शङ्गवे च पशुपतये च स्वाहा ॥ १०९ ॥ ॐ नम उग्राय च भीमाय च स्वाहा ॥ ११० ॥ ॐ नमोग्रेवधाय च दूरेवधाय च स्वाहा ॥ १११ ॥ ॐ नमो हन्त्रे च हनीयसे च स्वाहा ॥ ११२ ॥ ॐ नमो व्वृक्षेभ्यो हरिकेशेभ्यः स्वाहा ॥ ११३ ॥ ॐ नमस्ताराय स्वाहा ॥ ११४ ॥ ॐ नमः शम्भवाय च मयोभवाय च स्वाहा ॥ ११५ ॥ ॐ नमः शङ्कराय च मयस्कराय च स्वाहा ॥ ११६ ॥ ॐ नमः शिवाय च शिवतराय च स्वाहा ॥ ११७ ॥ ॐ नमः पार्य्याय चावार्य्याय च स्वाहा ॥ ११८ ॥ ॐ नमः प्रतरणाय चोत्तरणाय च स्वाहा ॥ ११९ ॥ ॐ नस्तीर्थ्याय च कूल्याय च स्वाहा ॥ १२० ॥ ॐ नमः शष्प्याय च फेन्याय च स्वाहा ॥ १२१ ॥ ॐ नमः सिकत्याय च प्रवाह्याय च स्वाहा ॥ १२२ ॥ ॐ नमः किरिं॰शिलाय च क्षयणाय च स्वाहा ॥ १२३ ॥ ॐ नमः कपर्दिने च पुलस्तये च स्वाहा ॥ १२४ ॥ ॐ नमः इरिण्याय च प्रपथ्याय च स्वाहा ॥ १२५ ॥ ॐ नमो व्रज्याय च गोष्ठ्याय च स्वाहा ॥ १२६ ॥ ॐ नमस्तल्प्याय च गेह्याय च स्वाहा ॥ १२७ ॥ ॐ नमो हृदय्याय च निवेष्प्याय च स्वाहा ॥ १२८ ॥ ॐ नमः काट्याय च गह्वरेष्ठाय च स्वाहा ॥ १२९ ॥ ॐ नमः शुष्क्याय च हरित्त्याय च स्वाहा ॥ १३० ॥ ॐ नमः पाᳬसव्याय च रजस्याय च स्वाहा ॥ १३१ ॥ ॐ नमो लोप्याय चोलप्याय च स्वाहा ॥ १३२ ॥ ॐ नम ऊर्व्याय च सूर्व्याय च स्वाहा ॥ १३३ ॥ ॐ नमः पर्णाय च पर्णशदाय च स्वाहा ॥ १३४ ॥ ॐ नम उद्गुरमाणाय चाभिघ्नते च स्वाहा ॥ १३५ ॥ ॐ नम आखिदते च प्रखिदते च स्वाहा ॥ १३६ ॥ ॐ नम इषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमः स्वाहा ॥ १३७ ॥ ॐ नमो वः किरिकेभ्यो देवानाᳬ॰ हृदयेभ्यः स्वाहा ॥ १३८ ॥ ॐ नमो व्विचिन्वत्केभ्यः स्वाहा ॥ १३९ ॥ ॐ नमो व्विक्षिणत्केभ्यः स्वाहा ॥ १४० ॥ ॐ नम आनिर्हतेभ्यः स्वाहा ॥ १४१ ॥ ॐ द्रापेऽअन्धस॰ स्वाहा ॥ १४२ ॥ ॐ इमारुद्राय॰ स्वाहा ॥ १४३ ॥ ॐ यातेरुद्र॰ स्वाहा ॥ १४४ ॥ ॐ परिनोरुद्रस्य॰ स्वाहा ॥ १४५ ॥ ॐ मीढुष्टमशिवतम॰ स्वाहा ॥ १४६ ॥ ॐ विकिरिद्रविलोहित॰ स्वाहा ॥ १४७ ॥ ॐ सहस्राणि सहस्रशो॰ स्वाहा ॥ १४८ ॥ ॐ असङ्ख्याता सहस्राणि स्वाहा ॥ १४९ ॥ ॐ अस्मिन्महत्यर्णवे स्वाहा ॥ १५० ॥ ॐ नीलग्रीवाः शितिकण्ठा॰ स्वाहा ॥ १५१ ॥ ॐ नीलग्रीवाः क्षितिकण्ठाः शर्वा॰ स्वाहा ॥ १५२ ॥ ॐ ये वृक्षेषु स्वाहा ॥ १५३ ॥ ॐ ये भूतानामधिपतयो॰ स्वाहा ॥ १५४ ॥ ॐ ये पथाम्पथि॰ स्वाहा ॥ १५५ ॥ ॐ ये तीर्थानि॰ स्वाहा ॥ १५६ ॥ ॐ येन्नेषुव्विविद्ध्यन्ति॰ स्वाहा ॥ १५७ ॥ ॐ यऽएतावन्तश्च॰ स्वाहा ॥ १५८ ॥ ॐ नमोस्तु रुद्रेभ्यो ये दिवि॰ स्वाहा ॥ १५९ ॥ ॐ नमोस्तु रुद्रेभ्यो येन्तरिक्षे॰ स्वाहा ॥ १६० ॥ ॐ नमोस्तु रुद्रेभ्यो ये पृथिव्यां॰ स्वाहा ॥ १६१ ॥

एवमेकषष्ट्युत्तरशतधामन्त्रविभागपक्षहोमं घृताक्ततिलाहुतिभिः कृत्वा।

१६१ आहुतिपक्ष से होम—यहाँ पर १६१ मन्त्रों से आहुति देकर प्रधान देवता के होम करने की विधि बताई गयी है, जिसमें मूल में लिखित 'ॐ नमस्ते रुद्रमन्यव उतोत इषवे नमः' इत्यादि १६१ मन्त्रविभागों द्वारा घृत से युक्त तिल की आहुतियाँ देकर फिर आगे लिखे प्रकार से नमक-चमकयुक्त आहुतियाँ देनी चाहिये।

ॐ वाजश्चमे० ॥ १ ॥ ॐ प्राणश्चमे० ॥ २ ॥ ॐ ओजश्चमे० ॥ ३ ॥ ॐ ज्यैष्ठ्यञ्चमऽआधिपत्त्यञ्चमे० स्वाहा ॥ ४ ॥ इत्याद्यचमकानुवाकहोमं कुर्य्यात् ॥ १ ॥ पुनः ॐ नमस्तेरुद्र० इत्याद्येकषष्ट्युत्तरशतधा होमं कृत्वा ॐ सत्यञ्चमे० ॥ ५ ॥ ॐ ऋतञ्चमे० ॥ ६ ॥ ॐ यन्ताचमे० ॥ ७ ॥ ॐ शञ्चमेमयश्चमे स्वाहा० ॥ ८ ॥ इति द्वितीयचमकानुवाक होमं कुर्यात् ॥ २ ॥ ततः पुनः ॐ नमस्ते रुद्र० इत्यादि (१६१) होमं कृत्वा ॐ ऊर्क्क्चमेसूनृताचमे० ॥ ९ ॥ ॐ रयिश्चमे० ॥ १० ॥ ॐ व्वित्तञ्चमे० ॥ ११ ॥ ॐ व्व्रीहयश्चमे० स्वाहा ॥ १२ ॥ इति तृतीयचमकानुवाकहोमं कुर्यात् ॥ ३ ॥ पुनः ॐ नमस्ते रुद्र० इत्यादि (१६१) होमं कृत्वा ॐ अश्माचमे० ॥ १३ ॥ ॐ अग्निश्चमऽआपश्चमे० ॥ १४ ॥ ॐ व्वसुचमे० स्वाहा ॥ १५ ॥ इति चतुर्थानुवाकहोमं कुर्यात् ॥ ४ ॥ पुनः ॐ नमस्तेरुद्र० इत्यादि (१६१) होमं कृत्वा ॐ अग्निश्चमऽइन्द्रश्चमे० ॥ १६ ॥ ॐ मित्रश्चमइन्द्रश्चमे० ॥ १७ ॥ ॐ पृथिवीचम० स्वाहा ॥ १८ ॥ इति पञ्चमानुवाकहोमं कुर्यात् ॥ ५ ॥ पुनः ॐ नमस्ते० इत्यादि ॥ १६१ ॥ होमं कृत्वा—ॐ अठं० शुश्चमे० ॥ १९ ॥ ॐ आग्रयणश्चमे० ॥ २० ॥ ॐ स्रुवश्चमे० स्वाहा ॥ २१ ॥ इति षष्ठानुवाकहोमः ॥ ६ ॥ पुनः ॐ नमस्ते० इत्यादि (१६१) होमं कृत्वा ॐ अग्निश्चमे० ॥ २२ ॥ ॐ व्व्रतञ्चम० स्वाहा ॥ २३ ॥ इति सप्तमानुवाकहोमः ॥ ७ ॥ पुनः ॐ नमस्ते० इत्यादि (१६१) होमं कृत्वा ॐ एकाचमे० स्वाहा ॥ २४ ॥ इत्यष्टमानुवाकहोमः ॥ ८ ॥ पुनर्नमस्ते इत्यादि (१६१) हुत्वा ॐ चतस्त्रश्चमे० स्वाहा ॥ २५ ॥ इति नवमानुवाकहोमः ॥ ९ ॥ पुनर्नमस्ते इत्यादि (१६१) हुत्वा ॐ त्र्यविश्चमे० ॥ २६ ॥ ॐ पृष्ठवाट्चमे० स्वाहा ॥ २७ ॥ इति दशानुवाकहोमः ॥ १० ॥ पुनर्नमस्ते इत्यादि (१६१) हुत्वा ॐ व्वाजायस्वाहा० ॥ २८ ॥ ॐ आयुर्य्यज्ञेन० स्वाहा ॥ २९ ॥ इत्येकादशानुवाकहोमं कुर्य्यात् ॥ ११ ॥ एवमेकादशावर्तनेन रूपकाख्यो रुद्रो भवति एकादशावृत्तौ होमान्ते। यज्जाग्रत० इत्यादि ६ सहस्त्रशीर्षा० १६ अद्भ्यः संभृत० ६ आशुः शिशान० १७ विभ्राड्बृहत्० १६ इत्यादिपञ्चसूक्तैः पञ्चाहुतीर्हुत्वा ततो नमस्तेरुद्र० इति रुद्राध्यायेन पूर्वोक्तप्रकारेण हुत्वा होमान्ते एकैकेन चमकविभागेन हुत्वा ॐ ऋतंवाचं० स्वाहा ॥ १ ॥ ॐ यन्मेछिद्रञ्चक्षुषो० स्वाहा ॥ २ ॥ ॐ भूर्भुवः स्वः तत्सवितु० स्वाहा ॥ ३ ॥ ॐ कयानश्चित्र० स्वाहा ॥ ४ ॥ ॐ कस्त्वासत्यो० स्वाहा ॥ ५ ॥ ॐ अभीषुण० स्वाहा ॥ ६ ॥ ॐ कयात्वन्न० स्वाहा ॥ ७ ॥ ॐ इन्द्रोव्विश्वस्य० स्वाहा ॥ ८ ॥ ॐ शन्नोमित्र० स्वाहा ॥ ९ ॥ ॐ शन्नोव्वात० स्वाहा ॥ १० ॥ ॐ अहानिश० स्वाहा ॥ ११ ॥ ॐ शन्नोदेवी० स्वाहा ॥ १२ ॥ ॐ स्योनापृथिवि० स्वाहा ॥ १३ ॥ ॐ आपोहिष्ठा० स्वाहा ॥ १४ ॥ ॐ योवः शिवतमो० स्वाहा ॥ १५ ॥ ॐ तस्माऽअरङ्ग० स्वाहा ॥ १६ ॥ ॐ द्यौः शान्तिरन्तरिक्षॐ० स्वाहा ॥ १७ ॥ ॐ दृतेदृठं०हमा० स्वाहा ॥ १८ ॥ ॐ दृतेदृठं०हमाज्योक्ते० स्वाहा ॥ १९ ॥ ॐ नमस्तेहरसे० स्वाहा ॥ २० ॥ ॐ नमस्तेस्तु० स्वाहा ॥ २१ ॥ ॐ यतोयतः० स्वाहा ॥ २२ ॥ ॐ सुमित्रियान० स्वाहा ॥ २३ ॥ ॐ तच्चक्षुर्देवहितं० स्वाहा ॥ २४ ॥ इति शान्त्यध्यायमन्त्रैश्चतुर्विंशतिराहुतीर्जुहुयात्। एवं प्रधानहोमं विधाय सर्वे ऋत्विजः प्रागुक्तपञ्चाङ्गन्यासान् कुर्युः। एवं क्रमेण लघुरुद्रहोमं महारुद्रमतिरुद्रहोमं वा कुर्यात्। इति रुद्रहोमः।

नमक-चमक के साथ होम—सामान्य रुद्रहोम ऊपर के १६१ मन्त्रों से करने के पश्चात् 'ॐ वाजश्चमे०' इत्यादि अनुवाक से होम करे। पुनः १६१ मन्त्र से होम कर 'सत्यञ्चमे०' इत्यादि द्वितीय अनुवाक से होम करे। फिर १६१ मन्त्रों से हवनकर 'ऊर्क्क चमे०' इत्यादि तृतीय अनुवाक से होम करे। पुनः १६१ नमस्ते इत्यादि मन्त्रों के द्वारा होम कर चतुर्थ अनुवाक से होम करे। पुनः १६१ मन्त्रों से आहुति देकर पञ्चम अनुवाक के मन्त्रों से होम करे। फिर १६१ मन्त्रों से आहुति देकर षष्ठ अनुवाक के मन्त्रों से होम करे। फिर १६१ नमस्ते इत्यादि मन्त्राहुति के उपरान्त सातवें

अनुवाक से हवन करे। इस प्रकार बार-बार १६१ मन्त्रों की आहुति देकर एकादशवें अनुवाक-पर्यन्त होम करना चाहिये। यह एकादश रुद्ररूप होता है। होम के अन्त में 'यज्जागृतादि०' छः मन्त्रों से एक, फिर पुरुषसूक्त के १६ मन्त्रों से एक, 'अद्भ्यः संभृतं०' इत्यादि छः से एक, 'आशुशिशानो०' इन १७ मन्त्रों से एक, फिर विभ्राट्सूक्त से एक—इस प्रकार पाँच आहुतियाँ दे। तदुपरान्त नमस्तुरुद्र इत्यादि मन्त्रों से १६१ आहुति दे। फिर नमक-चमकविभाग से आहुति देकर 'ऋतं वाचं प्रपद्ये०' इत्यादि से २४ आहुतियाँ देनी चाहिये। फिर प्रधान होम करके ऋत्विज पञ्चाङ्ग न्यास करे। इस प्रकार से क्रमशः लघुरुद्रहोम या महारुद्रहोम, जो भी करना हो, करना चाहिये।

पीठदेवताहोमः

तत्र पीठदेवताभ्यो लिङ्गतोभद्रदेवताभ्यो रुद्रयन्त्रदेवताभ्यश्चैकैकामाज्याहुतिं जुहुयुः। तद्यथा—ॐ मण्डकाय स्वाहा॥ १॥ ॐ कालाग्निरुद्राय०॥ २॥ ॐ आधारशक्त्यै०॥ ३॥ ॐ कूर्माय०॥ ४॥ धरायै०॥ ५॥ सुधासिन्धवे०॥ ६॥ श्वेतद्वीपाय०॥ ७॥ सुराङ्घ्रिपाय०॥ ८॥ मणिहर्म्याय०॥ ९॥ हेमपीठाय०॥ १०॥ धर्माय०॥ ११॥ ज्ञानाय०॥ १२॥ वैराग्याय०॥ १३॥ ऐश्वर्याय०॥ १४॥ अधर्माय०॥ १५॥ अज्ञानाय०॥ १६॥ अवैराग्याय०॥ १७॥ अनैश्वर्याय०॥ १८॥ अनन्ताय स्वाहा॥ १९॥ तत्त्वपद्माय०॥ २०॥ आनन्दमयकन्दाय०॥ २१॥ संविन्नालाय०॥ २२॥ विकारमयकेसरेभ्य०॥ २३॥ प्रकृत्यात्मकपत्रेभ्य०॥ २४॥ सूर्यमण्डलाय०॥ २५॥ चन्द्रमण्डलाय०॥ २६॥ अग्निमण्डलाय०॥ २७॥ सत्त्वाय०॥ २८॥ रजसे०॥ २९॥ तमसे०॥ ३०॥ आत्मने॥ ३१॥ अन्तरात्मने०॥ ३२॥ परमात्मने०॥ ३३॥ ज्ञानात्मने०॥ ३४॥ मायातत्त्वाय०॥ ३५॥ कलातत्त्वाय०॥ ३६॥ विद्यातत्त्वाय०॥ ३७॥ परतत्त्वाय स्वाहा॥ ३८॥ इति पीठदेवताहोमः।

पीठदेवता होम—फिर पीठदेवताओं का पूजन लिङ्गतोभद्र (चतुर्लिङ्गतोभद्र अथवा अष्टलिङ्गतोभद्र अथवा द्वादशलिङ्गतोभद्र) के देवताओं का होम (जिनका पूजन किया गया हो) करे तथा रुद्रयन्त्र के देवताओं का होम करे। इनमें से प्रत्येक देवता को एक-एक आहुति देनी चाहिये। ये आहुतियाँ 'ॐ मण्डकाय स्वाहा' इत्यादि मूल में लिखित ३८ मन्त्रों से देनी चाहिये।

पीठशक्तिहोमः

ॐ वामायै स्वाहा॥ १॥ ज्येष्ठायै०॥ २॥ रौद्र्यै०॥ ३॥ काल्यै०॥ ४॥ कलविकरिण्यै०॥ ५॥ बलविकरिण्यै०॥ ६॥ बलप्रमथन्यै०॥ ७॥ सर्वभूतदमन्यै०॥ ८॥ मनोन्मन्यै०॥ ९॥ इति नवपीठशक्तिहोमः। ॐ नमो भगवते सकलगुणात्मशक्तियुक्ताय अनन्तयोगपीठात्मने स्वाहा॥ १॥

पीठशक्ति होम—पीठदेवताओं का होम करने के पश्चात् फिर 'ॐ वामायै स्वाहा' इत्यादि नौ मन्त्रों से नौ पीठशक्तियों के लिये एक-एक आहुति देकर फिर 'ॐ नमो भगवते सकलगुणात्मशक्तियुक्ताय अनन्तयोगपीठात्मने स्वाहा' इस मन्त्र से एक आहुति दे। तदुपरान्त आगे लिखे मन्त्रों से रुद्रयन्त्र के आवरणदेवताओं (एक से लेकर सात आवरणों तक के देवताओं) को एक-एक आहुति देनी चाहिये।

यन्त्रावरणदेवताहोमः

ॐ नमो भगवते रुद्राय स्वाहा॥ १॥ सद्योजाताय०॥ १॥ वामदेवाय०॥ २॥ अघोराय०॥ ३॥ तत्पुरुषाय०॥ ४॥ ईशानाय०॥ ५॥ नन्दिने०॥ ६॥ महाकालाय०॥ ७॥ गणेश्वराय०॥ ८॥ वृषभाय०॥ ९॥ भृङ्गिरिटये०॥ १०॥ स्कन्दाय०॥ ११॥ उमायै०॥ १२॥ चण्डीश्वराय०॥ १३॥ इति प्रथमावरणम्। **अनन्ताय०॥ १४॥ सूक्ष्माय०॥ १५॥ शिवाय०॥ १६॥ एकपदे०॥ १७॥ एकरुद्राय०॥ १८॥ त्रिमूर्त्तये०॥ १९॥ श्रीकण्ठाय०॥ २०॥ वामदेवाय०॥ २१॥**

ज्येष्ठाय० ॥ २२ ॥ श्रेष्ठाय० ॥ २३ ॥ रुद्राय० ॥ २४ ॥ कालाय० ॥ २५ ॥ कलविकरणाय० ॥ २६ ॥ बलाय० ॥ २७ ॥ बलविकरणाय० ॥ २८ ॥ बलप्रथमनाय० ॥ २९ ॥ इति द्वितीयावरणम्। अणिम्ने० ॥ ३० ॥ महिम्ने० ॥ ३१ ॥ लघिम्ने० ॥ ३२ ॥ गरिम्णे० ॥ ३३ ॥ प्राप्त्यै० ॥ ३४ ॥ प्रकाम्यै० ॥ ३५ ॥ ईशितायै० ॥ ३६ ॥ वशितायै० ॥ ३७ ॥ ब्राह्मयै० ॥ ३८ ॥ माहेश्वर्यै० ॥ ३९ ॥ कौमार्यै० ॥ ४० ॥ वैष्णव्यै० ॥ ४१ ॥ वाराह्यै० ॥ ४२ ॥ इन्द्राण्यै० ॥ ४३ ॥ चामुण्डायै० ॥ ४४ ॥ चण्डिकायै० ॥ ४५ ॥ असिताङ्गभैरवाय० ॥ ४६ ॥ रुरुभैरवाय० ॥ ४७ ॥ चण्डभैरवाय० ॥ ४८ ॥ क्रोधभैरवाय० ॥ ४९ ॥ उन्मत्तभैरवाय० ॥ ५० ॥ कालभैरवाय० ॥ ५१ ॥ भीषणभैरवाय० ॥ ५२ ॥ संहारभैरवाय० ॥ ५३ ॥ इति तृतीयावरणम्। भवाय० ॥ ५४ ॥ शर्वाय० ॥ ५५ ॥ ईशानाय० ॥ ५६ ॥ पशुपतये० ॥ ५७ ॥ रुद्राय० ॥ ५८ ॥ उग्राय० ॥ ५९ ॥ भीमाय० ॥ ६० ॥ महादेवाय० ॥ ६१ ॥ इति शिवाष्टकहोमः। अनन्ताय० ॥ ६२ ॥ वासुकये० ॥ ६३ ॥ तक्षकाय० ॥ ६४ ॥ कुलीरकाय० ॥ ६५ ॥ कर्कोटकाय० ॥ ६६ ॥ शङ्खपालाय० ॥ ६७ ॥ कम्बलाय० ॥ ६८ ॥ अश्वतराय० ॥ ६९ ॥ इत्यष्टनागहोमः। वैन्याय० ॥ ७० ॥ पृथवे० ॥ ७१ ॥ हैहयाय० ॥ ७२ ॥ अर्जुनाय० ॥ ७३ ॥ शाकुन्तलेयाय० ॥ ७४ ॥ भरताय० ॥ ७५ ॥ नलाय० ॥ ७६ ॥ रामाय० ॥ ७७ ॥ इति नृपाष्टकहोमः। हिमवते० ॥ ७८ ॥ निषधाय० ॥ ७९ ॥ विन्ध्याय० ॥ ८० ॥ माल्यवते० ॥ ८१ ॥ पारियात्राय० ॥ ८२ ॥ मलयाय० ॥ ८३ ॥ हेमकूटाय० ॥ ८४ ॥ गन्धमादनाय० ॥ ८५ ॥ इति गिर्य्यष्टकहोमः। इति चतुर्थावरणम्। इन्द्राय० ॥ ८६ ॥ अग्नये० ॥ ८७ ॥ यमाय० ॥ ८८ ॥ निर्ऋतये० ॥ ८९ ॥ वरुणाय० ॥ ९० ॥ वायवे० ॥ ९१ ॥ कुबेराय० ॥ ९२ ॥ ईशानाय० ॥ ९३ ॥ इतीन्द्रादिदेवहोमः। शच्यै० ॥ ९४ ॥ स्वाहायै० ॥ ९५ ॥ वाराह्यै० ॥ ९६ ॥ खड्गिन्यै० ॥ ९७ ॥ वारुण्यै० ॥ ९८ ॥ वायव्यै० ॥ ९९ ॥ कौबेर्य्यै० ॥ १०० ॥ ईशान्यै० ॥ १०१ ॥ इत्यष्टशक्तिहोमः। वज्राय० ॥ १०२ ॥ शक्त्यै० ॥ १०३ ॥ दण्डाय० ॥ १०४ ॥ खड्गाय० ॥ १०५ ॥ पाशाय० ॥ १०६ ॥ अङ्कुशाय० ॥ १०७ ॥ गदायै० ॥ १०८ ॥ त्रिशूलाय० ॥ १०९ ॥ इत्यायुधहोमः। ऐरावताय० ॥ ११० ॥ मेषाय० ॥ १११ ॥ महिषाय० ॥ ११२ ॥ प्रेताय० ॥ ११३ ॥ मकराय० ॥ ११४ ॥ हरिणाय० ॥ ११५ ॥ नराय० ॥ ११६ ॥ वृषभाय० ॥ ११७ ॥ इति वाहनहोमः। ऐरावताय० ॥ ११८ ॥ पुण्डरीकाय० ॥ ११९ ॥ वामनाय० ॥ १२० ॥ कुमुदाय० ॥ १२१ ॥ अञ्जनाय० ॥ १२२ ॥ पुष्पदन्ताय० ॥ १२३ ॥ सार्वभौमाय० ॥ १२४ ॥ सुप्रतिकाय० ॥ १२५ ॥ इति गजहोमः। इति पञ्चमावरणम्। इन्द्राय० ॥ १२६ ॥ अग्नये० ॥ १२७ ॥ यमाय० ॥ १२८ ॥ निर्ऋतये० ॥ १२९ ॥ वरुणाय० ॥ १३० ॥ वायवे० ॥ १३१ ॥ कुबेराय० ॥ १३२ ॥ ईशानाय० ॥ १३३ ॥ ब्रह्मणे० ॥ १३४ ॥ अनन्ताय० ॥ १३५ ॥ इति दिक्पालहोमः। इति षष्ठावरणम्। विरूपाक्षाय० ॥ १३६ ॥ विश्वरूपाय० ॥ १३७ ॥ पशुपतये० ॥ १३८ ॥ ऊर्ध्वलिङ्गाय० ॥ १३९ ॥ शेषाय० ॥ १४० ॥ तक्षकाय० ॥ १४१ ॥ अनन्ताय० ॥ १४२ ॥ वासुकये० ॥ १४३ ॥ शङ्खपालाय० ॥ १४४ ॥ महापद्माय० ॥ १४५ ॥ कम्बलाय० ॥ १४६ ॥ कर्कोटकाय० ॥ १४७ ॥ इत्यष्टनागहोमः। इति सप्तमावरणम्। इति रुद्रयन्त्रदेवताहोमः।

यन्त्र के आवरण के देवताओं का होम—रुद्रयन्त्र के आवरणदेवताओं के होममन्त्र मूल में दिये गये हैं। कुल सात आवरणों के 'ॐ नमो भगवते रुद्राय स्वाहा०' इत्यादि १४७ (एक सौ सैंतालीस) मन्त्रों द्वारा हवन करे।

एवं होमं कृत्वा स्विष्टकृदादिप्रायश्चित्तहोमान्तं समाप्य इन्द्रादिदिक्पालेभ्यो नवग्रहेभ्यः क्षेत्रपालादिभ्यश्च माषभक्तबलींस्तत्तन्मन्त्रैर्दद्यात्। ततः पूर्णाहुतिहोमः—

घृतकुम्भवसोर्धारां पातयेदनलोपरि। औदुम्बरीमथार्द्रां च ऋज्वीं कोटरवर्जिताम्॥
बाहुमात्रां स्रुचं कृत्वा ततः स्तम्भद्वयोपरि। घृतधारां तथा चाज्यमग्रेरुपरि पातयेत्॥
श्रावयेत्सूक्तमाग्नेयं वैष्णवं रौद्रमैन्दवम्। महावैश्वानरं साम ज्येष्ठसाम च पाठयेत्॥

इति मात्स्योक्तः पूर्णाहुतिहोमः।

फिर स्विष्टकृत् होम तथा प्रायश्चित्त होम करे। तत्पश्चात् इन्द्रादि दश दिक्पालों, नवग्रहों, क्षेत्रपालों, योगिनियों, वास्तुदेवताओं आदि को बलि प्रदान करे। बलि में उड़द एवं भात का प्रयोग उन-उन दिक्पालादि देवों के मन्त्रों से करे। तत्पश्चात् पूर्णाहुति होम करे। मत्स्यपुराण के अनुसार घृत के कुम्भ (कलश) से घी की वसुधारा होमकुण्ड के ऊपर छोड़नी चाहिये। इसके लिये गूलर की गीली तथा सूखी कोटररहित बाहुमात्र 'स्रुच' बनवाकर फिर दो स्तम्भों के ऊपर साधकर उससे घृत की धारा तथा आज्य को अग्नि के ऊपर डालना चाहिये। इस कार्य में आग्नेय सूक्त, वैष्णवसूक्त, रौद्रसूक्त, ऐन्द्रसूक्त, महावैश्वानर साम तथा ज्येष्ठ साम का पाठ करना चाहिये। यह मत्स्यपुराण के अनुसार वसोर्धारा की विधि है।

अत्र चतुर्गृहीताज्येन समुद्रादूर्मीत्यादिमन्त्रैर्मूलमन्त्रेण च वाजश्चमे इत्यनुवाकैश्च सततां वसोर्द्धारां जुहुयात्। एवं पूर्णाहुतिं वसोर्धारां च हुत्वा नमस्ते रुद्र इत्यादिभिः रुद्रं स्तुत्वा प्रणीताविमोकान्तं कर्म्मशेषं समाप्य आचार्यादिभ्यो दक्षिणां दत्त्वा जपहोमश्रेयो गृह्णीयात्। तत आचार्यादयो रुद्रग्रहकलशोदकेन यजमानस्याभिषेकं कुर्युः। ततो यजमानो ग्रहाणां रुद्रस्य चोत्तरपूजां महानीराजनं च कृत्वा त्रिः परिक्रम्य साष्टाङ्गं प्रणम्य 'ॐ कृतेनानेन ब्राह्मणद्वारा अमुकरुद्रजपेन श्रीसदाशिवमहारुद्रः प्रीयतामि'ति पठित्वा देवदक्षिणभागे जलमुत्सृजेत्। ततो देवाभिमुखः कृताञ्जलिपुटः सन्—

जपन्यासार्चनं होमं यत्कृतं तु मयाद्य वै। न्यूनातिदोषरहितं कृतं कर्म मया प्रभो॥ १॥
भवत्वेतत्कृपासिन्धो क्षमस्व च नमोऽस्तु ते। पूजान्यासादिकं देव कृतं यत्त्वदनुग्रहात्॥ २॥
तेन मत्कर्मणा रुद्र प्रीतो भव वरप्रदः। नमः शिवाय शान्ताय सगणायादिहेतवे।
निवेदयामि चात्मानं त्वं गतिः परमेश्वर॥ ३॥
न्यूनातिरिक्तं तत्पूर्णं प्रसादादस्तु शङ्कर। एतत्कृतेन देवेश सदा मे वरदो भव॥ ४॥

इति देवं क्षमाप्य विसृज्य प्रतिमादिकमाचार्यादिभ्यो दत्त्वाग्निं सम्पूज्य गच्छगच्छेति विसृजेत्। ततो यथाशक्तिब्राह्मणान् सम्भोजयित्वा यस्यस्मृत्या० इत्यादि जपित्वा कर्म्मसम्पूर्णतां वाचयित्वा कर्मेश्वरार्पणं कृत्वा सुहृद्युक्तो भुञ्जीत। इति रुद्रहोमपद्धतिः।

परन्तु इस अनुष्ठान में तो चतुर्गृहीत आज्य से 'समुद्रादूर्मि०' इत्यादि मन्त्रों से तथा 'वाजश्च मे' इत्यादि अनुवाक से वसुधारा करनी चाहिये। वसोर्धारा मन्त्रों के उच्चारण होने तथा पूर्ण आज्य का होम होने-पर्यन्त सतत् करते रहना चाहिये। इस प्रकार पूर्णाहुति तथा वसोर्धारा होम करके 'नमस्ते रुद्रमन्यव उतोतइषवे नमः०' इत्यादि मन्त्रों द्वारा रुद्र की स्तुति करके प्रणीता विमोकादि कर्म समाप्त करके आचार्यादि ऋत्विज मिलकर 'रुद्रकलश' के जल से यजमान का अभिषेक करें। फिर यजमान रुद्र की उत्तरपूजा तथा महानीराजन करके तीन परिक्रमा कर साष्टाङ्ग प्रणाम करे। फिर 'ॐ कृतेनानेन ब्राह्मणद्वारा अमुकरुद्रजपेन श्रीसदाशिवमहारुद्रः प्रीयताम्' यह पढ़कर देव (रुद्र = शिव) के दक्षिण भाग में जल छोड़े। फिर देव की ओर मुख करके हाथ जोड़कर मूल में लिखित 'जपन्यासार्चनं होमं' इत्यादि चार श्लोकों को पढ़कर क्षमा माँगकर देवमूर्ति तथा यन्त्रादि को आचार्यादि को दान कर पूजन कर 'गच्छ गच्छ०' इत्यादि मन्त्र से अग्नि एवं देवताओं का विसर्जन कर यथाशक्ति ब्राह्मणों को भोजन कराकर 'यस्य स्मृत्या च नामोक्त्या०' इत्यादि जप कर कर्म की सम्पूर्णता का वाचन कर उसे ईश्वर को अर्पित कर यजमान स्वयं तथा मित्रादि के साथ भोजन करे।

कामनाभेदेन रुद्रहोमद्रव्याणि

लिङ्गपुराणे—

रुद्राध्यायेन विधिना घृतेन नियतः क्रमात्। सघृतेन तिलेनैव कमलेन विशेषतः॥

दूर्वया घृतगोक्षीरमिश्रया मधुना तथा। चरुणा सघृतेनैव केवलं पयसाथ वा॥
यस्तु जुहुयात्कालमृत्योः प्रतीकारः प्रकीर्तितः॥

कामनाभेद से रुद्रहोम के द्रव्यों का कथन—लिङ्गपुराण में कहा गया है—रुद्राध्याय की विधि से तिल, घृत एवं कमल से अथवा दूर्वा, घृत एवं गोदुग्ध के मिश्रण से तथा मधु से अथवा चरु, घृत से अथवा केवल गोदुग्ध से जो होम करता है, उसकी अकालमृत्यु दूर हो जाती है।

हेमाद्रौ—

पापक्षयेऽभिचारे च तथा व्याधिविमोचने। पलाशसमिधः कार्या नान्यत्रोत्पातदर्शनात्॥
औदुम्बर्याश्च समिधो मध्वक्ताश्च तथाक्षताः। ग्राह्याश्चान्नाद्यकामेन श्रियै शान्त्यै च पायसम्॥
सर्वकामेन वा ग्राह्या आयुर्वृद्ध्यै तिलाः स्मृताः। घृताक्ता अथवा दूर्वास्तेजस्कामेन वै घृतम्॥
व्रीहयः पशुकामेन राष्ट्रकामेन वै यवाः। उपविश्य शुचौ देशे दूर्वास्तम्बे जपेद्यदि॥
जुहुयाच्छ्वेतपुष्पैर्वा स विश्वं कुरुते वशम्। स्पृष्ट्वाश्वत्थं जपेद्यस्तु रुद्रैकादशिनीं नरः॥
रोगाञ्ज्वरातिसारादीन्नाशयेदुल्बणानपि। होमः पलाशसमिधा कर्तव्यो मधुसंयुतः॥

हेमाद्रि में कहा गया है—पापक्षय के लिये तथा रोगनाश के लिये होम में पलाश की समिधाओं का उपयोग करना चाहिये। अन्य कार्यों में उत्पातकारक होने से पलाश की समिधा का प्रयोग नहीं करना चाहिये। गूलर की समिधाओं से तथा अक्षत को मधु मिलाकर अन्नादि की कामना से होम करना चाहिये, श्रीप्राप्ति तथा शान्ति की कामना, सभी कामनाओं की पूर्ति तथा आयुष्य-वृद्धि के लिये तिलों द्वारा होम करना चाहिये। जिन्हें घृत से आक्त कर लेना चाहिये। अथवा घृताक्त दूर्वा का होम करना चाहिये। तेज की प्राप्ति के लिये घी का होम करना चाहिये। पशुवृद्धि की कामना से व्रीहि (धान) आदि से होम करना चाहिये। राष्ट्र की कामना से यव से होम करना चाहिये। यदि पवित्र स्थान में बैठकर दूर्वास्तम्ब (उगी हुई घास) पर जप करे तथा श्वेत पुष्पों से होम करे तो विश्व को वश में कर लेता है। जो पीपल वृक्ष का स्पर्श करके रुद्रैकादशिनी का जप करता है, वह ज्वर, अतिसार आदि उल्बण रोगों को नष्ट करता है। उसे बाद में (जप के उपरान्त) पलाश की समिधाओं से हवन करना चाहिये॥ १-६॥

एकादशमहारुद्रान् परचक्रागमे पुनः। जपेदेकादशगुणान् होमस्तु विधिवत्स्मृतः॥
तिलैराज्येन संसिक्तैर्विधिवदभिवर्तयेत्। रुद्रैकादशिनी जाप्ये शतमेकोनमिष्यते॥
सहस्राश्च तथा रौद्रे नवत्येकोनया युतः। एवं त्रिगुणिता कार्या महारुद्रातिरुद्रयोः॥
वृष्टिकामेन वा योज्या हस्त्यश्वामयशान्तये। उद्भवेत्यद्भुतानां च ग्रहाणां तु विपर्यये॥
गृहग्रामादिशान्त्यै च तिलाश्चाज्येन संयुताः। होमान्ते सर्वकामानां कूष्माण्डैश्चापि वा जपः॥

यदि परचक्र का आगमन (दूसरे देश का अपने देश पर आक्रमण) हो तो एकादशगुणा रुद्रैकादशिनी का जप कर विधिपूर्वक होम करना चाहिये। घृतमिश्रित तिलों से विधिपूर्वक होम करके रुद्रैकादशिनी का ९९ अथवा ९९९ जप (राज्यप्राप्ति-हेतु) करना चाहिये। अथवा महारुद्र में इसका तिगुना होम करना चाहिये। वर्षा कराने के लिये, हाथी-घोड़ों आदि के रोगों की शान्ति के लिये, ग्रहों की शान्ति के लिये, उत्पातों की शान्ति के लिये, गृहशान्ति एवं ग्रामशान्ति के लिये तिल एवं घृत से होम करना चाहिये तथा होम के अन्त में सभी कार्यों की सिद्धि के लिये कूष्माण्ड होम तथा रुद्रजप करना चाहिये।

होतव्यमाज्यं विधिवन्महाव्याहृतिभिस्तथा। परिषिच्य ततो वह्निं तत्त्वायामेति चार्च्य च॥
अभिषेकं ततः कुर्यान्मन्त्रैस्त्वब्लिङ्गकैः शुचिः। आदावन्ते च सम्पूज्य पार्वतीसहितं शिवम्॥
लोकपालांश्च सम्पूज्य विधिवच्छिवसन्निधौ। गङ्गां दुर्गां च मन्त्रेण विधिवद्द्विरदाननम्॥
स्नपनोक्तविधानेन त्वरितेन नमस्कृतिः। तर्पयेद्विविधै रत्नैः पयसा पायसेन वा॥
प्रीयतां शम्भुरित्युक्त्वा भूमिदेवाञ्छुचिः शुचीन्। दत्त्वा तु दक्षिणां तेभ्यः प्रणिपत्य विसर्जयेत्॥
एवं कृते स भगवान्प्रीतः कामान्प्रयच्छति। अकामस्य फलं मुक्तिर्नात्र कार्या विचारणा॥
बौधायनोक्तमन्त्रोऽयं सर्वकामसमृद्धये॥

इति रुद्रहोमद्रव्याणि।

विधिपूर्वक महाव्याहृतियों के साथ आज्य का होम करके 'तत्त्वायामि ब्रह्मणा०' इत्यादि से परिषेचन तथा अग्नि का पूजन करे, फिर अभिषेक अलिङ्गक मन्त्रों से करे। आदि-अन्त में पार्वती-सहित शिव का पूजन करे। लोकपालों को भी शिव के समीप पूजे। गङ्गा एवं दुर्गा को तथा श्रीगणेश जी को भी उनके मन्त्रों से पूजे। स्नपन में कथित विधान से नमस्कार करे। रत्नों, दूध, खीर आदि के भोजन से भगवान् शङ्कर एवं ब्राह्मणों को 'प्रीयतां शम्भु' कहकर प्रसन्न करे। उनको दक्षिणा देकर प्रणाम करे। फिर देवताओं का विसर्जन करे। ऐसा करने से भगवान् शङ्कर प्रसन्न होकर सभी कामनाओं को पूर्ण करते हैं तथा जो निष्काम भाव से रुद्रजप, होम आदि कार्य करता है, उसकी मुक्ति होती है। इसमें सन्देह नहीं है। बौधायन में कथित मन्त्र का जप करे।

रुद्राभिषेकविधानम्

हेमाद्रौ महार्णवे च—सुमुहूर्ते कृतनित्यक्रियः धृतभस्मत्रिपुण्ड्ररुद्राक्षः पवित्रपाणिः शिवसमीपे तद्दक्षिणतः पश्चिमतो वा सन्मुखः स्वासने उदङ्मुख उपविश्य मूलेनाचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य 'ममात्मनः श्रुतिस्मृतिपुराणोक्तफलावाप्तये धर्मार्थकाममोक्षसिद्धिद्वारा सर्वपातकनिरासार्थं सर्वव्याधिनिवृत्तिपूर्वकसर्वाभीष्टसिद्ध्यर्थं वा अमुककामनासिद्ध्यर्थं च स्वयं [ब्राह्मणद्वारा वा] अमुकद्रव्येण नमस्ते रुद्र इत्यादि शतरुद्रियेण [वा षडङ्गरुद्रेण वा अमुकरूपादिरुद्रजपेन] सन्ततधारयाभिषेकं करिष्ये' इति सङ्कल्प्य। तत्रादौ निर्विघ्नतासिद्धये 'ॐ सुमुखश्चैकदन्तश्च०' इत्यादिस्मरणपूर्वकं गणपतिं सम्पूज्य स्मरणं वा कृत्वा पूर्वोक्तभूतशुद्ध्यादिश्रीकण्ठादिकलान्यासान्तं कुर्यात्। ततः याते रुद्र इत्यादि ३१ मन्त्रैः शिखाद्यस्त्रान्तमेकत्रिंशदङ्गन्यासं प्रथमम्॥ १॥ ततः ॐ नमो भगवते रुद्रायेति मन्त्राक्षरैर्मूर्द्धादिपादान्तं दशाङ्गन्यासं द्वितीयम्॥ २॥ ततः सद्योजातादिभिः पादादिमूर्द्धान्तं पञ्चाङ्गन्यासं तृतीयम्॥ ३॥ मनोजूतिरित्यादि मन्त्रैर्गुह्यादिमस्तकान्तं पञ्चाङ्गन्यासं चतुर्थम्॥ ४॥ न्यासं च कृत्वा यज्जाग्रत इत्यादिषड्मन्त्रैर्हृदयं १ सहस्रशीर्षा इत्यादिषोडशभिः शिरः २ अद्भ्यः सम्भृत इत्यादिषड्भिः शिखां ३ आशुः शिशान इत्यादिसप्तदशभिः कवचम्॥ ४॥ विभ्राडिति षोडशभिर्नेत्रम्॥ ५॥ नमस्ते रुद्र इत्यादिषोडशभिरस्त्रं च विन्यसेत्॥ ६॥ इति पञ्चमं न्यासं कुर्यात्॥ ५॥

रुद्राभिषेक-विधान—हेमाद्रि तथा मन्त्रमहार्णव में कहा गया है कि शुभ मुहूर्त में नित्यक्रिया (शौच-स्नानादि) से निवृत्त होकर भस्म का त्रिपुण्ड्र तथा रुद्राक्ष लगाकर पवित्र होकर हाथों में पवित्री धारण करके शिव के समीप दक्षिण भाग में अथवा पश्चिम में अथवा सम्मुख (पूर्व में) अपने आसन पर उत्तर की ओर मुख करके बैठे तथा देश-काल का उच्चारण करके 'ममात्मनः श्रुतिस्मृतिपुराणोक्तफलावाप्तये धर्मार्थकाममोक्षसिद्धिद्वारा सर्वपातकनिरासार्थं सर्वव्याधिनिवृत्तिपूर्वकसर्वाभीष्टसिद्ध्यर्थं वा अमुककामनासिद्ध्यर्थं श्रीभवानीशङ्करमृत्युञ्जय-

महारुद्रदेवताप्रीत्यर्थं च स्वयं (ब्राह्मणद्वारा वा) अमुकद्रव्येण नमस्तेरुद्र इत्यादिशतरुद्रियेण (वा षडङ्गरुद्रेण अमुकरूपादिरुद्रजपेन) सन्ततधारयाभिषेकं करिष्ये' ऐसा सङ्कल्प करके आदि में निर्विघ्नतासिद्धिहेतु 'ॐ सुमुखश्चैकदन्तश्च०' इत्यादि श्लोकों के उच्चारण के साथ श्रीगणपति का स्मरण करके पूर्व में कथित भूतशुद्धि आदि कर्म श्रीकण्ठादि कलान्यास-पर्यन्त करे। फिर 'यातेरुद्र०' इत्यादि ३१ मन्त्रों से शिखादि अस्त्रान्त तक इकतीस अङ्गन्यास करे। यह प्रथम न्यास होता है। फिर 'ॐ नमो भगवते रुद्राय०' इत्यादि मन्त्रों से गुह्य से लेकर मस्तक-पर्यन्त न्यास करे। यह द्वितीय न्यास है। फिर 'सद्योजातं प्रपद्ये०' इत्यादि मन्त्रों से पैरों से लेकर मूर्द्धा-पर्यन्त पञ्चाङ्ग न्यास करे। यह तीसरा न्यास होगा। पुनः 'मनोजूति०' इत्यादि मन्त्रों से गुह्यादि से लेकर मस्तक-पर्यन्त पञ्चाङ्ग न्यास करे। यह चौथा न्यास है। इन न्यासों को करके 'यज्जाग्रतो दैव०' इत्यादि छः मन्त्रों से हृदयन्यास (१), 'सहस्रशीर्षा०' इत्यादि सोलह ऋचाओं से शिरोन्यास (२), 'अद्भ्यः संभृतं पृथिव्यै रसाच्च०' इत्यादि छः मन्त्रों से शिखान्यास (३) करे, 'आशुः शिशानो०' इत्यादि सत्रह ऋचाओं से 'कवचाय हुं' करे (४), 'विभ्राड् बृहत्०' इत्यादि सोलह ऋचाओं से नेत्रत्रयाय वौषट् (५) करे तथा 'नमस्ते रुद्र०' इत्यादि सोलह ऋचाओं से 'अस्त्राय फट्' करे (६)। इस प्रकार इस पाँचवें प्रकार से न्यास को सम्पन्न करे।

एवं पञ्चन्यासं पूर्ववत् कृत्वा शातातपोक्तं षष्ठं षडङ्गन्यासं कुर्यात्। तद्यथा—ॐ प्रजनने ब्रह्मतिष्ठतु॥ १॥ पादयोर्विष्णुस्तिष्ठतु॥ २॥ हस्तयोर्हरस्तिष्ठतु॥ ३॥ वाह्वोरिन्द्रस्तिष्टतु॥ ४॥ जठरे अग्निस्तिष्ठतु॥ ५॥ हृदये शिवस्तिष्ठतु॥ ६॥ कण्ठे वसवस्तिष्ठन्तु॥ ७॥ वक्त्रे सरस्वती तिष्टतु॥ ८॥ नासिकयोर्वायुस्तिष्ठतु॥ ९॥ नयनयोः सूर्याचन्द्रमसौ तिष्ठेताम्॥ १०॥ कर्णयोरश्विनौ देवौ तिष्ठेताम्॥ ११॥ ललाटे रुद्रास्तिष्ठन्तु॥ १२॥ मूर्ध्न्यादित्यास्तिष्ठन्तु॥ १३॥ पृष्ठे पिनाकी तिष्ठतु॥ १४॥ पुरतः शूली तिष्टतु॥ १५॥ पार्श्वयोः शिवाशङ्करौ तिष्ठेताम्॥ १६॥ सर्वतो वायुस्तिष्ठतु॥ १७॥ ततो बहिः सर्वतोऽग्निर्ज्वालामालापरिवृतस्तिष्ठतु॥ १८॥ सर्वेष्वङ्गेषु सर्वा देवतास्तिष्ठन्तु॥ १९॥ माऽरक्षन्तु अग्निर्वायु सूर्यश्चन्द्रमा दिश आपः पृथिव्यौषधिवनस्पतय इन्द्रः पर्जन्य ईशान आत्मा पुनर्नम अग्निर्मे वाचि श्रित इति यथालिङ्गमङ्गानि संस्पृशेत् इति न्यासषट्कं कृत्वा मानसोपचारैः सम्पूज्य 'ॐ ध्यायेन्नित्यं महेशं०' इति ध्यात्वा लिङ्गपूजां कुर्यात्। तद्यथा—

आराधितो मनुष्यैस्त्वं सिद्धैर्देवासुरादिभिः। आराधयामि भक्त्या त्वां मां गृहाण महेश्वर॥ १॥

ॐ त्र्यम्बकं यजामहे० इत्याराध्य ॐ आत्वावहन्तुहरयः सचेतसः श्वेतैरश्वैः सहकेतुमद्भिः। वाताजवैर्बलवद्भिर्मनोजवैरायाहि शीघ्रं मम इहव्याय शर्वोम् ॐ सद्योजातं प्रपद्यामीत्यावाह्य॥ १॥ ॐ त्र्यम्वकं० सद्योजाताय वै नमो नमः इत्यासनम्॥ २॥ त्र्यम्बकं० भवे भवे नातिभवे भवस्व मामिति पाद्यम्॥ ३॥ ॐ त्र्यम्वकं० भवोद्भवाय नम इत्यर्घ्यम्॥ ४॥ ॐ त्र्यम्बकं० आपोहिष्ठामयो भुव इत्यादिमन्त्रत्रयेण स्नानम्॥ ५॥ देवैस्तु वन्दिता धेनुः सर्वपापप्रणाशिनी। तत्क्षीरस्नापितो देव नित्यं मे वरदो भव॥ ॐ त्र्यम्वकं० पयःस्नानम्॥ ६॥ कामतोऽकामतो वापि यन्मया दुष्कृतं कृतम्। तत्सर्वं विलयं यातु दधिस्नानेन भो शिव॥ १॥ त्र्यम्वकं० इति दधिस्नानम्॥ ७॥ रसानामुत्तमं त्वाज्यं देवानां च सदा प्रियम्। तेन त्वं स्नापितो देव निधिकान्तिप्रदो भव॥ ८॥ त्र्यम्वकं० इति घृतस्नानम्॥ ८॥ यस्य धारणमात्रेण तृप्तिं याति पितामहः। मधुना स्नापितो देव नित्यं शोकहरो भव॥ १॥ त्र्यम्वकं० मधुस्नानम्॥ ९॥ यमलोकभयत्रस्तः शरणं त्वां गतः शिवः। खण्डस्नानेन देवेश मां कुरुष्व सुखान्वितम्॥ १॥ ॐ त्र्यम्वकं० इति शर्करोदकस्नानम्॥ १०॥ यस्य दर्शनमात्रेण शुद्धिं प्राणाश्च जीवितम्। तेन चोत्तमतोयेन स्नातो देहि प्रियं ध्रुवम्॥ १॥ ॐ त्र्यम्वकं० इति शुद्धोदकस्नानम्॥ ११॥

अथाद्भिर्देवं तर्पयेत्। ॐ भवं देवं तर्पयामि। ॐ शर्वं देवं तर्पयामि। ॐ ईशानं देवं तर्पयामि। ॐ पशुपतिं देवं तर्पयामि। ॐ रुद्रं देवं तर्पयामि। ॐ भीमं देवं तर्पयामि। ॐ महान्तं देवं तर्पयामीति तर्पयित्वा तत ॐ त्र्यम्बकं० ज्येष्ठाय नमः। इत्याचमनीयम्॥ १२॥ ॐ त्र्यम्बकं० श्रेष्ठाय नमः इति मधुपर्कमाचमनं च॥ १३॥ सुगन्धं चन्दनं देव कुङ्कुमेन समन्वितम्। अर्चितोऽसि मया भक्त्या शिवलोकप्रदो भव॥ ॐ त्र्यम्बकं० इति गन्धम्॥ १४॥ अक्षय्यान्बन्धुपुत्रार्थान् कायं चैवाक्षिवाङ्मनः। अन्ते चैवाक्षयं लोकमक्षतैरर्चितः कुरु॥ ॐ त्र्यम्बकं० इत्यक्षतान्॥ १५॥ सन्तानः परिजातश्च ये चान्ये सुरपादपाः। तेषां पुष्पैर्मया देव पूजितः सुखदो भव॥ १॥ ॐ त्र्यम्बकं० कलविकरणाय नमः इति पुष्पाणि॥ १६॥ धूपोऽयं गृह्यतां देव सुन्दरो गन्धवाञ्छुचिः। ईप्सितं मे वरं देहि परत्र च शुभां गतिम्॥ १॥ ॐ त्र्यम्बकं० सर्वभूतदमनाय नमः इति धूपम्॥ १७॥ शुद्धा शुक्लाम्बरा वर्तिराज्येन च समन्विता। दीपवर्तिप्रदानेन प्रीतः स्यादीश्वरो भव॥ १॥ ॐ त्र्यम्बकं० मनोन्मनाय नमः इति दीपम्॥ १८॥ सर्वमन्नप्रदानं च देवानां तु सदा प्रियम्। तेन चान्नप्रदानेन सुप्रीतो वरदो भव॥ ॐ त्र्यम्बकं० भवोद्भवाय नमः इति नैवेद्यम् आचमनं च॥ १९॥

पञ्च प्रकार के न्यासोपरान्त फिर शातातप स्मृति में कहा हुआ षडङ्ग न्यास करे। वह 'ॐ प्रजनने ब्रह्मतिष्ठतु' इत्यादि मूलपाठ में लिखित २० मन्त्रों से उन-उन अङ्गों को स्पर्श करते हुए इस छठे प्रकार के न्यास को करना चाहिये। फिर मानसोपचारों से शिव का पूजन कर 'ॐ ध्यायेन्नित्यं महेशं०' इत्यादि श्लोकों से ध्यान कर लिङ्गपूजा करे। पुनः 'आराधितो मनुष्यैस्त्वं०' इत्यादि मूल में लिखित श्लोक से आराधन कर 'ॐ आत्वावहन्तु हरयः' इत्यादि मूल में लिखित १९ मन्त्रों से आचमन-पर्यन्त उपचार करे।

अथाष्टभिर्मन्त्रैरष्टौ पुष्पाणि०। ॐ भवाय देवाय नमः पुष्पं समर्पयामि॥ १॥ ॐ शर्वाय देवाय०॥ २॥ ॐ ईशानाय देवाय०॥ ३॥ ॐ पशुपतये देवाय०॥ ४॥ ॐ रुद्राय देवाय०॥ ५॥ ॐ उग्राय देवाय०॥ ६॥ ॐ भीमाय देवाय०॥ ७॥ ॐ महते देवाय०॥ ८॥ इति पुष्पाणि समर्प्य। ॐ अघोरेभ्यो०१ तत्पुरुषाय०२ ईशानः सर्व०३ इति मन्त्रत्रयेणोपस्थाय नीराजनं कृत्वा पुष्पाञ्जलिं समर्प्य प्रदक्षिणात्रयं कृत्वा साष्टाङ्गं प्रणमेत्। ततः शिवस्य मूर्ध्नि हिरण्यादिकलशेन सन्ततां धारां मधुना सर्पिषा पयसा वेक्षुरसेन नारीकेलोदकेन चाम्ररसेन वा तदभावे उदकेन। ॐ नमस्तेरुद्रमन्यव० इत्येकादशानामनुवाकानामेकमेकं जपेत्सर्वेषां पारं पुनराराधयेत्। उत्तमाराधनेन तदेतद्विधानमुक्तम्। ततः अभिषेकान्ते ॐ अनेन रुद्राभिषेककर्मणा श्रीभवानीशङ्करमृत्युञ्जयमहारुद्रः प्रीयतामिति देवदक्षिणपार्श्वे जलमुत्सृजेत्। ॐ तत्सद्ब्रह्म०। ततस्तेनाभिषिक्तोदकेन [अक्षिभ्यामित्यनुवाकेन] ॐ अक्षीभ्यान्तेनासिकाभ्यां-कर्णाभ्यां छुबुकादधि। यक्ष्मंशीर्षण्यंमस्तिष्कांज्जिह्वायाविवृहामिते १ ग्रीवाभ्यस्तउष्णिहाभ्यः कीकसाभ्यो-अनूक्यादुयक्ष्मंदोषण्य। मुंमाभ्यांबाहुभ्यांविवृहामिते २ आंत्रेभ्यस्तेगुदाभ्योवनिष्ठोर्हृदयादधि। यक्ष्मंमतस्नाभ्यांयक्नः प्लाशिभ्योविवृहामिते ३ ऊरुभ्यांतेअष्ठीवद्भ्यांपार्ष्णिभ्याम्प्रपदाभ्यांयक्ष्मंश्रोणिभ्यांभासदाद्भंससोविवृहामिते ४ मेहना-द्वनंकरणाल्लोमभ्यस्तेनखेभ्यः। यक्ष्मंसर्वस्मादात्मनस्तमिदंविवृहामिते ५ अंगादंगाल्लोम्नोलोम्नोजातंपर्वणिपर्वणि। यक्ष्मंसर्वस्मादात्मनस्तमिदं विवृहामिते॥६॥ इति ऋग्वेदीयानुवाकम्। वारुणैर्वा मन्त्रैः मस्तकाद्यपादान्तं संमृज्यात्। पापक्षयार्थी व्याधिविमोचनार्थी श्रीकामः पुष्टिकामो मोक्षार्थी च कुर्यादेवं कुर्वन् सिद्धिमाप्नोति। तत आचार्याय दक्षिणां ददाति दश गाः सवत्साः सुवर्णभूषिताः। वृषभैकादशस्तदलाभे एकां गां दद्यादित्याह भगवान् बौधायन। इति रुद्राभिषेकविधानम्।

फिर मूल में लिखित 'ॐ भवाय देवाय नमः पुष्पं समर्पयामि' इत्यादि आठ मन्त्रों से पुष्पों को चढ़ाये। फिर 'ॐ अघोरेभ्य०' इत्यादि तीन मन्त्रों से खड़े होकर नीराजन करके पुष्पाञ्जलि समर्पित करना चाहिये तथा

नीराजनोपरान्त प्रणाम करे। तीन प्रदक्षिणा करे। फिर शिव के मस्तक पर स्वर्णादि धातु के कलश से सतत जलधारा अथवा मधु अथवा घृत अथवा गोदुग्ध अथवा ईख का रस अथवा नारियल का पानी अथवा आम के रस या केवल जल से अभिषेक करना चाहिये। फिर 'ॐ नमस्ते रुद्र०' नामक एकादश मन्त्रों के अनुवाक को जप करके पुनः शिव का आराधन करे। उत्तम प्रकार के आराधन-हेतु यह आराधन कहा गया है।

फिर अभिषेक के अन्त में मूल में लिखित 'अक्षीभ्याम्०' इत्यादि अनुवाक के छः ऋग्वेदीय मन्त्रों से अथवा वारुण मन्त्रों से शिव का मस्तक से लेकर पाद-पर्यन्त मार्जन करे। पापक्षय की इच्छा वाला, रोग से मुक्ति चाहने वाला, लक्ष्मी चाहने वाला, पुष्टि चाहने वाला यदि इस आराधना को करता है तो उसे सफलता मिलती है। फिर आचार्य को दक्षिणा देकर दश गायें, जो कि बछड़े वाली हों तथा सुवर्णमण्डित हों, देना चाहिये तथा ग्यारह साँड़ भी दान करे। इसके अभाव में केवल एक ही गाय दे—ऐसा बौधायन का कथन है।

चण्डेश्वरमन्त्रपुरश्चरणम्

अथ चण्डेश्वरमन्त्रपुरश्चरणं शारदायाम्—मूलमन्त्रो यथा ॐ ध्वँ फट्। इति त्र्यक्षरो मन्त्रः। अस्य चण्डेश्वरमन्त्रस्य त्रिकऋषिरनुष्टुप्छन्दश्चण्डेश्वरो देवता सर्वेष्टसिद्ध्यर्थे विनियोगः। ॐ त्रिकऋषये नमः शिरसि॥ १॥ ॐ अनुष्टुप्छन्दसे नमः मुखे॥ २॥ ॐ चण्डेश्वरदेवतायै नमः हृदये॥ ३॥ इति ऋष्यादिन्यासः। ॐ दीप्त फट् हृदयाय नमः॥ १॥ ॐ ज्वल फट् शिरसे स्वाहा॥ २॥ ॐ ज्वालामालिनी फट् शिखायै वषट्॥ ३॥ ॐ फट् कवचाय हुं॥ ४॥ ॐ हन फट् नेत्रत्रयाय वषट्॥ ५॥ ॐ सर्व्वज्वालिनी फट् इत्यस्त्राय फट्॥ ६॥ इति षडङ्गन्यासं कृत्वा ध्यायेत्—

**चण्डेश्वरं रक्ततनुं त्रिनेत्रं रक्तांशुकाढ्यं हृदि भावयामि।
ढक्कां त्रिशूलं स्फटिकाक्षमालां कमण्डलुं विभ्रतमिन्दुचूडम्॥**

एवं ध्यात्वा शिवपञ्चाक्षरोदिते पीठे मूलेन मूर्त्तिं प्रकल्प्य ॐ ध्वं चण्डेश्वराय नमः इति मन्त्रेण आवाहनादिपुष्पान्तैरुपचारैः सम्पूज्य आवरणपूजां कुर्यात्। षट्कोणे हृदयादिषडङ्गानि सम्पूज्य अष्टदले ब्राह्म्याद्यष्ट-मातृकाः सम्पूजयेत्। ततो भूपुरे इन्द्रादिदशदिक्पालान् तद्बाह्ये वज्राद्यायुधानि च पूजयेत्। एवं चतुरावरणपूजां कृत्वा धूपादिनीराजनान्तैश्चण्डेशं सम्पूज्य त्रिलक्षं मन्त्रं जपेत्।

चण्डेश्वर मन्त्र—'ॐ ध्वं फट्' यह मूल मन्त्र है। यह तीन अक्षरों का मन्त्र है। इस चण्डेश्वर मन्त्र के त्रिक ऋषि हैं, अनुष्टुप् छन्द है, चण्डेश्वर देवता है तथा इसका विनियोग सभी प्रकार के इष्ट मनोरथों की सिद्धि के लिये है।

सर्वप्रथम मूल में लिखित तीन मन्त्रों से ऋष्यादि न्यास करे। फिर 'ॐ दीप्त फट् हृदयाय नमः' इन छः मन्त्रों से षडङ्ग न्यास करके फिर 'चण्डेश्वरं रक्ततनुं त्रिनेत्रं, रक्तांशुकाढ्यं हृदि भावयामि। ढक्कां त्रिशूलं स्फटिकाक्षमालां कमण्डलुं विभ्रति चन्द्रचूडम्॥' इस श्लोक से ध्यान करे। ध्यान करने के पश्चात् पूर्व में शिवपञ्चाक्षर मन्त्र में कथित पीठ पर मूल मन्त्र से चण्डेश्वर की मूर्ति की कल्पना करके 'ॐ चण्डेश्वराय नमः' इस मन्त्र से आवाहन से लेकर पुष्पाञ्जलि-पर्यन्त उपचारों से पूजा करके फिर आवरणपूजा करे। पीठ के षट्कोण में हृदय आदि छः अङ्गों को पूजकर अष्टदल में ब्राह्मी आदि अष्टमातृकाओं का पूजन करे। फिर भूपुर में इन्द्रादि दश दिक्पालों, उसके बाहर उनके वज्रादि आयुधों का पूजन करे। इस प्रकार चारो आवरणों की पूजा करके धूप, दीप से लेकर नीराजन-पर्यन्त चण्डेश्वर की पूजा करके तीन लाख मन्त्र का जप करे।

वर्णलक्षं जपेन्मन्त्रं होमं कुर्याद्दशांशतः। मधुरत्रयसंयुक्तैर्विशुद्धैस्तिलतण्डुलैः ॥
इति सिद्धे मनौ मन्त्री धनवाञ्जायतेऽचिरात्। तर्पयेन्मनुनानेन नित्यमष्टोत्तरं शतम्॥
श्रियं प्राप्नोति महतीं पुत्रमित्रसमन्वितः। प्रियङ्गुकुसुमैः फुल्लैस्तत्काष्ठज्वलितेऽनले॥
जुहुयादयुते मन्त्री पुरक्षोभः प्रजायते। साध्यवृक्षत्वचो लोणं पिष्ट्वा पिष्टसमन्वितम्॥
पुत्तलीं रुचिरां कृत्वा प्रतिष्ठाप्य समीरणम्। छित्त्वा छित्त्वा प्रजुहुयादष्टोत्तरशतं निशि॥
सप्ताहमेवं कुर्वीत साध्यो दासो भवेत्स्वयम्। शैवमन्त्रेषु निष्णातश्चण्डेश्वरमनुं भजेत्॥
सर्वान्कामानवाप्नोति परत्रेह च नन्दति।

इति चण्डेश्वरमन्त्रप्रयोगः।

चण्डेश्वर मन्त्र के जप का फल—चौंसठ लाख मन्त्र का जप करके उसके दशमांश का होम मधुरत्रय, तिल तथा तण्डुलों से करे तो मन्त्र सिद्ध हो जाता है। मन्त्र सिद्ध होने पर जापक व्यक्ति शीघ्र ही धनवान् हो जाता है। नित्य १०८ तर्पण भी इसी मन्त्र से करना चाहिये। इससे पुत्र, मित्रयुक्त लक्ष्मी की प्राप्ति होती है। प्रियङ्गु के फूलों एवं उसके लकड़ी की समिधाओं से दश सहस्र होम करने पर पुर (शत्रु की राजधानी) में क्षोभ (खलबली) मच जाती है। साध्य वृक्ष (वरुण वृक्ष या कदम्ब वृक्ष) की छाल तथा नमक पीसकर उसकी पुत्तली बनाकर उसकी प्रतिष्ठा कर फिर उसको काट-काटकर रात में १०८ आहुति देने से एक सप्ताह में साध्य स्वयं ही दास हो जाता है। जो साधक शैव मन्त्रों में पारंगत हो जाय, उसे बाद में चण्डेश्वर मन्त्र भी सिद्ध करना चाहिये, इससे उसकी सभी कामनाएँ पूर्ण हो जाती हैं तथा परलोक में सुख भोगता है।

त्वरितरुद्रमन्त्रपुरश्चरणप्रयोगः

हेमाद्रिशान्तिसारशान्तिरत्नेषु—देवालयादिषु जपस्थानं प्रकल्प्य तत्र नित्यकर्मानन्तरं जपासने प्राङ्मुख उदङ्मुखो वा उपविश्य भस्मत्रिपुण्ड्रं रुद्राक्षमालां च धारयित्वा मूलेनाचम्य तेनैव प्राणानायम्य देशकालौ सङ्कीर्त्य 'अमुककामनासिद्ध्यर्थं त्वरितरुद्रजपमहं करिष्ये' इति सङ्कल्प्य पूर्वोक्तक्रमेण भूतशुद्धिं प्राणप्रतिष्ठामन्तर्मातृकाबहिर्मातृकान्यासं श्रीकण्ठादिकलान्यासं च कृत्वा षोडशोपचारैः शिवपूजां विधाय रुद्रस्तवेन स्तुत्वा त्वरितरुद्रविधानन्यासादिकं कुर्यात्। **तत्र मूलमन्त्रो यथा—ॐ यो रुद्रोऽग्नौ योऽप्सु य औषधीषु यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमोस्तु॥ १॥ इत्येकत्रिंशद्वर्णो (३१) मन्त्रः। अस्य त्वरितरुद्रमन्त्रस्य अथर्वणऋषिः अनुष्टुप् छन्दः त्वरितरुद्रसंज्ञको देवता नमः इति बीजम् अस्तु इति शक्तिः त्वरितरुद्रप्रीत्यर्थं जपे विनियोगः।[तत्रादौ मूलेन करशुद्धिं कृत्वा प्रणवं करतलयोर्विन्यसेत्] ॐ अथर्वर्षये नमः शिरसि॥ १॥ ॐ अनुष्टुप्छन्दसे नमः गुह्ये॥ २॥ ॐ त्वरितरुद्रदेवतायै नमः हृदये॥ ३॥ ॐ नमः इति बीजाय नमः मुखे॥ ४॥ ॐ अस्तु शक्तये नमः पादयोः॥ ५॥ इति ऋष्यादिन्यासः॥ ॐ यो रुद्र अङ्गुष्ठाभ्यां नमः॥ १॥ ॐ अग्नौ तर्जनीभ्यां नमः॥ २॥ ॐ योप्सु मध्यमाभ्यां नमः॥ ३॥ ॐ य ओषधीषु अनामिकाभ्यां नमः॥ ४॥ ॐ यो रुद्रो विश्वा भुवना विवेश कनिष्ठिकाभ्यां नमः॥ ५॥ ॐ तस्मै रुद्राय नमोऽस्तु करतलकरपृष्ठाभ्यां नमः॥ ६॥ इति करन्यासः। एवं हृदयादिविन्यासः।**

अथ पदन्यासः—ॐ यः नमः पादयोः॥ १॥ रुद्रः नमः जङ्घयोः॥ २॥ अग्नौ नमः जानुनोः॥ ३॥ यः नमः ऊर्वोः॥ ४॥ अप्सु नमः गुल्फयोः॥ ५॥ यः नमः मेढ्रे॥ ६॥ ओषधीषु नमः नाभौ॥ ७॥ यः नमः उदरे॥ ८॥ रुद्रः नमः हृदये॥ ९॥ विश्वा नमः कण्ठे॥ १०॥ भुवना नमः मुखे॥ ११॥ विवेश नमः नासिकायाम्॥ १२॥ तस्मै नमः नेत्रयोः॥ १३॥ रुद्राय नमः भ्रुवोः॥ १४॥ नमः नमः ललाटे॥ १५॥ अस्तु नमः शिरसि॥ १६॥

अथ वर्णन्यासः—ॐ यः शिरसि॥ १॥ रुद्रः ललाटे॥ २॥ अग्नौ नेत्रयोः॥ ३॥ यः कर्णयोः॥ ४॥ अप्सु नासिकायाम्॥ ५॥ यः मुखे॥ ६॥ ओषधीषु बाह्वोः॥ ७॥ यः हृदये॥ ८॥ रुद्रः नाभौ॥ ९॥ विश्वा गुह्ये॥ १०॥ भुवना अपाने॥ ११॥ विवेश ऊर्वोः॥ १२॥ तस्मै जान्वोः॥ १३॥ रुद्राय जङ्घयोः॥ १४॥ नमः गुल्फयोः॥ १५॥ अस्तु चरणयोः॥ १६॥

एवं पञ्च न्यासान्कृत्वा शुभदामुद्रां प्रदर्शयेत्। (अङ्गुल्यग्राणि मूले तु कृत्वाङ्गुष्ठेन पीडयेत्। सा मुद्रा शुभदा प्रोक्ता सैव शान्तिप्रदायिनी॥ १॥) मुद्रादर्शनमन्त्रः—ॐ एषतेरुद्रभागः सहस्वस्त्राम्बिकयातं जुषस्वस्वाहा। इति मन्त्रेण मुद्रां दर्शयित्वा ध्यानं कुर्य्यात्—

रुद्रं चतुर्भुजं देवं त्रिनेत्रं वरदाभयम्। दधानमूर्ध्वहस्ताभ्यां शूलं डमरुमेव च॥
अङ्कसंस्थामुमां पद्मे दधानां च करद्वये। आद्ये करद्वये कुम्भं मातुलुङ्गं च बिभ्रतीम्॥

अथवा—

चतुर्वाहुं त्रिनेत्रं च शुद्धस्फटिकसन्निभम्। उग्रे कर्मणि चैवोग्रं मूर्तिं ध्यायेदुमापतिम्॥
द्विभुजं नागपाशं च शूलपाणिं जटाधरम्। ध्यात्वैवं शङ्करं पापान्मुच्यते मानसोद्भवात्॥

अथवा—

चतुर्भुजं त्रिनेत्रं च शुद्धस्फटिकसन्निभम्। अमृतेन च पूर्णौ द्वौ कलशौ हस्तयोर्द्वयोः॥
हस्तद्वयेन योगस्य कृतमुद्रं स्थिरासनम्। सर्वकामप्रदं शान्तं शङ्करं करुणाकरम्॥
उग्रकर्मणि चैवोग्रमूर्तिं ध्यायेदुमापतिम्। द्विभुजं नागपाशं च शूलपाणिं जटाधरम्॥

इति ध्यात्वा मानसोपचारैः सम्पूज्य भेदपक्षे गन्धादिपूजनं कुर्यात् एवं पूजनं कृत्वा मूलमन्त्रं जपेत्। अस्य पुरश्चरणमयुतद्वयजपात्मकं कुर्यात्। प्रत्यहं शिवं पूजयेत्।

त्वरित रुद्रमन्त्र-पुरश्चरण प्रयोग—किसी देवालय इत्यादि में जपस्थान की व्यवस्था करके वहाँ नित्यकर्म के पश्चात् जप के आसन पर पूर्व की ओर अथवा उत्तर की ओर मुख कर बैठे तथा रुद्राक्ष की माला धारण करके मूल मन्त्र से आचमन तथा प्राणायाम कर देश-काल का उच्चारण कर 'अमुककामनासिद्ध्यर्थं त्वरितरुद्रजपमहं करिष्ये' कहकर सङ्कल्प करना चाहिये। फिर पूर्व में वर्णित विधि से भूतशुद्धि, प्राणप्रतिष्ठा, अन्तर्मातृका, बहिर्मातृका न्यास, श्रीकण्ठादि कलान्यास आदि करके षोडशोपचार से शिवपूजन करके रुद्रस्तव से स्तुति करके त्वरित रुद्रविधान के न्यासादि करे।

मूल मन्त्र—'ॐ यो रुद्रोऽग्नौ योऽप्सु य ओषधीषु यो रुद्रा विश्वा भुवना विवेश तस्मै रुद्राय नमोऽस्तु (तैत्तरीय यजुर्वेद ५।५।९।९)' यह इकतीस अक्षरों का मन्त्र है।

इस त्वरित रुद्रमन्त्र के अथर्वा ऋषि, अनुष्टुप् छन्द, त्वरित रुद्रसंज्ञक देवता तथा त्वरितरुद्र की प्रीति-हेतु जप में विनियोग होता है। इस प्रकार विनियोग करने के उपरान्त मूल मन्त्र से करशुद्धि करके प्रणव का न्यास करतलों में करने के पश्चात् 'ॐ अथर्वर्षये नमः शिरसि' इत्यादि ५ मूलोक्त मन्त्रों से ऋष्यादि न्यास करे। फिर 'ॐ यो रुद्र अङ्गुष्ठाभ्यां नमः' इत्यादि छः मन्त्रों से करन्यास करे। इन्हीं छः मन्त्रों से हृदयादि न्यास भी करे। इसके बाद 'ॐ यः नमः पादयोः' इत्यादि सोलह मन्त्रों से पदन्यास करे। इसके अनन्तर 'ॐ यः शिरसि' इत्यादि १६ मन्त्रों से वर्णन्यास करना चाहिये। इस प्रकार पञ्चन्यासों को सम्पन्न करके शुभदा मुद्रा प्रदर्शित करनी चाहिये।

शुभदा मुद्रा—अङ्गुलियों के अग्रभाग को उनके मूल में लगाकर उनको अङ्गूठे से दबाने पर जो मुद्रा बनती है, वह शुभदा मुद्रा कही जाती है; यह शान्ति-प्रदायिनी होती है।

विमर्श—मुद्राएँ केवल अङ्गुलियों से ही प्रदर्शित नहीं होतीं; अपितु शरीर के विभिन्न अङ्गों से भी मुद्राओं को बनाकर प्रदर्शित किया जाता है। मुद्राप्रदर्शन से पापों का क्षय होता है तथा सभी देवताओं को उनकी विशेष मुद्राओं से अपने अनुकूल किया जा सकता है। कहा भी है—

योजनात् सर्वदेवानां द्रावणात् पापसंहतेः। तस्मात् मुद्रेति साख्याता सर्वकामार्थसाधनी॥

(वाचस्पत्यम्)

कामना-भेद से अलग-अलग अङ्गों से भी मुद्रा का प्रदर्शन किया जाता है। हेमाद्रि के अनुसार लक्ष्मी चाहने वाले को शिर से, तेज चाहने वाले को नेत्रों के द्वारा, अन्न की कामना से मुख द्वारा, रोगनाशहेतु ग्रीवा द्वारा, सुखाकांक्षी को हृदय से, ज्ञान के चाहने वाले को नाभि द्वारा, सन्तति की इच्छा में गुह्य द्वारा, पशु की चाहना के लिये जङ्घाओं (पिण्डलियों) द्वारा, ग्राम की चाहना वाले को अङ्ग से मुद्रा का प्रदर्शन करना चाहिये। वशीकरण के लिये वाम बाहु का प्रदर्शन करना चाहिये। पापक्षय, अभिचारकर्म अथवा व्याधि दूर करने के लिये शरीर के बाह्य भाग (पीठ से) मुद्रा का प्रदर्शन भगवान् शङ्कर के समक्ष करना चाहिये—

श्रीकामः शीर्ष्णि कुर्वीत तेजस्कामस्तु नेत्रयोः। मुखे त्वन्नाद्यकामस्तु ग्रीवायां रोगनाशनम्॥
हृदये सुखकामस्तु नाभौ ज्ञानप्रदं भवेत्। प्रजाकामस्तु गुह्ये वै पशुकामस्तु जङ्घयोः॥
जानुभ्यां ग्रामकामस्तु सर्वकामस्तु गुह्ययोः। वशीकरणकामस्तु वामबाहुं प्रदर्शयेत्॥
पापक्षयेऽभिचारे वा व्याधेरपगमे तथा। बहिः शरीरात् कुर्वीत शिवस्याग्रे तु संस्मरेत्॥

मुद्रादर्शन मन्त्र—'ॐ एष ते रुद्रभागः सहस्राम्बिकया जुषस्व स्वाहा' इस मन्त्र से मुद्रा का प्रदर्शन करे। फिर मूल में उल्लिखित चार ध्यानों में से किसी एक से ध्यान करना चाहिये—

प्रथम प्रकार का ध्यान—रुद्र चतुर्भुज देव हैं, जो तीन नेत्रों वाले, वरदायक तथा अभयदायक हैं। उनके ऊपरी हाथों में शूल तथा डमरू है एवं अधोहस्तों के द्वारा गोदी में बैठी उमा, जो कि कमलों से युक्त अवस्थित हैं, धारित हैं। उनके दोनों हाथों में कुम्भ तथा मातुलुङ्ग (नीबू) है।

द्वितीय प्रकार का ध्यान—चतुर्भुज, त्रिनेत्र, शुद्ध स्फटिक के समान कान्तिमान्, जो उग्रकर्मों में उग्र हैं, ऐसे उमापति का ध्यान करता हूँ। दो भुजाओं वाले नागपाश से युक्त जटाधर शङ्कर का मन से ध्यान करने पर साधक पापों से मुक्त हो जाता है।

तृतीय प्रकार का ध्यान—चतुर्भुज, त्रिनेत्र, शुद्ध स्फटिक-सदृश दोनों हाथों में अमृतपूर्ण कलशों से युक्त स्थिर आसन पर योगमुद्रा में विराजमान, सर्वकामप्रद, शान्त, करुणा करने वाले श्रीशङ्कर का ध्यान करता हूँ।

चतुर्थ प्रकार का ध्यान—उग्र कर्मों की सिद्धि-हेतु श्रीशङ्कर के उग्र स्वरूप का ध्यान करना चाहिये, जो कि द्विभुज, नागपाश से युक्त, शूल धारण किये तथा जटाधारी होते हैं।

इस प्रकार से ध्यान कर मानसोपचारों से शिवपूजन करना चाहिये। भेदानुसार उनका अलग-अलग प्रकार के गन्ध से पूजन करने के उपरान्त मूल मन्त्र का जप करना चाहिये।

इसके पुरश्चरण के लिये दो अयुत (बीस सहस्र) जप करना चाहिये। जपकाल में प्रतिदिन शिव का पूजन करते रहना चाहिये।

अधःशाय्येकभक्ताशी ब्रह्मचारी हविष्यभुक्। अयुते द्वे जपेत्पूर्वं प्रत्यहं पूजयेच्छिवम्॥
जुहुयात्तद्दशांशेन तद्दशांशेन तर्पणम्। मार्जनं तद्दशांशेन दशांशेन तु भोजयेत्॥
एवं कृते तु सिद्धिः स्यात्फलार्थं तु ततोजपेत्। पुरश्चरणमेवं तु कृत्वा सम्पूज्य शङ्करम्॥
जपेत्त्वरितरुद्रं तु सर्वकामसमृद्धये।

जपफल—जपकाल में भूमि पर शयन करे, एक समय भोजन करे, ब्रह्मचारी तथा हविष्यभोजी होकर रहे। प्रथम दो अयुत की सङ्ख्या में त्वरितरुद्र मन्त्र का जप करे तथा प्रतिदिन पूजन करता रहे। फिर जप के दशांश का हवन, हवन का दशांश तर्पण, तर्पण का दशांश मार्जन तथा मार्जन का दशांश ब्राह्मणभोजन कराना चाहिये। ऐसा करने से सफलता मिलती है अर्थात् मन्त्र सिद्ध हो जाता है। जब मन्त्र सिद्ध हो जाय तो सत्फल की प्राप्ति के लिये आगे जप करना चाहिये। इस प्रकार से पुरश्चरण करके शङ्कर को पूजकर त्वरित रुद्रमन्त्र का जप करने से सभी काम सफल होते हैं।

श्रीकामः शान्तिकामो वा जपेल्लक्षमतन्द्रितः॥
बिल्वसमिद्भिः श्रीकामः शान्तिकामःशमीमयैः। जुहुयादाज्यसम्मिश्रैस्तर्पणं मार्जनं तथा॥
जप्त्वा लक्षं तु पुत्रार्थी पायसंजुहुयात्ततः। वित्तार्थी श्रीफलैर्होममायुष्कामस्तु दूर्वया॥
तिलैराज्येन सम्मिश्रैस्तेजस्कामो घृतेन वै। व्रीहीभिः पशुकामस्तु राष्ट्रकामस्तु वै यवैः॥
पायसं सर्वकामेन होतव्यं शर्करान्वितम्। मध्वाक्तान्याम्रपत्राणि तीव्रज्वरविनाशिने॥

लक्ष्मी की कामना वाला, शान्ति चाहने वाला इस मन्त्र का सावधान होकर एक लाख की सङ्ख्या में जप करे। बिल्व की समिधाओं से श्रीकामी को तथा शमी (छेङ्कुर) की समिधा से शान्तिकामी को घृत-मिश्रित हवन, तर्पण, मार्जन करना चाहिये। पुत्र चाहने वाले को सिद्ध मन्त्र को एक लाख की सङ्ख्या में जप कर फिर पायस (खीर) से हवन करना चाहिये। धन चाहने वाले को बेलफलों से तथा आयुवृद्धि चाहने वाले को दूर्वा की समिधा के साथ तिल एवं घृत मिलाकर हवन करना चाहिये एवं तेजस्कामी को दूर्वा की समिधा एवं घृत से हवन करना चाहिये। पशुकामी को व्रीहि से तथा राष्ट्रकामी (राज्यप्राप्ति) को जौ से हवन करना चाहिये। समस्त कामनाओं की पूर्ति के लिये पायस का होम करना चाहिये। उस पायस में भी शर्करा मिलानी चाहिये। तीव्र ज्वर के विनाश के लिये आम के पत्तों को मधु में डुबोकर हवन करना चाहिये।

हिमभूतज्वरेणैव गुडूचीभिर्हुनेद्ध्रुवम्। सर्वरोगविनाशय सूर्यस्याभिमुखो जपेत्॥
अयुते द्वे जपे होमः कार्योऽर्कसमिधा शुभः। औदुम्बैररन्नकामस्तेजस्कामस्तु खादिरैः॥
अपामार्गसमिद्धोमाद्भूतबाधा विनश्यति। ग्रहबाधाविनाशाय जपेदश्वत्थसन्निधौ॥
लवणान्वितदध्यक्तस्तीक्ष्णाग्राश्वत्थसम्भवाः । हूयन्ते समिधः शुष्काः स्वाहान्ते मन्त्रमुच्चरेत्॥
दशपञ्चाहुतीर्हुत्वा गच्छगच्छेत्युदीरयेत्। यावद्धोमो बलिर्देयः पुरुषाहारसम्मितः॥
एवं कृते प्रमुच्येत पुमान् स्त्री वा महाग्रहात्।

शीतज्वर (पुराना मलेरिया) के लिये गिलोय की समिधा का हवन निश्चित लाभकारी होता है। सभी रोगों के नाश के लिये इस मन्त्र का जप सूर्य के सम्मुख करना चाहिये। दो अयुत जप में अर्क की समिधा से होम करना

चाहिये। अन्नकामी को गूलर की समिधा से एवं तेजस्कामी को खदिर की समिधा से हवन करना चाहिये। अपामार्ग की समिधाओं के द्वारा इस मन्त्र से किया गया हवन भूतबाधा का नाशक होता है। ग्रहबाधा के नाश के लिये पीपल वृक्ष के समीप इस त्वरित रुद्र मन्त्र का जप करना चाहिये। अश्वत्थ (पीपल) वृक्ष के नोकदार सूखी समिधाओं को त्वरित रुद्रमन्त्र के अन्त में स्वाहा लगाकर समिधाओं में लवण तथा दही चुपड़कर प्रत्येक पन्द्रह आहुतियाँ देकर 'गच्छ गच्छ' कहना चाहिये। इस प्रकार होम की समाप्ति जब तक नहीं होती तब तक एक व्यक्ति के आहार की मात्रा में बलि देनी चाहिये (अथवा सम्पूर्ण होम के अन्त में बलि देनी चाहिये)। ऐसा करने से जिस पुरुष अथवा स्त्री को महाग्रह ने जकड़ लिया वह उस ग्रह (भूत-प्रेत-पिशाच आदि) की पकड़ से मुक्त हो जाता है।

यं जेतुमिच्छेत्पुरुषस्तत्स्थानाभिमुखो जपेत्॥
जुहुयाच्छतपत्राणि स दुष्टः क्षयमाप्नुयात्। लाजाहोमेन कन्यार्थी कन्यामाप्नोति रूपिणीम्॥
लाजाश्च मधुसम्मिश्राः श्वेतपुष्पाणि वापुनः। हूयन्ते हरिते देशे तस्य विश्ववशो भवेत्॥
वामाङ्गमुन्नतं कार्य्यं स्त्रीवशित्वे विचक्षणैः। हस्त्यश्वामात्यशान्त्यर्थं तिलैश्चाज्येन संयुतैः॥
होमस्थाने तु संस्थाप्य कुम्भमेकंजलान्वितम्। मन्त्रं जप्त्वाष्टसाहस्त्रं कुम्भे स्पृश्य प्रयत्नतः॥
अभिषेकं तु तेषां वै शालां प्रोक्ष्यप्रदक्षिणम्। ग्रहग्रामादिशान्तिस्तु सर्वैः कार्या तु पूर्ववत्॥
वास्तुपूजा प्रकर्तव्या प्राच्यां दिशि पदेशुभे। ईशानाय बलिः कार्यः पशूनां पतये तथा॥
एवं कृते पशूनां तु प्रजानां शान्तिमाप्नुयात्।

जिस व्यक्ति को जीतना हो, उसके निवास की ओर मुख करके मन्त्र-जप करना चाहिये। फिर शतपत्र का हवन करना चाहिये; वह दुष्ट व्यक्ति क्षमा माँग लेता है। लाजाओं का होम करने से स्त्री की चाहना करने वाले को रूपवती कुमारी प्राप्त होती है। जो मधुमिश्रित लाजा (धान की खील) से तथा श्वेत पुष्पों से होम करता है, उसके वशीभूत समस्त संसार हो जाता है। यह होम विजित प्रदेश में करना चाहिये। हाथी, घोड़ा, आमात्य आदि की शान्तिहेतु तिल एवं घृत से युक्त हवन करना चाहिये तथा होमस्थान में जलपूर्ण कलश स्थापित करना चाहिये। अठारह सहस्र मन्त्रों का जप उस कलश को स्पर्श करके करना चाहिये; फिर उन हाथी-घोड़ों आदि की शाला का प्रोक्षण (पोंछा) उस जल से प्रदक्षिणक्रम से करना चाहिये। इसी प्रकार से ग्रह एवं ग्राम आदि की शान्ति भी की जाती है। पूर्व दिशा में वास्तुपूजा करनी चाहिये। ईशान के लिये एवं पशुपति के लिये बलि देनी चाहिये। ऐसा करने से पशुओं एवं प्रजाओं की शान्ति होती है।

अद्भुतेषु च सर्वेषु निशायां ग्रामबाह्यतः॥
उपविश्य जपेद्रुद्रं त्वरितं बलिभिः सह। होमः पलाशसमिधैः कर्तव्यो घृतसंयुतैः॥
ईशानाय बलिः कार्य्यो यस्यां दिशितदद्भुतम्। तदाशापतये चैव पशूनां पतये तथा॥
वृष्टिकामो जपेल्लक्षं खिलैर्होमो घृतान्वितैः। बलिपूजा प्रकर्तव्या शिवस्य वरुणस्य च॥
सर्वस्मिन्नपि चैवार्थे त्वरितस्य जपोभवेत्। अयुतद्वयजाप्यं तु यावल्लक्षं ततोऽधिकम्॥
एवं कृते तु सिद्धिः स्यान्निष्कामः प्राप्नुयाच्छिवम्। ऐहिकामुष्मिकान् भोगान् भुक्त्वा सायुज्यमाप्नुयात्॥

इति श्रीत्वरितरुद्रमन्त्रपुरश्चरणं समाप्तम्।

अद्‌भुत वस्तुओं के दर्शन होने पर उन उत्पातों की शान्ति के लिये रात्रि के समय ग्राम से बाहर बलि पदार्थ रखकर रुद्रजप (त्वरित रुद्र मन्त्र का जप) करना चाहिये। जप के उपरान्त पलाश की समिधाओं को घृत में डुबोकर होम करना चाहिये। जिस दिशा में वह अद्‌भुत उत्पात (धूमकेतु, उल्का आदि) दिखाई दे, उसी दिशा में ईशान के निमित्त बलि देनी चाहिये। साथ ही उस दिशा के स्वामी को तथा पशुपति को भी बलि देनी चाहिये। वर्षा कराने के लिये एक लाख त्वरित रुद्रमन्त्र का जप कराने के उपरान्त घृत से होम (पलाश की समिधा से) करना चाहिये तथा शिव एवं वरुण के लिये बलिपूजा देनी चाहिये। सभी अन्य कार्यों के लिये भी त्वरित रुद्र का जप दो अयुत (२०,०००) से लेकर एक लाख तक अथवा आवश्यकतानुसार अधिक भी कराना चाहिये। ऐसा करने से सफलता मिलती है तथा निष्काम व्यक्ति यदि इस जप एवं होम को करता है तो उसे शिव की प्राप्ति होती है। वह इस लोक में सुख भोगकर सायुज्य मुक्ति को प्राप्त होता है।

पार्थिवलिङ्गपूजनविधानम्

आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः। इहागत्य गृहाण त्वं क्रतुं पूजां च रक्ष मे॥

ॐ गणानां त्वागणपतिंठ०हवामहेप्रियाणान्त्वाप्रियपतिंठ०हवामहेनिधीनान्त्वानिधिपतिंठ०हवामहेवंसोमम। आहमंजानिगर्भधमात्त्वमंजासिगर्भधम्॥१॥ ॐ भूर्भुवः स्वः सिद्धिऋद्धिसहितमहागणपतये नमः गणपतिमावाहयामि स्थापयामि इति प्रतिमायामावाह्य ॐ सिद्धिऋद्धिसहितमहागणाधिपतये नमः इति नाममन्त्रेण षोडशोपचारैः सम्पूजयेत्। ततोऽर्घ्यपात्रे गन्धादिकं गृहीत्वा,

ॐ रक्षरक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक। भक्तानामभयं कर्ता त्राता भव भवार्णवात्॥
द्वैमातुर कृपासिंधो षाण्मातुरग्रज प्रभो। वरद त्वं वरं देहि वाञ्छितं वाञ्छितार्थद॥
गृहाणार्घ्यमिदं देव सर्वदेवनमस्कृत। अनेन सफलार्घ्येण फलदोस्तु सदा मम॥

इत्यर्घ्यं दद्यात्।

अथ प्रार्थना—

विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय।
नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते॥
भक्तार्तिनाशनपराय गणेश्वराय सर्वेश्वराय सुखदाय सुरेश्वराय।
विद्याधराय विकटाय च वामनाय भक्तप्रसन्नवरदाय नमो नमस्ते॥
लम्बोदर नमस्तेऽस्तु सततं मोदकप्रिय। अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा॥

इति प्रार्थयेत्।

गणपति का ध्यान—आचमन एवं प्राणायामोपरान्त 'सुमुखश्चैकदन्तश्च' इत्यादि तीन श्लोकों से श्री गणेश जी का ध्यान करना चाहिये। फिर 'आनो भद्रा क्रतवो यन्तु०' इत्यादि मन्त्रों (भद्र सूक्त) के शान्तिसूक्त को पढ़कर लक्ष्मीनारायणादि देवताओं को नमस्कार करे। फिर देश-कालादि का उच्चारण करके 'अमुकगोत्रोत्पन्न अमुकशर्मेत्यादि अहं ममेह जन्मनि दुर्गाप्रीतिद्वारा सर्वपापक्षयपूर्वकं दीर्घायुर्विपुलधनपुत्रपौत्रादि अविच्छिन्न-सन्ततिवृद्धिस्थिरलक्ष्मीकीर्तिलाभशत्रुपराजयसदभीष्टप्रमुखचतुर्विधपुरुषार्थसिद्ध्यर्थं संवत्सरसुखप्राप्तिकामः शारदीय (अथवा वासन्तिक) नवरात्रप्रतिपदि विहितं कलशस्थापनं दुर्गापूजां कुमारीपूजादि कर्म करिष्ये तदङ्गत्वेन निर्विघ्नतार्थं गणपतिपूजनं स्वस्तिपुण्याहवाचनं चण्डीसप्तशतीजपाद्यर्थं ब्राह्मणवरणं च करिष्ये' ऐसा कहकर सङ्कल्प करके फिर गणपति का ध्यान करे। ध्यान के लिये मूल में लिखित—'हे हेरम्ब त्वमेहि एहि०' तीन श्लोकों एवं 'गणानान्त्वा०' इत्यादि ऋचा को पढ़कर गणपति का आवाहन करे। फिर 'सिद्धिबुद्धिसहिताय श्रीमन्महागणाधिपतये नमः' इस प्रकार नाममन्त्र से षोडशोपचारों द्वारा पूजन करे। फिर अर्घ्यपात्र में गन्धादि द्रव्य लेकर मूल में लिखित 'रक्ष-रक्ष गणाध्यक्ष०' इत्यादि तीन श्लोकों द्वारा गणपति को अर्घ्य प्रदान करना चाहिये।

गणपति-प्रार्थना—फिर 'विघ्नेश्वराय वरदाय०' इत्यादि तीन श्लोकों द्वारा गणपति की प्रार्थना करनी चाहिये।

पुण्याहवाचनम्

ब्राह्यं पुण्यं महद्यच्च सृष्ट्युत्पादनकारकम्। वेदवृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवन्तु नः॥ १॥

भो ब्राह्मणाः ममास्य कर्मणः पुण्याहं भवन्तो ब्रुवन्तु' इति पठेत् ॐ पुण्याहं ३ त्रिर्विप्रा ब्रूयुः। पुनन्तु मा देवजनाः पुनन्तु मनसा धियः। पुनंतु विश्वा भूतानिजातवेदः पुनीहिमा॥१॥

पृथिव्यामुद्धृतायां तु यत्कल्याणं पुराकृतम्। ऋषिभिः सिद्धगन्धर्वैस्तत्कल्याणं ब्रुवन्तु नः॥ २॥

भो ब्राह्मणाः ममास्य कर्मणः कल्याणं भवन्तो ब्रुवन्तु। ॐ कल्याणम् ३। यथेमांव्वाचङ्कल्याणीमावदानिजनेभ्यः। ब्रह्मराजन्याभ्याᳬंशूद्रायचार्यायचस्वायचारणायच। प्प्रियोदेवानां दक्षिणायै दातुरिहभूयासमयम्मेकामः समृद्ध्यतामुपमादोनमतु॥१॥

सागरस्य यथा वृद्धिर्महालक्ष्म्यादिभिः कृता। सम्पूर्णा सुप्रभावा च तां च ऋद्धिं ब्रुवन्तु नः॥ २॥

भो ब्राह्मणा ममास्य कर्मणः ऋद्धिं भवन्तो ब्रुवन्तु। ॐ ऋद्ध्यताम्। ३ ॐ सत्रस्यऽ ऋद्धिरस्यगन्मज्योतिरमृताऽअभूम। दिवंपृथिव्याऽअध्यारुहामाव्विदामदेवान्त्स्वर्ज्योतिः॥१॥

स्वस्तिस्तु याऽविनाशाख्या पुण्यकल्याणवृद्धिदा। विनायकप्रिया नित्यं तां च स्वस्तिं ब्रुवन्तु नः॥ २॥

भो ब्राह्मणाः ममास्य कर्मणः स्वस्तिं भवन्तो ब्रवन्तु। ॐ स्वस्ति ३। ॐ स्वुस्तिनऽइन्द्रोवृद्धश्रवाःस्वुस्तिनः पूषाविश्ववेदाः। स्वुस्तिनऽस्ताक्ष्योऽअरिष्टनेमिःस्वुस्तिनो बृहुस्पतिर्दधातु॥१॥

समुद्रमथनाज्जाता जगदानन्दकारिका। हरिप्रिया च माङ्गल्या तां श्रियंच ब्रुवन्तु नः॥ २॥

भो ब्राह्मणाः ममास्य कर्मणः श्रीरस्त्विति भवन्तो ब्रुवन्तु। अस्तु श्रीः॥ ३॥ ॐ श्रीश्चतेलुक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमुश्विनौव्यात्तम्। इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण॥१॥ अस्मिन्पुण्याहवाचने न्यूनातिरिक्तो यो विधिः स उपविष्टब्राह्मणानां वचनात् श्रीमहागणपतिप्रसादाच्च सर्वः परिपूर्णोऽस्तु। अस्तु परिपूर्ण इति विप्रा ब्रूयुः। इति पुण्याहवाचनम्।

पुण्याहवाचन—यजमान मूल में लिखित 'ब्राह्म्यं पुण्यं महद्यच्च सृष्टि उत्पादनकारकम्। वेदवृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवन्तु नः॥ १॥ भो ब्राह्मणाः ममास्य कर्मणः पुण्याहं भवन्तो ब्रुवन्तु' यह पढ़े; तब ब्राह्मण लोग तीन बार 'ॐ पुण्याहं, ॐ पुण्याहं, ॐ पुण्याहं' ऐसा (तीन बार) कहें। फिर यजमान 'पुनन्तु मां देवजनाः पुनन्तु मनसाधियः। पुनन्तु विश्वा भूतानि जातवेदो पुनीहि मा॥ १॥ पृथिव्यामुद्धृतायां तु यत्कल्याणं पुराकृतम्। ऋषिभिः सिद्धगन्धर्वैः तत् कल्याणं ब्रुवन्तु नः॥ २॥ भो ब्राह्मणाः ममास्य कर्मणः कल्याणं ब्रुवन्तु' इस प्रकार कहे; तब ब्राह्मण लोग 'ॐ कल्याणं, ॐ कल्याणं, ॐ कल्याणं' कहें। फिर यजमान 'यथेमां वाणीं कल्याणीमावदानि जनेभ्यः। ब्रह्मराजन्याभ्यां शूद्राय चार्याय च स्वाय चारणाय च। प्रियो देवानां दक्षिणायै दातुरिह भूयासमयम्मेकामः समृद्ध्यतामुपमादोनमतु॥ १॥ सागरस्य यथावृद्धिर्महालक्ष्म्यादिभिः कृता। सम्पूर्णा सुप्रभावा च तां च ऋद्धिं ब्रुवन्तु नः' इस प्रकार से ब्राह्मणों से कहे; तब ब्राह्मण लोग 'ॐ ऋद्ध्यताम्, ॐ ऋद्ध्यताम्, ॐ ऋद्ध्यताम्' ऐसा उत्तर में कहें। फिर इसके उपरान्त यजमान ब्राह्मणों से 'ॐ सत्रस्य ऋद्धि०' 'स्वस्तिस्तु याऽविनाशाख्या०' इन दो मन्त्रों के साथ 'भो ब्राह्मणाः ममास्य कर्मणः स्वस्तिं भवन्तो नो ब्रुवन्तु' ऐसा कहे, तब ब्राह्मण लोग 'ॐ स्वस्ति, ॐ स्वस्ति, ॐ स्वस्ति' कहें। फिर यजमान 'स्वस्तिनः इन्द्रः' इत्यादि कहकर 'समुद्रमथनाज्जाता जगदानन्दकारिका। हरिप्रिया च माङ्गल्या तां श्रियं च ब्रुवन्तु नः॥' तथा भो ब्राह्मणाः ममास्य कर्मणः श्रीरस्तु इति भवन्तो ब्रुवन्तु' ऐसा कहे, तब ब्राह्मण 'अस्तु श्रीः, अस्तु श्रीः, अस्तु श्रीः' कहें। फिर यजमान 'श्रीश्चते०' इत्यादि कहकर 'अस्मिन् पुण्याहवाचने न्यूनातिरिक्तो यो विधिः स उपविष्टानां ब्राह्मणानां वचनात् श्रीमहागणपतिप्रसादाच्च सर्वः परिपूर्णो अस्तु' ऐसा कहे, तब ब्राह्मण लोग 'अस्तु परिपूर्णम्, अस्तु परिपूर्णम्, अस्तु परिपूर्णम्' ऐसा कहें। इस प्रकार से पुण्याहवाचन करना चाहिये।

ततो ब्राह्मणवरणपक्षे—स्वदक्षिणहस्ते गन्धपुष्पताम्बूलकमण्डलुमुद्रिकासनमालावासांस्यादाय देशकालौ सङ्कीर्त्य अद्यामुकगोत्रोऽमुकशर्माहं चतुर्विधपुरुषार्थसिद्ध्यर्थं संवत्सरसुखप्राप्तिकामो दुर्गाप्रीतिकामो वा अद्यप्रभृतिमहानवमीपर्यन्तं प्रत्यहं वार्षिकशरत्कालीन(वा वासंतीयकालीन)दुर्गामहापूजापूर्वकनवार्णमन्त्रजपसहितचण्डीसप्तशतीपाठकरणार्थमेभिर्गन्धपुष्पताम्बूलकमण्डलुमुद्रिकासनमालावासोभिरमुकगोत्रममुकशर्माणं ब्राह्मणं भवन्तं वृणे—इति ब्राह्मणं वृणुयात्। वृतोऽस्मीति प्रतिवचनम्। ॐ यथाविहितं कर्म्म कुरु इति प्रार्थ्य ॐ यथाज्ञानं करवाणीति प्रतिवचनानन्तरं ब्राह्मणं गन्धादिभिः सम्पूजयेत्। ततो गौरसर्षपान् गृहीत्वा—

ॐ अपसर्पन्तु ये भूता ये भूता भूमिसंस्थिताः। ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया॥ १॥

इति सर्वदिक्षु विकीर्य,

सूर्यः सोमो यमः कालः सन्ध्ये भूतान्यहः क्षपाः। पवनो दिक्पतिर्भूमिराकाशं खेचरामराः॥
ब्रह्मशासनसमास्थाय कुरुध्वमिह सन्निधिम्।

इति भूमिं स्पृष्ट्वा दिग्बन्धं कुर्यात्। ततः आचम्य पञ्चगव्येन भूमिं प्रोक्ष्य ततः पूर्वोक्तमार्गेण भूतशुद्धिं प्राणप्रतिष्ठामन्तर्मातृकाबहिर्मातृकान्यासं च कृत्वा नवार्णोक्तैकादशन्यासान्कुर्य्यात्। एवं न्यासविधिं विधाय कलशं स्थापयेत्।

ब्राह्मणों के वरण करने की विधि—यजमान अपने दक्षिणहस्त में गन्ध, पुष्प, ताम्बूल, कमण्डलु, अङ्गूठी, आसन, माला तथा वस्त्रों को लेकर देश-काल का उच्चारण करके 'अद्यामुकगोत्रो शर्माहं (वर्माहम् गुप्ताहं वा) चतुर्विधपुरुषार्थसिद्ध्यर्थं संवत्सरसुखप्राप्तिकामो दुर्गाप्रीतिकामो वा अद्यप्रभृति महानवमीपर्यन्तं प्रत्यहं वार्षिक-शरत्कालीन (वा वासन्तीयकालीन) दुर्गामहापूजापूर्वकं नवार्णमन्त्रजपसहितं चण्डीसप्तशतीपाठकरणार्थं एभिर्गन्ध, पुष्प, ताम्बूल, कमण्डलु, मुद्रिकासनमालावासोभिरमुकगोत्रममुकशर्माणं ब्राह्मणं भवन्तं वृणे' कहकर ब्राह्मण का वरण करे। ब्राह्मण को 'वृतोस्मि' कहकर यजमान को प्रतिवचन देना चाहिये। फिर यजमान ब्राह्मण से या ब्राह्मणों से 'यथाविहितं कर्म कुरु' ऐसा कहे। फिर ब्राह्मण 'यथाज्ञानं करवाणि' ऐसा प्रतिवचन कहे। प्रतिवचन के अनन्तर ब्राह्मण को गन्धादि देकर पूजित करे। फिर हाथ में श्वेत सरसों लेकर 'ॐ अपसर्पन्तु ये भूताः' इत्यादि श्लोक कहकर सब दिशाओं में सरसों बिखेर कर 'सूर्यः सोमो यमः कालः सन्ध्ये भूतान्यहः क्षपाः। पवनो दिक्पतिर्भूमिराकाशं खेचरामराः। ब्रह्मशासनमास्थाय कुरुध्वमिह सन्निधिम्' यह श्लोक बोलकर भूमि का स्पर्श कर दिग्बन्ध करना चाहिये। फिर आचमन कर पञ्चगव्य से भूमि का प्रोक्षण कर पूर्वोक्त विधि से भूतशुद्धि, प्राणप्रतिष्ठा, अन्तर्मातृका, बहिर्मातृकान्यास करके नवार्ण मन्त्र के न्यास में बताये गये ग्यारह न्यासों को करे। इस प्रकार न्यासविधि करके कलशस्थापन करे।

तत्र प्रयोगः—महीद्यौरिति भूमिं स्पृष्ट्वा ॐ मुहीद्यौः पृथिवीचनऽइमंय्यज्ञम्मिमिक्षताम्। पिपृतान्नोभरीमभिः॥१॥ इति भूमिं प्रार्थ्य तस्यां भुव्यङ्कुररोपणार्थं शुद्धमृदं प्रक्षिप्य ॐ धान्यमसिधिनुहिदेवान्प्राणायत्वोदानायत्त्वादीर्घा-मनुप्रसितिमायुषेधान्देवोवः सविताहिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेणपाणिनाचक्षुषेत्वामहीनांपयोसि॥२॥ इति तस्यां मृदि यवादीन्प्रक्षिप्य ॐ आजिघ्रकलशम्मह्यात्त्वाविशन्त्विन्दवः। पुनरूर्ज्जानिवर्त्तस्वसानः सहस्रन्धुक्ष्वोरुधारापयस्वती पुनर्म्माविशताद्रयिः॥३॥ इति ताम्रकलशं मृन्मयं वा कलशं निधाय वरुणस्योत्तम्भनमसिवरुणस्यस्कम्भसर्ज्जनीस्थो वरुणस्यऋतसदन्यसिवरुणस्यऽऋतसदनमसिवरुणस्यऽऋतसदनमासीद॥४॥ इति जलेनापूर्य गन्धद्वारेति गन्धं प्रक्षिपेत्। ॐ गन्धद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीम्। ईश्वरींसर्वभूतानान्तामिहोपह्वयेश्रियम्॥५॥ याऽओषधीरिति सर्वौषधीः। ॐ याऽओषधीः पूर्वाजातादेवेभ्यस्त्रियुगम्पुरा। मनैनुबभ्रूणामहठं०शतंधामानिसप्तच॥६॥ काण्डा-त्काण्डादिति दूर्वाः। ॐ काण्डात्काण्डात्प्ररोहन्तीपरुषः परुषस्प्परि। एवानोदूर्वेप्रतनुसहस्रेणशतेनच॥७॥ अश्वत्थेवेति पञ्चपल्लवान्। ॐ अश्वत्थेवोनिषदनम्पर्णेवोवसतिष्कृतागोभाजऽइत्किलासथयत्सनवथपूरुषम्॥८॥ स्योनापृथिवीति सप्तमृदः। ॐ स्योनापृथिविनोभवान्नृक्षरानिवेशनी। यच्छानः शर्म्मसप्रथाः॥९॥ याः फलिनीरिति फलम्। ॐ याः फलिनीर्याऽअफलाऽअपुष्पायाश्चपुष्पिणीः। बृहस्पतिप्रसूतास्तानोमुञ्चन्त्वठं०हसः॥१०॥ परिवाजेति पञ्चरत्नानि। ॐ परिवाजपतिः कविरग्निर्हव्यान्यक्रमीत्। दधद्रत्नानिदाशुषे॥११॥ हिरण्यगर्भेति हिरण्यम्। ॐ हिरण्यगर्भः समवर्त्त-ताग्रेभूतस्यजातः पतिरेकऽआसीत्। सदाधारपृथिवींद्यामुतेमांकस्मै देवाय हविषाविधेम॥१२॥ युवासुवासा इति रक्तवस्त्रेण सूत्रेण वा वेष्टयेत्। ॐ युवासुवासाः परिवीतऽआगात्सऽउश्रेयान्भवति जायमानः। तं धीरासःकवयऽ उन्नयन्तिस्वाध्योमनसादेवयन्तः॥१३॥ पूर्णादर्वीति तण्डुलपूर्णं ताम्रपात्रमुपरि न्यसेत्। ॐ पूर्णादर्व्विपरापत-सुपूर्णापुनरापत। वस्नेवविक्क्रीणावहाऽइषमूर्ज्जंठं०शतक्रतो॥१४॥ तत्त्वायामीति वरुणमावाह्य तत्त्वायामीति शुनःशेप ऋषिः। त्रिष्टुप् छन्दः। वरुणो देवता। वरुणावाहने विनियोगः। ॐ तत्त्वायामिब्रह्मणावंदमानुस्तदा-शास्तेयजमानोहविर्भिः। अहेडमानोवरुणेहबोध्युरुशठं०समानऽआयुः प्रमोषीः॥१॥ ॐ भूर्भुवः स्वः वरुण इहागच्छ इह तिष्ठ—इत्यावाह्य 'ॐ अपाम्पतिवरुणाय नमः' इति नाममन्त्रेण षोडशोपचारैः सम्पूज्य पुष्पाञ्जलिं दत्त्वा,

सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः। आयान्तु यजमानस्य दुरितक्षयकारकाः॥

इति तीर्थान्यावाहयेत्पूजयेच्च। ततः कलशस्य मुखे विष्णुरित्यादि कलशाभिमन्त्रणं कृत्वा 'देवदानवसंवादे' इत्यादि प्रार्थ्य वरुणं प्रणमेत्। इति कलशस्थापनम्।

कलशस्थापन-प्रयोग—यजमान 'ॐ महीद्यौः०' इत्यादि मूलोक्त मन्त्रों से पृथ्वी का स्पर्श कर उस पर शुद्ध मिट्टी जवारे बोने के लिये (अङ्कुर-रोपणार्थ) बिछाये। फिर 'ॐ धान्यमसि धिनुहि देवा०' इत्यादि मन्त्र से उस मिट्टी पर जौ या गेहूँ को बिखेर दे। फिर 'ॐ आजिघ्रकलशं०' इत्यादि मन्त्र से ताम्र का या पीतल का या मिट्टी का कलश स्थापित करे (स्टील का कलश रखना दोषपूर्ण है)। फिर 'ॐ वरुणस्योत्तम्भनमसि०' इस मन्त्र से उस कलश में जल डाले। फिर 'ॐ गन्धद्वारां दुराधर्षां०' इत्यादि मन्त्र से गन्ध डाले। 'ॐ या ओषधिपूर्वजाता०' इस मन्त्र से तुलसीदल डाले तथा सर्वौषधि भी डाले। 'ॐ काण्डात्काण्डात् प्ररोहन्ती०' इत्यादि मन्त्र से दूर्वा डाले। 'ॐ अश्वत्थेवो निषूदनं०' मन्त्र से पञ्चपल्लव डाले। 'ॐ स्योनापृथिवी०' मन्त्र पढ़कर कलश में सात प्रकार की मिट्टी डाले। 'ॐ या फलिनीऽफला०' मन्त्र से सुपारी डाले। 'ॐ परिवाजपति०' इत्यादि मन्त्र से पञ्चरत्न डाले। 'ॐ हिरण्यगर्भः समवर्त्तताग्रे०' इत्यादि मन्त्र से दक्षिणा चढ़ाये। 'ॐ युवा सुवासा०' मन्त्र से रक्तवस्त्र या सूत्र से कलश को लपेटे। फिर 'ॐ पूर्णादर्वि परापत०' इस मन्त्र से उस पर पूर्णपात्र रख दे। फिर 'ॐ तत्त्वायामि ब्रह्मणा०' मन्त्र बोलकर 'ॐ भूर्भुवः स्वः वरुण इहागच्छ इह तिष्ठ' यह पढ़कर वरुण का आवाहन कलश में करके 'ॐ अपाम्पतिवरुणाय नमः' इस मन्त्र से उनका षोडशोपचार पूजन करे। फिर 'सर्वे समुद्राः' इस श्लोक को पढ़कर कलश में सभी तीर्थों का आवाहन करे। अन्त में 'कलशस्य मुखे विष्णुः' इत्यादि श्लोकों से प्रार्थना तथा 'देवदानवसंवादे०' इस श्लोक से प्रणाम करे। यह कलशस्थापन की विधि है।

कलशोपरि देवीस्थापनम्

ततः कलशोपरि सिंहासनं निधाय तत्र सावयवां स्वर्णमयीं दुर्गाप्रतिमामग्न्युत्तारणपूर्वकं संस्थाप्य पट्टवस्त्रैराच्छाद्य पूजयेत्। अग्न्युत्तारणसूक्तस्तु पूर्वमुक्त एव। लेख्यमूर्तिश्चेत्तदा नाभिषेकः। अभिषेकादिकं तत्र न कर्त्तव्यं किं तु तदग्रे पात्रं स्थापयित्वा तस्मिन्नेव कर्तव्यम्।

नवरात्रि कलश पर देवी की स्थापना-विधि—फिर उस कलश के ऊपर सिंहासन (देवी का) रखकर उस पर देवी की सावयव स्वर्णमयी (अथवा पीतल, ताम्र या कांस्य की) प्रतिमा अग्नि उत्तारण करके स्थापित करे तथा उसे वस्त्रों से आच्छादित भी कर दे। अग्न्युत्तारण सूक्त पूर्व (पद्धतिकाण्ड) में दिया जा चुका है। यदि ताम्रपत्र पर लिखित मूर्ति हो तो अभिषेक नहीं करना चाहिये। अभिषेक भी सिंहासन पर न करके मूर्ति को किसी पात्र में स्थापित करके उसी में करना चाहिये।

अथ पूजा—

'ॐ आगच्छ वरदे देवि दैत्यदर्पनिषूदनि। पूजां गृहाण सुमुखि नमस्ते शङ्करप्रिये॥
सर्वतीर्थमयं वारि सर्वदेवसमन्वितम्। इमं घटं समागच्छ तिष्ठ देवि गणैः सह॥
दुर्गे देवि समागच्छ सान्निध्यमिह कल्पय। बलिं पूजां गृहाण त्वमष्टभिः शक्तिभिः सह॥
शङ्खचक्रगदाहस्ते शुभ्रवर्णे शुभासने। मम देवि वरं देहि सर्वैश्वर्यप्रदायिनि॥
एहि दुर्गे महाभागे रक्षार्थं मम सर्वदा। आवाहयाम्यहं देवि सर्वकामार्थसिद्धये॥
अस्यां मूर्तौ समागच्छ स्थितिं मत्कृपया कुरु। रक्षां कुरु सदा भद्रे विश्वेश्वरि नमोऽस्तु ते॥

पूजन—फिर मूल में लिखे छः श्लोकों 'ॐ आगच्छ वरदे देवि०' इत्यादि को पढ़े। उनका भावार्थ इस प्रकार है— हे दैत्यदर्पनिषूदनि! शङ्करप्रिये, वर देने वाली सुमुखि देवि! आओ और इस पूजा को ग्रहण करो;

आपको नमस्कार है। हे दुर्गादेवि! आप आओ और इस कलश के सान्निध्य में रहो, अपनी आठों शक्तियों के साथ मेरी बलि एवं पूजा को स्वीकार करो। हाथ में शङ्ख, चक्र, गदा लिये शुभ्र वर्ण की शुभासन पर विराजमान देवि! मुझे सभी ऐश्वर्य प्राप्त होने का वर दे। हे महाभागे दुर्गा! आकर मेरी सर्वदा रक्षा करो। मैं आपको सब कामनाओं की पूर्ति के लिये बुला रहा हूँ। इस मूर्ति में स्थित होकर मुझपर कृपा करें। हे भद्रे! आप मेरी रक्षा करो। हे विश्वेश्वरि! आपको नमस्कार है।

ॐ हिरण्यवर्णांहरिणीं सुवर्णरजतस्रजाम्। चन्द्रांहिरण्मयींलक्ष्मींजातवेदोमआवह॥१॥ ॐ भूर्भुवः स्वः भगवति दुर्गे इहागच्छ इह तिष्ठ। इत्यावाहनम्।

नानाप्रभासमाकीर्णं नानावर्णविचित्रितम्। आसनं कल्पितं देवि प्रीत्यर्थं तव गृह्यताम्॥

ॐ तांमआवहजातवेदोलक्ष्मीमनपगामिनीम्। यस्यांहिरण्यंविन्देयङ्गामश्वं पुरुषानहम्॥२॥ ॐ दुर्गायै नमः आसनम्।

गङ्गादिसर्वतीर्थेभ्य आनीतं तोयमुत्तमम्। पाद्यं तेऽहं प्रदास्यामि गृहाण परमेश्वरि॥

ॐ अश्वपूर्वांरथमध्यांहस्तिनादप्रबोधिनीम्। श्रियं देवीमुपह्वयेश्रीर्मादेवीजुषताम्॥३॥ इति पाद्यम्।

गन्धाक्षतैश्च संयुक्तं फलपुष्पयुतं तव। अर्घ्यं गृहाण दत्तं मे प्रसीद परमेश्वरि॥

ॐ कांसोस्मितांहिरण्यप्राकारामार्द्रांज्वलन्तींतृप्तान्तर्पयन्तीम्। पद्मेस्थितांपद्मवर्णांतामिहोपह्वयेश्रियम्॥४॥ इत्यर्घ्यम्।

गङ्गा गोदावरी चैव यमुना च सरस्वती। ताभ्य आचमनीयार्थमानीतं तोयमुत्तमम्॥

ॐ चन्द्रांप्रभासांयशसाज्वलन्तींश्रियंलोकेदेवजुष्टामुदाराम्। तांपद्मनीमींशरणमहंप्रपद्येऽअलक्ष्मीर्मेनश्यतां-त्वांवृणे॥५॥ इत्याचमनीयम्।

ज्ञानमूर्ते भद्रकालि दिव्यमूर्ते सुरेश्वरि। स्नानं गृहाण देवि त्वं नारायणि नमोऽस्तु ते॥

ॐ आदित्यवर्णेतपसोऽधिजातोवनस्पतिस्तव वृक्षोऽथबिल्वः। तस्यफलानितपसानुदन्तुममान्तरायाश्चबाह्या-अलक्ष्मीः॥६॥ इति स्नानम्।

पञ्चामृतं मयानीतं पयोदधिसमन्वितम्। घृतं मधु शर्करया प्रीत्यर्थं प्रतिगृह्यताम्॥

ॐ पंचनद्यः सरस्वतीमपियन्तिसस्रोतसः। सरस्वतीतुपञ्चधासोदेशेभवत्सरित्॥ इति पञ्चामृतस्नानम्॥७॥ पुनः शुद्धोदकस्नानम्।

कामधेनुसमुत्पन्नं सर्वेषां जीवनं परम्। पावनं यज्ञहेतुश्च पयःस्नानार्थमर्पितम्॥

ॐ पयः पृथिव्याम्पयऽओषधीषुपयोदिव्यन्तरिक्षेपयोधाः। पयस्वतीःप्रदिशः सन्तुमह्यम्॥८॥ इति पयःस्नानम्।

पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम्। दध्यानीतं मया देवि स्नानार्थं प्रतिगृह्यताम्॥

ॐ दधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्यवाजिनः। सुरभिमोमुखाकरत्प्रणऽआयूंषितारिषत्॥९॥ इति दधिस्नानम्।

नवनीतसमुत्पन्नं सर्वसन्तोषकारकम्। घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम्॥

ॐ घृतंघृतपावानः पिबतवसांवसापावानः पिबतान्तरिक्षस्यहविरसिस्वाहादिशः प्रदिशऽआदिशोविदिशऽउद्दि-शोदिग्भ्यः स्वाहा॥१०॥ इति घृतस्नानम्।

तरुपुष्पसमुद्भूतं सुस्वादु मधुरं मधु। तेजःपुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम्॥

ॐ मधुवाताऽऋतायतेमधुक्षरन्तिसिन्धवः। माध्वीर्नःसन्त्वोषधीः॥१॥ ॐ मधुनक्तमुतोषसोमधुमत्पार्थिवर्ठ०रजः। मधुद्यौरस्तुनःपिता॥२॥ ॐ मधुमान्नोव्वनस्पतिर्म्मधुमाँ२ऽअस्तुसूर्यः॥ माध्वीर्गावोभवन्तुनः॥३॥ ॥११॥ इति मधुस्नानम्।

इक्षुसारसमुद्भूता शर्करा पुष्टिकारिका। महापहारिका दिव्या स्नानार्थं प्रतिगृह्यताम्॥

ॐ अपार्ठ०रसमुद्वयसर्ठ०सूर्य्येसन्तर्ठ०समाहितम्। अपार्ठ०रसस्ययोरसस्तंवोगृह्णाम्युत्तममुपयामगृहीतोसीन्द्रायत्वाजुष्टंगृह्णाम्येषतेयोनिरिन्द्रायत्वाजुष्टतमम्॥१२॥ इति शर्करोदकस्नानम्।

मलयाचलसम्भूतं चन्दनागरुसम्भवम्। चन्दनं देवदेवि त्वं स्नानार्थं प्रतिगृह्यताम्॥

ॐ गन्धद्वारां दुराधर्षांनित्यपुष्टांकरीषिणीम्। ईश्वरींसर्वभूतानान्तामिहोपह्वयेश्रियम्॥१३॥ इति गन्धोदकस्नानम्।

नाना सुगन्धिद्रव्यं च चन्दनं रजनीयुतम्। उद्वर्त्तनं मया दत्तं स्नानार्थं प्रतिगृह्यताम्॥

ॐ अहिंरिवभोगैःपर्येतिबाहुंज्यायाहेतिम्परिबाधमानः। हस्तघ्नोविश्वाव्वयुनानिविद्वान्पुमान्पुमार्ठ०सम्परिपातुव्विश्वतः॥१३॥ इत्युद्वर्तनस्नानम्।

ज्ञानमूर्ते भद्रकालि दिव्यमूर्ते सुरेश्वरि। स्नानं गृहाण देवि त्वं नारायणि नमोऽस्तु ते॥

ॐ वरुणस्योत्तम्भनमसिवरुणस्य स्कंभसर्जनीस्थोवरुणस्यऽऋतसदन्यसिवरुणस्यऽऋतसदनमसिवरुणस्यऽऋतसदनमासीद॥१४॥ इति शुद्धस्नानम्॥ स्नानान्ते आचमनीयम्।

निर्मितं तन्तुभिः सूक्ष्मैर्नानावर्णविचित्रितम्। वस्त्रं गृहाण मे देवि प्रीत्यर्थं प्रतिगृह्यताम्॥

ॐ उपैतुमां देवसखःकीर्तिश्चमणिनासह। प्रादुर्भूतोस्मिराष्ट्रेस्मिन्कीर्त्तिमृद्धिंददातुमे॥१५॥ इति वस्त्रम्। आचमनम्।

कञ्चुकीमुपवस्त्रं च नानारत्नैः समन्वितम्। गृहाण त्वं मया दत्तं शङ्करप्राणवल्लभे॥

अलङ्कारान् महादिव्यान्नानारत्नविनिर्मितान्। गृहाण देवमातस्त्वं प्रसीद परमेश्वरि॥

ॐ क्षुत्पिपासामलांज्येष्ठामलक्ष्मींनाशयाम्यहम्। अभूतिमसमृद्धिंचसर्वांनिर्णुदमेगृहात्॥१६॥ इति कञ्चुकीमाभूषणं च।

मलयाहिसमुद्भूतं कर्पूरागरुवासितम्। मया निवेदितं भक्त्या चन्दनं प्रतिगृह्यताम्॥

केशरागरुसंयुक्तं चन्दनादिसमन्वितम्। कस्तूरिकासमायुक्तं कुङ्कुमं प्रतिगृह्यताम्॥

ॐ गन्धद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीम्। ईश्वरींसर्वभूतानां तामिहोपह्वये श्रियम्॥१७॥ इति गन्धं कुङ्कुमं च।

अक्षताश्च सुरश्रेष्ठे कुङ्कुमाक्ताः सुशोभिताः। मया निवेदिता भक्त्या प्रीत्यर्थं प्रतिगृह्यताम्॥

ॐ अक्षन्नमी मदन्तह्यवप्रियाऽअधूषत। अस्तोषतस्वभानवोविप्रानविष्ठयामतीयोजान्विन्द्रतेहरी॥१८॥ इत्यक्षतान्।

मन्दारपारिजातानि पाटलीपङ्कजान्यपि। मयाहृतानि पूजार्थं पुष्पाणि प्रतिगृह्यताम्॥

ॐ मनसःकाममाकूतिंवाचः सत्यमशीमहि। पशूनांरूपमन्नस्यमयिश्रीःश्रयतांयशः॥१९॥' इति पुष्पाणि॥ सौभाग्यद्रव्यम्।

हरिद्रां कुङ्कुमं चैव सिन्दूरादि समन्वितम्। सौभाग्यद्रव्यसंयुक्तं गृहाण परमेश्वरि॥

(ॐ अहिंरिवभोगैरिति सौभाग्यद्रव्यम्॥२०॥) एवं पुष्पान्तपूजां कृत्वा पूर्वोक्तनवार्णं मन्त्रोक्तावरणदेवताः सम्पूज्याङ्गपूजां कुर्यात्।

आवाहन—फिर मूल में लिखित 'ॐ हिरण्यवर्णां०' ऋचा से आवाहन करे। 'ॐ नानाप्रभासमाकीर्णं' तथा 'ॐ तां म आवह जातवेदो०' से आसन प्रदान करे। 'गङ्गादिसर्वतीर्थेभ्य०' तथा 'ॐ अश्वपूर्वां०' से पाद्य (पैर धोने के लिये जल) दे। फिर 'गन्धाक्षतैश्च संयुक्तं' इत्यादि श्लोक तथा 'ॐ कांसोऽस्मितां हिरण्य०' इत्यादि ऋचा पढ़कर देवी को अर्घ्य (हाथ धुलाने के लिये सुगन्धित जल) प्रदान करे। 'गंगा गोदावरी०' तथा 'ॐ चन्द्रां प्रभासां०' से देवी को आचमनीय (कुल्ले के लिये जल) प्रदान करे। 'पञ्चामृतं मयानीतं०' तथा 'ॐ पञ्चनद्यः सरस्वती०' मन्त्रों से देवी को पञ्चामृत से स्नान कराये तथा उसके पश्चात् शुद्ध जल से भी स्नान कराना चाहिये। (गोदुग्ध, गोघृत, गोदधि, मधु एवं शर्करा को मिलाने से पञ्चामृत होता है)। फिर 'कामधेनु समुत्पन्ने' तथा 'ॐ पयः पृथिव्यां०' इस मन्त्र से पय (गोदुग्ध) से स्नान कराये। फिर 'पयसस्तु समुद्भूतं०' तथा 'ॐ दधिक्राब्णोऽकारिषं०' इन दोनों से दधि (गाय के दही) में देवी को स्नान कराये। फिर 'नवनीतसमुत्पन्नं०' तथा 'ॐ घृतं घृतपावानः०' इन दोनों से गोघृत में स्नान कराये। तदनन्तर 'तरुपुष्पसमुद्भूतं०' तथा 'ॐ मधुव्वाता ऋतायते०' से देवी को मधुस्नान कराये। फिर 'इक्षुसारसमुद्भूता०' तथा 'ॐ अपाᳬ रस०' द्वारा शर्करा (देशी शक्कर) से स्नान कराये। तत्पश्चात् 'मलयाचलसम्भूतं' तथा 'ॐ गन्धद्वारां०' के द्वारा गन्धोदक (सुगन्धित जल) में स्नान कराये। तदनन्तर 'नानासुगन्धिद्रव्यं च०' तथा 'ॐ अहिरिव भोगैः' इत्यादि से देवी को उद्वर्त्तन (उबटन) कराये। तत्पश्चात् 'ज्ञानमूर्ते भद्रकालि' तथा 'ॐ वरुणस्योत्तम्भनमसि०' से शुद्ध स्नान कराकर स्नान के अन्त में आचमनीय भी देना चाहिये (गोदुग्ध इत्यादि द्रव्यों से स्नान करान के पश्चात् प्रत्येक स्नान के उपरान्त शुद्ध जल से स्नान कराते हैं)। स्नानोपरान्त 'निर्मितं तन्तुभिः०' तथा 'ॐ उपैतु मां देवसखा०' से देवी को वस्त्र प्रदान करे तथा वस्त्र देने के उपरान्त आचमन कराये। फिर 'कञ्चुकीमुपवस्त्रं०' तथा 'ॐ क्षुत्पिपासा०' से उपवस्त्र, कञ्चुकी तथा आभूषणादि प्रदान करे। तदनन्तर 'मलयाद्रिसमुद्भूतं०' तथा 'ॐ गन्धद्वारां०' पढ़कर गन्ध एवं कुङ्कुम प्रदान करे। इसके बाद 'अक्षताश्च सुरश्रेष्ठा०' तथा 'ॐ अक्षन्नमीमदन्त०' इत्यादि से अक्षत समर्पित करे। फिर 'मन्दारपारिजातानि' तथा 'ॐ मनसः काममाकूतिं०' से पुष्प चढ़ाये और अन्त में 'हरिद्रां कुङ्कुमं चैव०' तथा 'ॐ अहिरिव भोगैः०' से सौभाग्य द्रव्य चढ़ाये। इस प्रकार पूजा करने के उपरान्त पूर्व में कथित नवार्ण मन्त्रोक्त आवरणदेवताओं की पूजा करके फिर देवी की अङ्गपूजा करे।

अथाङ्गपूजा। ॐ दुर्गायै नमः पादौ पूजयामि। ॐ महाकाल्यै नमः गुल्फौ पूजयामि। ॐ मङ्गलायै नमः जानुनी पूजयामि। ॐ कात्यायन्यै नमः ऊरू पूजयामि। ॐ भद्रकाल्यै नमः कटिं पूजयामि। ॐ कमलायै नमः नाभिं पूजयामि। ॐ शिवायै नमः उदरं पूजयामि। ॐ क्षमायै नमः हृदयं पूजयामि। ॐ स्कन्दाय नमः कण्ठं पूजयामि। ॐ महिषासुरमर्दिन्यै नमः नेत्रे पूजयामि। ॐ उमायै नमः शिरः पूजयामि। ॐ विन्ध्यनवासिन्यै नमः सर्वाङ्गं पूजयामि नमः। देव्या दक्षिणे सिंहं पूजयामि। वामे महिषं पूजयामि। इत्यङ्गपूजां कुर्यात्।

दशाङ्गं गुग्गुलुं धूपं चन्दनागुरुसंयुतम्। मया निवेदितं भक्त्या गृहाण परमेश्वरि॥

ॐ कर्द्दमेन प्रजा भूता मयि सम्भवकर्द्दम। श्रियं वासय मे कुले मातरं पद्ममालिनीम्॥२०॥ इति धूपम्।

आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया। दीपं गृहाण देवि त्वं त्रैलोक्यतिमिरापहम्॥

ॐ आपः स्रजन्तु स्निग्धानि चिक्लीतवस मे गृहे। निच देवीं मातरं श्रियं वासय मे कुले॥२१॥ इति दीपम्।

अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितम्। भक्ष्यभोज्यसमायुक्तं प्रीत्यर्थं प्रतिगृह्यताम्॥

ॐ आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम्। चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥२२॥ इति नैवेद्यम्। नैवेद्यमध्ये पानीयम् उत्तरापोशनं हस्तप्रक्षालनं मुखप्रक्षालनम् आचमनीयं च समर्पयामि।

मलयाचलसम्भूतं कस्तूर्या च समन्वितम्। करोद्वर्तनकं देवि गृहाण परमेश्वरि॥

इति करोद्वर्तनम्।

इदं फलं मया देवि स्थापितं पुरतस्तव। तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि॥

ॐ आर्द्रां यः करिणीं यष्टींसुवर्णां हेममालिनीम्। सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो य आवह॥२३॥ इति ऋतुफलम्।

पूगीफलं महद्दिव्यं नागवल्ल्या दलैर्युतम्। कर्पूरैलासमायुक्तं ताम्बूलं प्रतिगृह्यताम्॥

ॐ याःफलिनीर्य्याऽअफलाऽअपुष्पायाश्चपुष्पिणीः। ब्बृहस्पतिप्प्रसूतास्तानोमुञ्चन्त्वठं०हसः॥२४॥ इति ताम्बूलम्।

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः। अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे॥

ॐ तामऽआवहजातवेदोलक्ष्मीमनपगामिनीम्। यस्यां हिरण्यंप्रभूतंगावोदास्योश्वान् विन्देयंपुरुषाहम्॥२५॥ इति दक्षिणाम्।

कर्पूरार्तिक्यम्—

कदलीगर्भसम्भूतं कर्पूरं च प्रदीपितम्। आरार्तिक्यमहं कुर्वे पश्य मे वरदा भव॥

ॐ इदठं०हविः प्प्रजननम्मेऽअस्तुदशवीरठं०सर्वगणठं०स्वस्तये। आत्मसनिप्रजासनिपशुसनिलोकसन्न्यभयसनि। अग्निःप्प्रजाम्बहुलाम्मेकरोत्त्वन्नम्पयोरेतोऽअस्म्मासुधत्त॥२६॥ इति कर्पूरार्तिक्यम्।

यानि कानि च पापानि जन्मान्तरकृतानि च। तानि सर्वाणि नश्यन्तु प्रदक्षिणपदेपदे॥

ॐ यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम्। सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत्॥२७॥ इति प्रदक्षिणा।

नानासुगन्धपुष्पाणि यथाकालोद्भवानि च। पुष्पाञ्जलि मया दत्तं गृहाण परमेश्वरि॥१॥

ततः श्रीसूक्तं सम्पूर्णं प्राकृतनीराजनार्तिं च यथाचारं पठित्वा पुष्पाञ्जलिं निवेदयेत्॥ २८ ॥

ततः साष्टाङ्गं प्रणामं कृत्वा प्रार्थयेत्—

ॐ मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि। यत्पूजितं मया देवि परिपूर्णं तदस्तु मे॥
महिषघ्नि महामाये चामुण्डे मुण्डमालिनि। यशो देहि धनं देहि सर्वान्कामांश्च देहि मे॥
जयन्ती मङ्गला काली भद्रकाली कपालिनी। दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते॥
दुर्गमे दुस्तरे कार्ये भवदुःखविनाशिनीम्। पूजयामि सदा भक्त्या दुर्गां दुर्गार्तिनाशिनीम्॥
भूतप्रेतपिशाचेभ्यो रक्षोभ्यश्च महेश्वरि। देवेभ्यो मानुषेभ्यश्च भयेभ्यो रक्ष मां सदा॥
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके। शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते॥
रूपं देहि यशो देहि भर्गं भवति देहि मे। पुत्रान् देहि धनं देहि सर्वान्कामांश्च देहि मे॥

इति सम्प्रार्थ्य कुमारीपूजां कुर्यात्। ततः (प्रत्यहं बलिदानपक्षे माषभक्तेन कूष्माण्डेन वा इक्षुदण्डेन बलिदानं कार्यम्। ततः अखण्डदीपकं प्रतिष्ठापयेत्)—

अखण्डदीपके देव्याः प्रीतये नवरात्रकम्। उज्ज्वालयेदहोरात्रमेकचित्तो धृतव्रतः॥

एवं देवीं सम्पूज्य चण्डीपाठं कुर्यात्।

अङ्गपूजा—फिर मूल में लिखित ' ॐ दुर्गायै नमः ' इत्यादि मन्त्रों से उनके सामने लिखे पाद, गुल्फ, जानु, ऊरु, कटि, नाभि, उदर, हृदय, कण्ठ, नेत्र, शिर, सर्वाङ्ग का पूजन करे तथा दक्षिण भाग में सिंह एवं वाम भाग में

महिष-पूजा करनी चाहिये। फिर मूल में लिखित 'दशाङ्गं गुग्गुलुं धूपं' तथा 'ॐ कर्दमेन प्रजाभूता०' से धूप प्रदान करे। इसके बाद 'आज्यं वर्तिसमायुक्तं०' तथा 'आपः सृजन्तु०' से दीप प्रदान करे। तत्पश्चात् 'अन्नं चतुर्विधं०' तथा 'ॐ आर्द्रां पुष्करिणी०' से नैवेद्य अर्पित करना चाहिये। नैवेद्य के मध्य पानीय उत्तरापोशन (उत्तर + आपः + अशन = भोजन के पश्चात् जलपान), हस्तप्रक्षालन, मुखप्रक्षालन तथा आचमनीय भी देना चाहिये। तदनन्तर 'मलयाचलसम्भूतं०' से करोद्वर्त्तन (भोजनोपरान्त हाथ धुलाना) करना चाहिये। इसके बाद 'इदं फलं०' तथा 'ॐ आर्द्रां यः' से ऋतुफल 'पूगीफलं महद्दिव्यं०' तथा 'ॐ या फलिनी०' से ताम्बूल चढ़ाना चाहिये। फिर 'हिरण्यगर्भगर्भस्थं' तथा 'ॐ तां म आवह जातवेदो०' से दक्षिणा देकर 'कदलीगर्भसम्भूतं०' तथा 'ॐ इदं हविः प्रजननं०' से कपूर की आरती करनी चाहिये। तत्पश्चात् 'यानि कानि च पापानि' से प्रदक्षिणा करने के बाद 'नानासुगन्धपुष्पाणि' से पुष्पाञ्जलि देनी चाहिये। फिर अन्त में श्रीसूक्त का पाठ करके हिन्दी में देवी की आरती गाकर पुष्पाञ्जलि निवेदित कर साष्टाङ्ग प्रणाम कर प्रार्थना करनी चाहिये।

प्रार्थना—'ॐ मन्त्रहीनं' इत्यादि सात श्लोक पढ़कर देवी से प्रार्थना करे। फिर अन्त में कुमारी-पूजा करनी चाहिये। प्रतिदिन बलिदान के लिये उड़द का भात, कुम्हड़ा तथा इक्षुदण्ड (ईख) का बलिदान करना चाहिये एवं अखण्ड दीपक को जलाये रखना चाहिये। नवरात्र में देवी के लिये अखण्ड दीपक जलाना चाहिये। नौ दिनों तक रात-दिन एकाग्रचित्त होकर व्रत रखने वाले को अखण्ड ज्योति जलानी चाहिये। इस प्रकार से प्रतिदिन देवी की पूजा करके चण्डीपाठ भी प्रतिदिन विधिपूर्वक करना चाहिये।

चण्डीपाठप्रकारः

आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य 'अमुकगोत्रोऽमुकशर्मा अमुकयजमानेन वृतोऽहं वा (धनकामः पुत्रकामः अमुकरोगनाशकामो वा इत्यादिविशिष्टफलोद्देशमुच्चार्य) श्रीदुर्गाप्रीतिकामो वा मार्कण्डेयपुराणीयम् ॐ सावर्णिः सूर्यतनय इत्यारभ्य सावर्णिर्भविता मनुरित्यन्तं चण्डीसप्तशतीपाठं कवचार्गलाकीलकनवार्णमन्त्रजपसहितं करिष्ये' इति सङ्कल्प्य आसनं विधाय आधारे अन्यहस्तलिखितं पुस्तकं संस्थाप्य पूजयेत्। ततोऽष्टोत्तरशतं नवार्णमन्त्रजपं कृत्वा ॐ नारायणाय नमः ॥ १ ॥ ॐ नराय नमः ॥ २ ॥ ॐ नरोत्तमाय नमः ॥ ३ ॥ ॐ देव्यै नमः ॥ ४ ॥ ॐ सरस्वत्यै नमः ॥ ५ ॥ ॐ व्यासाय नमः ॥ ६ ॥ इति नमस्कृत्य प्रणवमुच्चार्य कवचार्गलाकीलकानि पठित्वा मार्कण्डेयपुराणोक्त-चण्डीसप्तशतीस्तवपाठं कुर्यात्।

दुर्गासप्तशती (चण्डी) पाठं-विधि—सर्वप्रथम आचमन तथा प्राणायाम करके देश-काल का उच्चारण कर 'अमुकगोत्रोऽमुकोऽहं' कहकर अथवा यदि साधक स्वयं न करके ब्राह्मण द्वारा पाठ कराये तो आचार्य 'अमुक यजमानेन व्रतं' कहकर आगे 'धनकामः / स्त्रीकामः / पुत्रकामः / अमुकरोगनाशकामो (इनमें जो भी कामना हो, उसका उल्लेख करे) मार्कण्डेयपुराणीयम् ॐ सावर्णिः सूर्यतनयो इत्यारभ्य सावर्णिर्भवितामनुरित्यन्तं चण्डीसप्तशतीपाठं कवचार्गलाकीलकनवार्णमन्त्रजपसहितं करिष्ये' ऐसा सङ्कल्प कर आसन पर बैठकर आधार (चौकी या रहल) पर श्रीदुर्गासप्तशती की पुस्तक स्थापित कर उसकी पूजा करे। फिर १०८ नवार्ण मन्त्र जप करके 'ॐ नारायणाय नमः, ॐ नराय नमः, ॐ नरोत्तमाय नमः, ॐ देव्यै नमः, ॐ सरस्वत्यै नमः, ॐ व्यासाय नमः' कहकर नमस्कार कर ॐ का उच्चारण कर कवचार्गला-कीलक पढ़कर मार्कण्डेय पुराणोक्त चण्डीसप्तशती का पाठ करे।

तत्र तावत्पुस्तकवाचने नियमाः—हस्ते पुस्तकं न धार्यम्। स्वयं ब्राह्मणभिन्नेन च लिखितं विफलम्। अध्यायं समाप्य विरमेन्न तु मध्ये कदाचन। कृते विरामे मध्ये तु अध्यायादि पठेत्पुनः। ग्रन्थार्थं बुध्यमानः स्पष्टाक्षरं नातिशीघ्रं नातिमन्दं रसभावस्वरयुतं वाचयेत्।

पुस्तकपाठ के नियम—हाथ में उठाकर पुस्तक नहीं पढ़ना चाहिये। यदि ब्राह्मणेत्तर व्यक्ति द्वारा लिखित पुस्तक हो तो उसका पाठ विफल होता है (यदि छपी पुस्तक हो तो उसका पाठ ब्राह्मण द्वारा कराये अथवा ब्राह्मणेतर यजमान आचार्य का वरण कर उसके निर्देशानुसार शुद्ध पाठ करे तथा पूजनादि एवं हवन आचार्य से ही कराये)। अध्याय समाप्त होने पर ही विराम लेना चाहिये; मध्य में विराम नहीं करना चाहिये। यदि किसी कारणवश बीच में विराम लेना पड़े तो उस अध्याय को प्रारम्भ से अन्त तक पुनः पढ़ना चाहिये। पाठ करते समय श्लोकों का अर्थ समझते हुए अक्षरों का स्पष्ट उच्चारण करते हुए नातिशीघ्र नातिमन्द रसभाव-स्वरयुक्त वाचन करना चाहिये।

अथ पाठविधानम्—'एषां श्रीचण्डीसप्तशत्याः प्रथममध्यमोत्तमचरित्राणां ब्रह्मविष्णुरुद्रा ऋषयः। गायत्र्युष्णिगनुष्टुभश्छंदांसि महाकालीमहालक्ष्मीमहासरस्वत्यो देवताः। ऐंह्रींक्लीं बीजानि। अग्निवायुसूर्यास्तत्त्वानि। धर्मार्थकामसिद्ध्यर्थं सप्तशतीपाठे विनियोगः।' ॐ ब्रह्मविष्णुरुद्रऋषिभ्यो नमः शिरसि॥ १॥ ॐ गायत्र्युष्णिगनुष्टुप्छन्दोभ्यो नमः मुखे॥ २॥ ॐ महाकालीमहालक्ष्मीमहासरस्वतीदेवताभ्यो नमः हृदये॥ ३॥ ॐ ऐंह्रींक्लींबीजेभ्यो नमः गुह्ये॥ ४॥ ॐ अग्निवायुसूर्यतत्त्वेभ्यो नमः हृदये॥ ५॥ इति ऋष्यादिन्यासः। ॐ ह्रीं हृदयाय नमः॥ १॥ ॐ चं शिरसे स्वाहा॥ २॥ ॐ डिं शिखायै वषट्॥ ३॥ ॐ कां कवचाय हुम्॥ ४॥ ॐ यैं नेत्रत्रयाय वौषट्॥ ५॥ ॐ चण्डिकायै अस्त्राय फट्॥ ६॥ इति हृदयादिन्यासः।

अथ चक्रन्यासः—ॐ शम्भुतेजोज्ज्वलज्ज्वालामालिनि पावके ह्रां नन्दायै अङ्गुष्ठाभ्यां नमः॥ १॥ ॐ शम्भुतेजोज्ज्वलज्ज्वालामालिनि पावके ह्रीं रक्तदन्तिकायै तर्जनीभ्यां नमः॥ २॥ ॐ शम्भुतेजोज्ज्वलज्ज्वालामालिनि पावके ह्रूं शाकम्भर्यै मध्यमाभ्यां नमः॥ ३॥ ॐ शम्भुतेजोज्ज्वलज्ज्वालामालिनि पावके ह्रैं दुर्गायै अनामिकाभ्यां नमः॥ ४॥ ॐ शम्भुतेजोज्ज्वलज्ज्वालामालिनि पावके ह्रौं भीमायै कनिष्ठिकाभ्यां नमः॥ ५॥ ॐ शम्भुतेजोज्ज्वलज्ज्वालामालिनि पावके ह्रः भ्रामर्यै करतलकरपृष्ठाभ्यां नमः॥ ६॥

अथ हृदयादिन्यासः—ॐ शम्भुतेजोज्ज्वलज्ज्वालामालिनि पावके ह्रां नन्दायै हृदयाय नमः॥ १॥ ॐ शम्भुतेजोज्ज्वलज्ज्वालामालिनि पावके ह्रीं रक्तदन्तिकायै शिरसे स्वाहा॥ २॥ ॐ शम्भुतेजोज्ज्वलज्ज्वालामालिनि पावके शाकम्भर्यै शिखायै वषट्॥ ३॥ ॐ शम्भुतेजोज्ज्वलज्ज्वालामालिनि पावके ह्रैं दुर्गायै कवचाय हुम्॥ ४॥ ॐ शम्भुतेजोज्ज्वलज्ज्वालामालिनि पावके ह्रौं भीमायै नेत्रत्रयाय वौषट्॥ ५॥ ॐ शम्भुतेजोज्ज्वलज्ज्वालामालिनि पावके ह्रः भ्रामर्यै अस्त्राय फट्॥ ६॥

अथाङ्गन्यासः—ॐ वाराह्यै नमः पादयोः॥ १॥ ॐ नारसिंह्यै नमः नितम्बे॥ २॥ ॐ चामुण्डायै नमः नाभौ॥ ३॥ ॐ माहेन्द्र्यै नमः कण्ठे॥ ४॥ ॐ ब्राह्म्यै नमः पृष्ठे॥ ५॥ ॐ वैष्णव्यै नमः दक्षिणभुजे॥ ६॥ ॐ माहेश्वर्यै नमः वामभुजे॥ ७॥ ॐ कौमार्यै नमः स्कन्धयोः॥ ८॥ ॐ कात्यायन्यै नमः मुखे॥ ९॥ ॐ शिवदूत्यै नमः शिरसि॥ १०॥ ॐ शिवायै नमः हृदि॥ ११॥ ॐ काल्यै नमः दक्षकुक्षौ॥ १२॥ ॐ रक्तदन्तिकायै नमः वामकुक्षौ॥ १३॥ ॐ शताक्ष्यै नमः पृष्ठवंशे॥ १४॥ ॐ शाकम्भर्यै नमः भ्रुवोः॥ १५॥ इत्यङ्गन्यासः।

अथ खड्गिन्यादिन्यासः—

ॐ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा। शङ्खिनी चापिनी बाण भुशुण्डी परिघायुधेति शिरसि॥ १॥
शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके। घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन चेति मुखे॥ २॥
ॐ प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे। भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरीति कण्ठे॥ ३॥
ॐ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते। यानि चात्यर्थघोराणि तैरक्षास्मांस्तथा भुवमिति बाह्वोः॥ ४॥

ॐ खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके। करपल्लवसङ्गीनि तैरस्मान्रक्ष सर्वतः इति हृदये॥ ५॥
ॐ सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते। भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते इत्युदरे॥ ६॥
ॐ एतत्ते वदनं सौम्यं लोचनत्रयभूषितम्। पातु नः सर्वभूतेभ्यः कात्यायनि नमोऽस्तु ते इति नाभौ॥ ७॥
ॐ ज्वालाकरालमत्युग्रमशेषासुरसूदनम्। त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते इत्यूर्वोः॥ ८॥
ॐ हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत्। सा घण्टा पातु नो देवि पापेभ्यो नः सुतानिवेति जानुनोः॥ ९॥
ॐ असुरासृग्वसापङ्कचर्चितस्ते करोज्ज्वलः। शुभाय खड्गो भवतु चण्डिके त्वां नता वयमिति पादयोः॥ १०॥

एवं न्यस्तशरीरः साधकः सच्चिदानन्दरूपिणीं महालक्ष्मीं ध्यायेत्।

अथ ध्यानम्—

अक्षस्रक्परशुं गदेषुकुलिशं पद्मं धनुष्कुण्डिकां दण्डं शक्तिमसिं च चर्म जलजं घण्टां सुराभाजनम्।
शूलं पाशसुदर्शने चदधतीं हस्तैः प्रवालप्रभां सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम्॥

इति ध्यात्वा मानसोपचारैः सम्पूज्य कृताञ्जलिः सन् गुरुदेवात्मैक्यं विभाव्य स्तवस्यार्थानुसन्धानपूर्वकं नातिशीघ्रं नातिमन्दं मध्यमस्वरेण स्पष्टपदाक्षरं चण्डीस्तवं पठेत्। ततः स्तवपाठोत्तरम्—ॐ ह्रीं हृदयाय नमः॥ १॥ ॐ चं शिरसे स्वाहा॥ २॥ ॐ डिं शिखायै वषट्॥ ३॥ ॐ कां कवचाय हुं॥ ४॥ ॐ यैं नेत्रत्रयाय वौषट्॥ ५॥ ॐ ह्रीं चण्डिकायै अस्त्राय फट्॥ ६॥ इति षडङ्गन्यासं कृत्वा नवार्णमन्त्रमष्टोत्तरशतं जप्त्वा अहंरुद्रेभिरिति वैदिकं देवीसूक्तं च नमो देव्यै महादेव्यै इति देवीसूक्तं च पठित्वा रहस्यत्रयं पठेत्। तत्र प्राधानिकं रहस्यं सार्द्धत्रिंशच्छ्लोकात्मकम्। वैकृतिरहस्यमेकोनचत्वारिंशच्छ्लोकात्मकम्। मूर्तिरहस्यं पञ्चविंशतिश्लोकात्मकं गुरुचरणैः संशोधितं ग्राह्यमिति। ततः पूर्वोक्तं षडङ्गन्यासं कृत्वा ध्यात्वा भगवतीं प्रार्थयेत्—

अपराधशतं कृत्वा जगदम्बेति चोच्चरेत्। यां गतिं समवाप्नोति न तां ब्रह्मादयः सुराः॥
सापराधोऽस्मि शरणं प्राप्तस्त्वां जगदम्बिके। इदानीमनुकम्प्योऽहं यथेच्छसि तथा कुरु॥
अज्ञानाद्विस्मृतेर्भ्रान्त्या यन्न्यूनमधिकं कृतम्। तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि॥
कामेश्वरि जगन्मातः सच्चिदानन्दविग्रहे। गृहाणार्चामिमां प्रीत्या प्रसीद परमेश्वरि॥
गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम्। सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि॥

इति मन्त्रेण देव्या दक्षिणकरे जपं समर्प्य यथासुखं विहरेत्।

मन्त्रमहोदधौ—

मार्कण्डेयपुराणोक्तं नित्यं चण्डीस्तवं पठन्। पुटितं मूलमन्त्रेण जपन्नाप्नोति वाञ्छितम्॥
आश्विनस्य सिते पक्षे आरभ्याग्नितिथिं सुधीः। अष्टम्यन्तं जपेल्लक्षं दशांशं होममाचरेत्॥
प्रत्यहं पूजयेद्देवीं पठेत्सप्तशतीमपि। विप्रानाराध्य मन्त्रा स्वमिष्टार्थं लभतेऽचिरात्॥
एवं यः कुरुते स्तोत्रं नावसीदति जातुचित्। चण्डिकां प्रभजन्मर्त्यो धनैर्धान्यैर्यशश्चयैः॥
पुत्रैः पौत्रैर्धनारोग्यैर्युक्तो जीवेद्बहूः समाः॥

इति संक्षेपतो नवरात्रदुर्गाविधानं समाप्तम्।

पाठारम्भ की विधि—सर्वप्रथम 'एषां श्रीचण्डीसप्तशत्याः प्रथममध्यमोत्तमचरित्राणां ब्रह्मविष्णुरुद्रा ऋषयः गायत्री उष्णिक् अनुष्टुभ् छन्दांसि, महाकाली, महालक्ष्मी, महासरस्वत्यो देवताः। ऐं ह्रीं क्लीं, बीजानि। अग्निवायुः

सूर्यस्तत्वानि। धर्मार्थकामसिद्ध्यर्थं सप्तशतीपाठे विनियोगः' कहकर विनियोग का जल छोड़े। तदनन्तर मूल में लिखित 'ॐ ब्रह्मविष्णुरुद्रऋषिभ्यो नमः शिरसि' इत्यादि पाँच मन्त्रों से उनमें निर्दिष्ट अङ्गों में ऋष्यादिन्यास करे। फिर मूल में लिखित 'ॐ ह्रीं हृदयाय नमः' इत्यादि छः मन्त्रों से उनमें निर्दिष्ट अङ्गों में हृदयादि न्यास करे। फिर आगे मूल में लिखित 'ॐ शम्भुतेजोज्वल०' इत्यादि छः मन्त्रों से क्रमशः अङ्गुष्ठों, तर्जनियों, मध्यमाओं, अनामिकाओं, कनिष्ठिकाओं तथा करतलपृष्ठों में चक्रन्यास करना चाहिये। यह चक्र से करन्यास होता है।

चक्र से हृदयादिन्यास—फिर 'ॐ शम्भुतेज०' इत्यादि मूलोक्त छः मन्त्रों से क्रमशः हृदय, शिर, शिखा, कवच, नेत्रत्रय तथा अस्त्राय फट् न्यास करना चाहिये। फिर 'ॐ वाराह्यै नमः' इत्यादि पन्द्रह मन्त्रों से उनमें उल्लिखित अङ्गों में न्यास करना चाहिये।

खड्गिन्यादि न्यास—फिर उसके आगे मूल में लिखित 'ॐ खड्गिनी शूलिनी घोरा' इत्यादि १० मन्त्रों के द्वारा निर्दिष्ट शरीर में निर्दिष्ट अङ्गों में न्यास करना चाहिये। इसके बाद 'अक्षस्त्रक्परशुं गदेषु कुलिशं पद्मं धनुष्कुण्डिकां दण्डं शक्तिमसिं च चर्म जलजं घण्टां' मन्त्र से देवी का ध्यान करे। फिर मानसोपचारों से पूजन करके हाथ जोड़कर गुरु में तथा देवता में एकता का विश्वास कर सप्तशतीस्तव के अर्थ को समझते हुए नातिशीघ्र तथा नातिमन्द स्वर को त्याग कर मध्यम स्वर में चण्डीपाठ करना चाहिये। फिर पाठ के उपरान्त 'ॐ ह्रीं हृदयाय नमः, ॐ चं शिरसे स्वाहा, ॐ डिं शिखायै वषट्, ॐ कां कवचाय हुम्, ॐ यैं नेत्रत्रयाय वौषट्, ॐ ह्रीं चण्डिकायै अस्त्राय फट्' इस प्रकार से षडङ्गन्यास करके फिर १०८ बार नवार्ण मन्त्र को जपकर 'अहं रुद्रेभि०' यह वैदिक देवीसूक्त, नमो देव्यै महादेव्यै यह पौराणिक देवीसूक्त पढ़कर फिर तीनों रहस्यों का भी पाठ करना चाहिये। उनमें प्राधानिक रहस्य साढ़े तीस श्लोकों वाला है। वैकृतिक रहस्य उनतालीस श्लोकों में है तथा मूर्तिरहस्य पच्चीस श्लोकों वाला है। फिर पूर्वोक्त षडङ्गन्यास करके भगवती से प्रार्थना करे।

प्रार्थना—मूल में 'अपराधशतं कृत्वा जगदम्बेति चोच्चरेत्' इत्यादि पाँच श्लोकों का उच्चारण कर प्रार्थना करे तथा देवी के दक्षिणहस्त में जप का अर्पण करे। मन्त्रमहोदधि में लिखा है—मार्कण्डेय पुराण में वर्णित चण्डीस्तव को नित्य मूलमन्त्र से सम्पुटित करके जप करने वाले को वाञ्छित फल मिलता है। आश्विन मास के शुक्ल पक्ष की प्रतिपदा से प्रारम्भ करके बुद्धिमान् व्यक्ति अष्टमी-पर्यन्त एक लक्ष मन्त्रजप करे एवं उसका दशांश होम करे। प्रतिदिन देवी की पूजा तथा सप्तशती का पाठ भी करे। ब्राह्मणों को पूजित करे तो जापक को अभीष्ट फल की शीघ्र प्राप्ति होती है। इस प्रकार से जो स्तोत्रपाठ करता है, वह कभी खिन्न नहीं होता है। चण्डिका का भजन करने वाला मनुष्य धन-धान्य, यश, ऐश्वर्य, पुत्र तथा पौत्रों के साथ अनेक वर्षों तक सुखपूर्वक जीवन-यापन करता है।

कुमारीपूजनम्

तच्च प्रत्यहं यथाशक्ति एकद्व्यादिक्रमेण कार्यम्। तत्र प्रयोगः—मण्डपाभ्यन्तरे कुङ्कुमादिभिरष्टदलं विरच्य तदुपरि स्थापितपीठे कन्यामुपवेश्य स्वयं तत्सम्मुखः स्वासने उपविश्य आचम्य देशकालौ सङ्कीर्त्य 'भगवतीदुर्गाप्रसन्नतार्थं कुमारीपूजां करिष्ये' इति कुमारीणां पादौ प्रक्षाल्य तैलाभ्यङ्गवस्त्रगन्धपुष्पस्त्रग्भिः सम्पूज्य खण्डलड्डुगुडसर्पिर्दधि-क्षीरनारिकेलखण्डादियाचितं भोजनं पानीयं च दत्त्वा तासु तृप्तासु स्वयमाचमनं ताभ्यो दद्यात्। ततः आचम्य क्षन्तव्यमिति प्रार्थ्य कन्यादत्ताक्षतान्स्वशिरसि धृत्वा दक्षिणादानपूर्वकं विसृजेत् इति सङ्क्षेपतः कुमारीपूजा।

कुमारियों का पूजन—प्रतिदिन एक कन्या का पूजन करे अथवा शक्ति के अनुसार प्रथम दिन एक, द्वितीय दिन दो तथा तृतीय दिन तीन—इस प्रकार वृद्धिक्रम से भी पूजन कर सकते हैं।

उसके लिये मण्डप (पूजामण्डप) के भीतर कुङ्कुमादि के द्वारा अष्टदल कमल बनाकर उसके ऊपर स्थापित पीठ पर कन्या को बैठाये। स्वयं यजमान उसके सम्मुख आसन पर बैठे। आचमन कर देश-काल का उच्चारण कर 'भगवतीदुर्गाप्रीत्यर्थं कुमारीपूजां करिष्ये' ऐसा सङ्कल्प करके उसके पैरों को धोकर उनमें तैलाभ्यङ्ग एवं गन्धादि लगाये। फिर उसे खण्ड (बूरा-पेड़ा-मिश्री), लड्डू, घी, दही, दूध, नारियल की ताजी गिरी बूरा मिलाकर तथा उसके द्वारा चाहा गया भोजन पानीय आदि दे। उसके तृप्त हो जाने पर फिर साधक उन्हें अपने हाथों से आचमन दे। फिर उससे प्रार्थना कर उसके हाथ से दिये गये अक्षतों को अपने शिर पर धारण कर दक्षिणा देकर उसको विदा कर दे (घर भेज दे)।

अथ प्रत्येककुमार्यादिपूजनप्रकारः—

ॐ मन्त्राक्षरमयीं लक्ष्मीं मातृकारूपधारिणीम्। नवदुर्गात्मिकां साक्षात्कन्यामावहयाम्यहम्॥

इत्यावाह्य आसनं पाद्यं चोष्णोदकेन पादौ प्रक्षाल्यार्घ्याचमनीयस्नानवस्त्रकञ्चुकालङ्कारादियथाशक्ति दत्त्वा सुगन्धतैलेनानुलिप्य हरिद्राकुङ्कुमसिन्दूरालक्तकाञ्जनपुष्पमालाधूपदीपादिभिरभ्यर्च्य पायसलड्डुगुडदधिक्षीरादिभिर्भोजयेत्। भोजनकाले नवार्णं सप्तशतीं वा पठेत्। ततो भोजनान्ते पानीयनानाफलताम्बूलदक्षिणानीराजनपुष्पाञ्जलीन्निवेदयेत्। एवमन्यापि पूजयेत्। आवाहने मन्त्रभेदाः—

जगत्पूज्ये जगद्वन्द्ये सर्वशक्तिस्वरूपिणि। पूजां गृहाण कौमारि जगन्मातर्नमोऽस्तु ते॥

इति प्रथमां द्विवर्षां पूजयेत्।

त्रिपुरां त्रिगुणाधारां त्रिवर्गज्ञानरूपिणीम्। त्रैलोक्यवन्दितां देवीं त्रिमूर्तिं पूजयाम्यहम्॥

इति त्रिवर्षाम्।

कलात्मिकां कलातीतां कारुण्यहृदयां शिवाम्। कल्याणजननीं नित्यं कल्याणीं पूजयाम्यहम्॥

इति चतुर्वर्षाम्।

अणिमादिगुणाधारामकाराद्यक्षरात्मिकाम्। अनन्तभेदां तां तारां रोहिणीं पूजयाम्यहम्॥

इति पञ्चवर्षाम्।

कामचारीं शुभां कान्तां कालचक्रस्वरूपिणीम्। कामदां करुणोदारां कालीं सम्पूजयाम्यहम्॥

इति षड्वर्षाम्।

चण्डवीर्यां चण्डमयीं चण्डमुण्डप्रभञ्जनीम्। ब्रह्मेशविष्णुनमितां चण्डिकां पूजयाम्यहम्॥

इति सप्तवर्षाम्।

सुखानन्दकरीं शान्तां सर्वदेवनमस्कृताम्। सर्वभूतात्मिकां देवीं शाम्भवीं पूजयाम्यहम्॥

इत्यष्टवर्षाम्।

दुर्गमे दुस्तरे युद्धे भयदुःखविनाशिनीम्। पूजयामि सदा भक्त्या दुर्गां दुर्गतिनाशिनीम्॥

इति नववर्षाम्।

सुन्दरीं स्वर्णवर्णाभां सुखसौभाग्यदायिनीम्। सुभद्रजननीं देवीं सुभद्रां पूजयाम्यहम्॥

इति दशवर्षां नवमीं पूजयेत्। (यथोक्तवर्षालाभे द्विवर्षाद्यामपि पूजयेत्)।

एतैर्मन्त्रैर्द्विवर्षकन्यामारभ्य दशवर्षावधिकुमारीं क्रमेण स्वस्वमन्त्रेण सम्पूज्य नमस्कारं कुर्यात्। एवं कन्यादक्षिणभागे वटुमेकं वामे चैकं तथैकं पुरतः एवं वटुत्रयमपि पूजयेत्।

कन्यापूजामाहात्म्यं देवीपुराणे—

न तथा तुष्यते शक्र होमदानजपेन तु। कुमारीभोजनेनात्र यथा देवी प्रसीदति॥
पितरो वसवो रुद्रा आदित्या गणलोकपाः। सर्वे ते पूजितास्तेन कुमारी येन पूजिता॥

इति कुमारीपूजाविधानम्।

कुमारीपूजन की विशेष विधि—'ॐ मन्त्राक्षरमयीं लक्ष्मीं मातृकारूपधारिणीम्। नवदुर्गात्मिकां साक्षात् कन्यामावाहयाम्यहम्' इस मन्त्र से आवाहन करके कन्या को आसन, पाद्य, उष्णोदक से पादप्रक्षालन, अर्घ्य-आचमनीय, स्नान, वस्त्र, कञ्चुक तथा अलङ्कारादि यथाशक्ति देकर इत्र लगाकर हरिद्रा, कुङ्कुम, सिन्दूर, अलक्तक (महावर), अञ्जन, पुष्पमाला, धूप, दीप आदि से पूजा करके फिर खीर, लड्डू, गुड़, दही, दूध आदि का भोजन प्रदान करे। जब कन्या या कन्यायें भोजन करें तो उस समय साधक नवार्ण मन्त्र का जप करे अथवा सप्तशती का पाठ करता रहे। भोजनोपरान्त कन्याओं को पानीय, फल, ताम्बूल, दक्षिणा, नीराजन, पुष्पाञ्जलि आदि निवेदित करे। इसी प्रकार अन्य कन्याओं का भी पूजन करे।

आवाहन में मन्त्रभेद—(१) प्रथम दिन—'जगत्पूज्ये जगद्वन्द्ये सर्वशक्तिस्वरूपिणि। पूजां गृहाण कौमारि जगन्मातर्नमोस्तु ते' इस मन्त्र से आवाहन कर प्रथम दिन दो वर्ष की कन्या का पूजन करना चाहिये। यह 'कुमारी' नाम से कही गई है।

(२) द्वितीय दिवस—नवरात्र के द्वितीय दिवस में—'त्रिपुरां त्रिगुणाधारां त्रिवर्गज्ञानरूपिणीम्। त्रैलोक्यवन्दितां देवीं त्रिमूर्तिं पूजयाम्यहम्' इस मन्त्र से आवाहन कर तीन वर्ष की कन्या का पूजन करना चाहिये। इसका नाम 'त्रिमूर्ति' कहा गया है।

(३) तृतीय दिवस—तृतीया तिथि में चार वर्ष की कन्या का आवाहन—'कलात्मिकां कलातीतां कारुण्यहृदयां शिवाम्। कल्याणजननीं नित्यं कल्याणीं पूजयाम्यहम्' इस मन्त्र से करके उसका पूजन करे। इसे 'कल्याणी' कहा गया है।

(४) चतुर्थ दिवस—नवरात्र के चौथे दिन पाँच वर्ष की कन्या को—'अणिमादिगुणाधारां अकाराद्यक्षरात्मिकाम्। अनन्तभेदां तां तारां रोहिणीं पूजयाम्यहम्' इस मन्त्र से आवाहित कर पूजन करे। इसको 'रोहिणी' कहा गया है।

(५) पञ्चम दिवस—पाँचवें दिन छः वर्ष की कन्या का आवाहन—'कामचारीं शुभां कान्तां कालचक्रस्वरूपिणीम्। कामदां करुणोदारां कालीं सम्पूजयामाम्यहम्॥' इस मन्त्र से करना चाहिये तथा पूजन करे। यह 'काली' कहलाती है।

(६) षष्ठ दिवस—छठे दिन सात वर्ष की कन्या का 'चण्डवीर्यां चण्डमयीं चण्डमुण्डप्रभञ्जनीम्। ब्रह्मेश-विष्णुनमितां चण्डिकां पूजयाम्यहम्' इस मन्त्र से आवाहन-पूजन करना चाहिये। यह 'चण्डिका' कही जाती है।

(७) सातवें दिन—आठ वर्ष की कन्या का पूजन सातवें दिन 'सुखानन्दकरीं शान्तां सर्वदेवनमस्कृताम्। सर्वभूतात्मिकां देवीं शाम्भवीं पूजयाम्यहम्' इस मन्त्र से आवाहन कर करना चाहिये। इसको 'शाम्भवी' कहते हैं।

(८) आठवें दिन—आठवीं तिथि में नव वर्ष की कन्या को 'दुर्गमे दुस्तरे युद्धे भयदुःखविनाशिनीम्। पूजयामि सदा भक्त्या दुर्गां दुर्गतिनाशिनीम्' इस मन्त्र से आवाहित कर पूजना चाहिये।

(९) नवें दिन—नवमी तिथि में दश वर्ष की कन्या का आवाहन-पूजन 'सुन्दरीं स्वर्णवर्णाभां सुखसौभाग्य-दायिनीम्। सुभद्रजननीं देवीं सुभद्रां पूजयाम्यहम्' इस मन्त्र से करना चाहिये। इसे 'सुभद्रा' कहा जाता है।

इस प्रकार के आयुवर्ग की कन्यायें न मिलने पर कन्यापूजन-हेतु दो वर्ष से दश वर्ष तक की कुमारी का चयन करना चाहिये। इस प्रकार प्रत्येक दिन के लिये वर्णित मंत्र से कुमारियों का पूजन कर उन्हें प्रणाम करने के

साथ ही प्रत्येक कन्या के वाम भाग में एक वटुक, दक्षिण भाग में दूसरा वटुक तथा कुमारी के आगे तीसरा बटुक (दो वर्ष से दस वर्ष तक का बालक) बैठाकर उसका भी पूजन करना चाहिये।

देवीपुराण के अनुसार कन्यापूजन का माहात्म्य—हे इन्द्र! जितनी प्रसन्नता देवी को कुमारी-पूजन से होती है, उतनी प्रसन्नता उन्हें होम-दान तथा जप से नहीं होती है। जिसके द्वारा कुमारी का पूजन होता है, उससे सभी देवता तथा पितर प्रसन्न हो जाते हैं।

कामनापरत्वेन चण्डीपाठसङ्ख्या

वाराहीतन्त्रे—

शिव उवाच—

चण्डीपाठफलं देवि शृणुध्व गदतो मम। एकावृत्त्यादिपाठानां यथावत्कथयामि ते॥
उपसर्गोपशान्त्यर्थं त्रिरावृत्तिं पठेन्नरः। ग्रहोपशान्तौ कर्तव्या पञ्चावृत्तिर्वरानने॥
महाभये समुत्पन्ने सप्तावृत्तिमुदीरयेत्। नवावृत्तौ भवेच्छान्तिर्वाजपेयफलं लभेत्॥
राजवश्याय भूत्यै च रुद्रावृत्तिमुदीरयेत्। अर्कावृत्त्या कामसिद्धिर्वैरिहानिश्च जायते॥
मन्वावृत्त्या रिपुर्वश्यस्तथा स्त्री वशतामियात्। सौख्यं पञ्चदशावृत्त्या श्रियमाप्नोति मानवः॥
कल्पावृत्त्या पुत्रपौत्रधनधान्यागमं विदुः। राजभीतिविनाशाय विपक्षोच्चाटनाय च॥
कुर्यात्सप्तदशावृत्तीस्तथाष्टादशकं प्रिये। महाऋणविमोक्षाय विंशावृत्तिं पठेन्नरः॥
पञ्चविंशावर्तनाद्धि भवेद्बन्धविमोक्षणम्। सङ्कटे समनुप्राप्ते दुश्चिकित्स्यागमे सदा॥
जातिध्वंसे कुलोच्छेदे आयुषो नाशमागते। वैरिवृद्धौ व्याधिवृद्धौ धननाशे तथा क्षये॥
तथैव त्रिविधोत्पाते तथा चैवातिपातके। कुर्याद्यत्नाच्छतावृत्तिं ततः सम्पद्यते शुभम्॥
विपदस्तस्य नश्यन्ति अन्ते याति परां गतिम्। जयवृद्धौ शतावृत्त्या राज्यवृद्धौ सदा पठेत्॥
मनसा चिन्तितं देवि सिद्धिरष्टोत्तराच्छतात्। शताश्वमेधयज्ञानां फलमाप्नोति सुव्रते॥
सहस्रावर्तनाल्लक्ष्मीरावृणोति स्वयं स्थिरा। भुक्त्वा कामान्यथाकामं नरो मोक्षमवाप्नुयात्॥
यथाश्वमेधः क्रतुषु देवानां च यथा हरिः। स्तवानामपि सर्वेषां तथा सप्तशतीस्तवः॥
नानःपरतरं स्तोत्रं किञ्चिदस्ति वरानने। भुक्तिमुक्तिप्रदं पुण्यं पावनानां च पावनम्॥

कामनाभेद से चण्डीपाठ की सङ्ख्या (वाराही तन्त्र में)—श्री शिवजी बोले—हे देवि! मुझसे देवीपाठ (चण्डीपाठ) का फल सुनो; अब मैं एकावृत्ति आदि पाठों के भेद कहता हूँ। उपसर्ग की शान्ति के लिये मनुष्य को चण्डीपाठ की तीन आवृत्तियाँ पढ़नी चाहिये। हे वरानने! ग्रहों की शान्ति के लिये पाँच आवृत्तियाँ करनी चाहिये। जब महाभय उत्पन्न हो तो उस समय सात आवृत्तियाँ पढ़नी चाहिये। यदि नौ आवृत्ति का पाठ हो तो वाजपेय का फल प्राप्त होता है। राजा को वश में करने तथा ऐश्वर्य की प्राप्ति के लिये एकादश आवृत्तियाँ तथा बारह आवृत्ति के पाठ से कामना की पूर्ति तथा वैरियों का नाश हो जाता है। चौदह आवृत्ति पाठ से शत्रु तथा स्त्री वश में हो जाते हैं। पन्द्रह आवृत्ति से सौख्य तथा लक्ष्मी की प्राप्ति साधक को हो जाती है। सोलह आवृत्तियों से पुत्र-पौत्र, धन-धान्य का आगम जानना चाहिये। राजभय के विनाश के लिये सत्रह आवृत्ति तथा विपक्ष के उच्चाटन के लिये अट्ठारह आवृत्ति पाठ करना चाहिये। हे प्रिये! महाऋण से विमोक्ष के लिये मनुष्य को बीस आवृत्तियाँ पढ़नी चाहिये। पच्चीस आवृत्तियों से बन्धमोक्ष हो जाता है। जब घोर सङ्कट उपस्थित हो, जिसका उपाय अति कठिन हो;

स्वजाति का ध्वंस हो रहा हो, आयु का नाश हो रहा हो (मारकेश लगा हो), शत्रुओं की वृद्धि हो, रोग की वृद्धि हो, धननाश हो, अचल सम्पत्ति का क्षय उपस्थित हो, जब त्रिविध उत्पात (दिव्य, अन्तरिक्ष, भौम) उत्पन्न हों अथवा घोर पातक लग गया हो तो यत्नपूर्वक एक सौ आवृत्ति चण्डीपाठ करने से शुभ हो जाता है। उसकी विपत्तियाँ नष्ट हो जाती हैं तथा उसे परमगति प्राप्त होती है। जय की वृद्धि के लिये तथा राज्यवृद्धि के लिये सदैव शतावृत्ति पाठ करना चाहिये। हे देवि! एक सौ आठ आवृत्तियों के पाठ से मनोवाञ्छित फल की प्राप्ति होती है तथा उसे एक सौ अश्वमेध यज्ञों का फल प्राप्त होता है। एक सहस्र पाठ से लक्ष्मी आकर साधक का स्वयं वरण करती है तथा स्थिर हो जाती है एवं मनुष्य भोगों को भोगकर अन्त में मोक्ष को प्राप्त हो जाता है। जिस प्रकार यज्ञों में अश्वमेध यज्ञ है तथा देवों श्री विष्णु भगवान् हैं, स्तोत्रों में उसी प्रकार से श्रीदुर्गासप्तशतीस्तव है। हे वरानने! इससे बढ़कर अन्य कोई दूसरा स्तोत्र नहीं है, जैसा कि सप्तशतीस्तोत्र है।

हरगौरीतन्त्रे—

श्रीकामः पुत्रकामो वा सृष्टिमार्गक्रमेण तु। सावर्णिः सूर्यतनयः सावर्णिर्भविता मनुः॥
जपेच्छक्रादिमारभ्य शुम्भदैत्यवधावपि। आद्यमारभ्य प्रजपेत्पश्चाच्छेषं समापयेत्॥
शान्त्यादिकामः सर्वत्र स्थितिमार्गक्रमेण तु। स्थितिपाठः सर्वकामे मुक्तिकामे च संहृतिः॥
संहारे चान्त्यमारभ्य पश्चादादि समापयेत्।

हरगौरी तन्त्र के अनुसार सप्तशती का महत्त्व—लक्ष्मी की कामना वाला तथा पुत्र की इच्छा वाला साधक सृष्टिमार्गक्रम से 'सावर्णिः सूर्यतनयो' से लेकर 'सावर्णिर्भविता मनुः' पर्यन्त; फिर 'शक्रादयः सुरगणाः (चतुर्थाध्याय) से आरम्भ कर 'शुम्भदैत्यवधश्च' पर्यन्त (दशमाध्यायान्त) पाठ करे। फिर शेष पाठ को समाप्त करे। शान्ति आदि की इच्छा से स्थितिमार्गक्रम से पाठ करना चाहिये। स्थितिपाठ सभी कामनाओं के लिये तथा मुक्ति की कामना के लिये संहृति (संहार) पाठ करना चाहिये। संहार पाठ (संहृतिपाठ) में अन्त्य से आरम्भ कर अन्त में समाप्त करना चाहिये।

विमर्श—यहाँ कामनाभेद से तीन प्रकार का पाठ कहा गया है; उसका स्पष्टीकरण आवश्यक होने से यहाँ दिया जा रहा है—

(१) सृष्टिमार्ग से पाठ—इसमें प्रथम अध्याय के प्रथम श्लोक से प्रारम्भ कर तेरहवें अध्याय के अन्तिम श्लोक तक क्रम से पाठ करते हैं। यह पुत्र एवं लक्ष्मी की कामना से करना चाहिये।

(२) स्थितिमार्ग या स्थितिक्रम पाठ—इसमें पहिले पञ्चमाध्याय (पुरा शुम्भनिशुम्भाभ्यामसुराभ्यां शचीपते) से प्रारम्भ करके और तेरहवें अध्याय के अन्तिम श्लोक तक कुल नौ अध्यायों का पाठ करने के उपरान्त प्रथमाध्याय से चतुर्थाध्याय (शक्रादि स्तुति अध्याय) तक पाठ करना चाहिये। यह शान्तिकामी के लिये होता है।

(३) संहृतिमार्ग (संहारक्रम)—इसमें सर्वप्रथम त्रयोदशाध्याय के अन्तिम श्लोक 'एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः। सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः॥' से आरम्भ कर संहारक्रम (विलोमक्रम से) प्रथमाध्याय के 'सावर्णिः सूर्यतनयो०' श्लोक (प्रथम श्लोक) तक पढ़े। यह संहारक्रम है, जिसे मुक्तिकामी को अपनाना चाहिये। 'दुर्गोपासनाकल्पद्रुम' ग्रन्थ के सङ्कलनकर्त्ता श्रीहरिकृष्ण शर्मा ने हरगौरी तन्त्र से उद्धृत इन श्लोकों की संस्कृत टीका में यह बात लिखी है।

आवृत्तिभेदेन दक्षिणापि तत्रैव—

पञ्चस्वर्णाः शतावृत्तौ पक्षावृत्तौ तु तत्त्रयम्। पञ्चावृत्तौ स्वर्णमेकं त्रिरावृत्तौ तदर्धकम्॥
एकावृत्तौ पादमेकं दद्याद्वा शक्तितो बुधः॥

आवृत्ति के भेद से दक्षिणा—एक सौ आवृत्ति पाठ पर पाँच स्वर्ण दक्षिणा देनी चाहिये। पन्द्रह आवृत्तियों पर तीन स्वर्ण तथा पाँच आवृत्ति पर एक स्वर्ण, तीन आवृत्ति पर आधा स्वर्ण तथा एक आवृत्ति पर चतुर्थांश स्वर्ण दक्षिणा देनी चाहिये। अथवा समझदार यजमान को अपनी शक्ति के अनुसार दक्षिणा देनी चाहिये।

अथ सम्पुटितहोमे मन्त्रसङ्ख्या—

मन्त्रपुटं बीजपुटं दुर्गास्तोत्रं पठेत्सदा। मन्त्रबीजपुटा दुर्गा कामनासिद्धिदा सदा॥
होमकाले सदा मन्त्रं दुर्गामन्त्रं पृथक् हुनेत्। कामनाबीजसंयोगो दुर्गामन्त्रेण संहुनेत्॥
दुर्गास्तवनमन्त्राणां सङ्ख्या सप्तशतं भवेत्। कामनामन्त्रसङ्ख्या च शतं चैव चतुर्दश॥
मध्ये मन्त्रान् सप्तशतं होमकाले तु योजयेत्। पाठे मन्त्रपुटं वाच्यं होममन्त्राः पृथक्पृथक्॥
होमसङ्ख्या च मन्त्राणां शतं वै चैकविंशतिः। पाठे बीजपुटं वाच्यं होमे बीजपुटं हुनेत्॥

सम्पुटित होम में मन्त्रसङ्ख्या—सप्तशती पाठ को मन्त्रपुट (लौकिक या वैदिक मन्त्र) तथा बीजपुट (ऐं ह्रीं क्लीं इत्यादि) से पुटित करके करना चाहिये। मन्त्र एवं बीज से पुटित दुर्गासप्तशती सदैव कामनाओं को सफल करती है। होम के समय सदैव बीज के संयोग से युक्त मन्त्र से ही होम करना चाहिये तथा सप्तशती के मन्त्रों से पृथक् होम करना चाहिये। इस प्रकार उनकी आहुतियों की सङ्ख्या ७००+७००= १४०० हो जाती है। यह सङ्ख्या कामनापूर्वक होम के लिये होती है। पाठमन्त्र तथा होममन्त्रों की सङ्ख्या पृथक्-पृथक् होती है।

अथ कवचाहुतिनिषेधः तन्त्रान्तरे—

चण्डीस्तवे प्रतिश्लोकमेकाहुतिरिहेष्यते। रक्षाकवचगैर्मन्त्रैर्होमं तत्र न कारयेत्॥
मौर्ख्यात्कवचगैर्मन्त्रैः प्रतिश्लोकं जुहोति यः। स्याद्देहपतनं तस्य नरकं प्रतिपद्यते॥
अन्धकाख्यो महादैत्यो दुर्गाहोमपरायणः। कवचाहुतिजात्पापान्महेशेन निपातितः॥

अत्र रक्षाकवचगैर्मन्त्रैरित्यनेन शूलेन पाहि नो देवीत्यादिचतुर्मन्त्रैर्होमं न कारयेदिति ज्ञातव्यम्। केचित्कवचादित्रयस्य रहस्यत्रयस्य चापि होमं वर्जयन्ति।

कवचाहुति का निषेध (तन्त्रान्तर से)—चण्डीस्तव में प्रत्येक श्लोक से एक-एक आहुति होम करना चाहिये; परन्तु रक्षाकवच के 'शूलेन पाहि नो देवी०' इत्यादि चार मन्त्रों से होम नहीं करना चाहिये। जो मूर्खतापूर्वक कवच के प्रत्येक मन्त्र से हवन करता है, वह मरने के पश्चात् अवश्य ही नरक को जाता है; क्योंकि अन्धक नामक दैत्य ने दुर्गाहोम करते समय कवच के मन्त्रों (श्लोकों) से आहुति दी थी। इसी कारण वह भगवान् शिव के हाथों मारा गया था। यहाँ कुछ का मत है कि कवच के साथ तीनों रहस्यों के श्लोकों से भी होम नहीं करना चाहिये।

अथ कामनाभेदेन दुर्गापाठे सम्पुटिमन्त्रप्रयोगः कात्यायनीतन्त्रे—

प्रतिश्लोकमाद्यन्तयोः प्रणवेन जपेन्मन्त्रसिद्धिः॥ १॥ प्रणवं व्याहृतित्रयं च श्लोकादौ पठित्वा जपेन्मन्त्रसिद्धिः॥ २॥ सप्रणवां सव्याहृतिकां गायत्रीमादावन्ते वा कृत्वा श्लोकं जपेत्तदा महाफलम्॥ ३॥ प्रतिश्लोकमादावन्ते 'जातवेदसे' इति ऋचं जपेत् सर्वकामसिद्धिः॥ ४॥ अपमृत्युवारणाय रोगारिक्षयमृत्यून्मूलनमभीप्सितो सर्वापद्विनिवारणाय च शताक्षरत्र्यम्बकमन्त्रेण सम्पुटीकृत्य श्लोकं पठेत्(गायत्री० जातवेदसे० त्र्यम्बकेतिमन्त्र त्रयमिलितः शताक्षरः)॥ ५॥ प्रतिश्लोकं 'शरणागतदीनार्त्त'—इति श्लोकं पठेत्सर्वकार्यसिद्धिः॥ ६॥ प्रतिश्लोकम् 'करोतु सा नः शुभ०', इत्यर्धं पठेत्सर्वकामाप्तिः॥ ७॥ स्वाभीष्टवरप्राप्त्यै 'एवं देव्या वरं लब्ध्वा' इति श्लोकं पठेत्॥ ८॥ सर्वापत्तिवारणाय प्रतिश्लोकम् 'दुर्गे स्मृता' इति पठेत्। अस्य केवलस्यापि श्लोकस्य कार्यानुसारेण लक्षमयुतं सहस्रं शतं वा जपः॥ ९॥ 'सर्वा बाधा'

अध्याय की समाप्ति पर पत्रों-पुष्पों से होम करना चाहिये। इस प्रकार प्रधानहोम करके फिर पूर्वोक्त जयादि पीठशक्तियों, यन्त्रावरण देवताओं, योगिनियों को भी घृत एवं पायस सहित एक-एक आहुति दे। फिर 'स्विष्टकृत्' से लेकर प्रायश्चित्त होम तक के सभी होम सम्पन्न करके इन्द्रादि लोकपालों, सूर्यादि ग्रहों तथा क्षेत्रपालादि के लिये माषभक्त (उबले उड़द) की बलि उनके मन्त्रों से दे। फिर हाथ-पैर धोकर आचमन करके समुद्रादूर्मि इत्यादि

मन्त्रों से अथवा नवार्ण मन्त्र से तथा 'नमो देव्यै महादेव्यै०' इत्यादि मन्त्रों से पूर्णाहुति करके प्रणीता विमोक-पर्यन्त कर्मों को समाप्त कर होम के अन्त में जल में चण्डिका की पूजा करके मूल मन्त्र के द्वारा होमसङ्ख्या का दशांश तर्पण दुग्धमिश्रित जल से 'ॐ चण्डिकादेवीं तर्पयामि' यह कहकर करना चाहिये। फिर मूल मन्त्र में ही तर्पणसङ्ख्या का दशांश 'आत्मानमभिषिञ्चामि' जोड़कर मार्जन यजमान अपने सिर पर करे।

फिर यजमान आचार्यादि को वस्त्रादि से पूजित करके उनको निष्क सुवर्ण अथवा गोमिथुन दक्षिणा के रूप में दे। आचार्य को द्विगुणित दक्षिणा देनी चाहिये। कपिलागाय, नीलमणि, श्वेताश्व, छत्र, चामर, शय्या, भूमि तथा सप्तधान्य भी यथासम्भव देना चाहिये। फिर आचार्यादि ब्राह्मण कलशोदक से सपत्नीक-सकुटुम्ब यजमान का 'सुरास्त्वामभिषिञ्चामि' इत्यादि वेदमन्त्रों एवं पौराणिक मन्त्रों से अभिषेक करे। फिर यजमान ग्रहों की उत्तरपूजा करके ग्रहाग्नि का विसर्जन कर देवी की पञ्चोपचारों से पूजा कर महाबलि प्रदान करे।

(तत्र क्षत्रियादिनाऽश्वमेषच्छागमहिषाणामन्यतरो देयः)। विप्रेण तु कूष्माण्डबिल्वफलमिक्षवश्च देयाः। तद्यथा— देवीं द्रोणपुष्पबिल्वपत्राम्रदलजातीचम्पकैः सम्पूज्य कर्ता उदङ्मुखः पूर्वमुखं देव्यभिमुखं वा बलिं गन्धादिनाभ्यर्च्य,

पशुस्त्वं बलिरूपेण मम भाग्यादुपस्थितः। प्रणमामि ततः सर्वरूपिणं बलिरूपिणम्॥
चण्डिकाप्रीतिदानेन दातुरापद्विनाशनम्। चामुण्डाबलिरूपाय बले तुभ्यं नमोऽस्तु मे॥
यज्ञार्थं बलयः सृष्टाः स्वयमेव स्वयम्भुवा। अतस्त्वां घातयाम्यद्य तस्माद्यज्ञे वधोऽवधः॥

इति बलिमभिमन्त्र्य 'ॐ ह्रीं श्रीं' इति मन्त्रपुष्पं क्षिप्त्वा 'रसना त्वं चण्डिकायाः सुरलोकप्रसाधकः, 'ॐ ह्रां ह्रीं खड्ग आं हुं फट्' इति खड्गमन्यद्वा शस्त्रं सम्पूज्य 'ॐ कालिकालि यज्ञेश्वरि लोहदण्डायै नमः' इति बलिं छेदयित्वा 'ॐ ऐं ह्रीं कौशिकि रुधिरेणाप्यायताम्' इति देव्यै निवेद्य ततो माषपिष्टमयं शत्रुं कृत्वा खड्गेन च्छेदयित्वा स्कन्दाय विशिखाय च दत्त्वा बलिशेषं रक्षोभ्यो हरेत्। मन्त्रस्तु 'ॐ ह्रीं स्फुरस्फुर कुम्भ २ सूनु २ गुलु २ धुनु २ मारय २ विद्रावय २ विदारय २ कम्पय २ कम्पातय २ पूरय २ ॐ ह्रीं ॐ हुं फट् हुं मर्दय २ हुम्।' ततः शेषबलिं बहिर्दद्यात्।

बलिं गृह्णन्त्विमं देवा आदित्या वसवस्तथा। मरुतश्चाश्विनौ रुद्राः सुपर्णाः पन्नगाः खगाः॥
असुरा यातुधानश्च पिशाचोरगराक्षसाः। डाकिन्यो यक्षवेताला योगिन्यः पूतनाः शिवाः॥
जृम्भकाः सिद्धगन्धर्वा नागा विद्याधरा नगाः। दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः॥
जगतां शान्तिकर्तारो ब्रह्माद्याश्च महर्षयः। मा विघ्नं मा च मे पापं मा सन्तु परिपन्थिनः॥
सौम्या भवन्तु तृप्ताश्च भूतप्रेताः सुखावहाः॥

इति मन्त्रान् पठेत्।

अयं बलिः शूद्रेण दुर्ब्राह्मणेन वा नेयः। ततः स्नात्वा तिलकं धृत्वा देवीं प्रार्थयेत्। तत्र मन्त्राः—'खड्गिनी शूलिनी घोरा०॥ १॥ शूलेन पाहि नो देवि०॥ ४॥ नमो देव्यै महादेव्यै०॥ ५॥ रूपं देहि यशो देहि भर्गं भगवति देहि मे। पुत्रान् देहि धनं देहि सर्वान्कामांश्च देहि मे॥ ६॥ महिषघ्नि महामाये चामुण्डे मुण्डमालिनि। आयुरारोग्यमैश्वर्यं देहि देवि नमोऽस्तु ते॥ ७॥ इति देवीं सम्प्रार्थ्य,

गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम्। सिद्धिर्भवतु मे देवि प्रसादात्तव सुन्दरि॥

इति देव्यै जपं निवेद्य देशकालौ सङ्कीर्त्य 'कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं कुमारीर्ब्राह्मणसुवासिनीर्भोजयिष्ये' इति सङ्कल्प्य पूजापूर्वकं ब्राह्मणशतं नानाभक्ष्यभोज्यैः सम्भोज्य तेभ्यो भूयसीं दक्षिणां दत्त्वा प्रदक्षिणां कृत्वा आशिषो गृह्णीयात्। ततो मूलमन्त्रेण पुष्पेण देवीमुद्वास्य तेनैव षडङ्गं कृत्वा 'उत्तिष्ठ ब्रह्मण०॥ १॥ उत्तिष्ठ देवि चण्डेशि शुभां पूजां प्रगृह्य च। कुरुष्व मम कल्याणमष्टाभिः शक्तिभिः सह॥ २॥' इति विसृज्य प्रतिमामाचार्याय दत्त्वा मन्त्रं पठेत्।

त्रैलोक्यमातर्देवि त्वं सर्वभूतदयान्विते। दानेनानेन सन्तुष्टः सुप्रीताः वरदा भव॥

ततः यस्य स्मृत्या०॥१॥ प्रमादात्कुर्वतां०॥२॥' इत्यादि पठित्वा कर्मेश्वरार्पणं कृत्वा सुहृद्युक्तो भुञ्जीत। एतद्दशगुणो विधिः सहस्रचण्ड्यां तद्दशगुणो विधिरयुतचण्ड्यां च ज्ञेयः। शेषं शतचण्डीवत्।

एवं कृते जगद्वश्यं सर्वे नश्यन्त्युपद्रवाः। राज्यं धनं यशः पुत्रानिष्टमन्यल्लभेत सः॥

इति पण्डितश्रीचतुर्थीलालगौडविरचितेऽनुष्ठानप्रकाशे शतचण्डीविधानप्रयोगः। श्रीचण्डिकार्पणमस्तु।

बलिदान—क्षत्रियादि को मेष, छाग, महिष आदि में किसी की बलि देनी चाहिये; परन्तु ब्राह्मण को कूष्माण्डफल (कुम्हड़ा—पेठा), बेलफल अथवा ईख की बलि देनी चाहिये। उसका विधान इस प्रकार है—देवी का द्रोणपुष्प (दोना के फूल), बिल्वपत्र, आम्रपत्र, जायफल, चम्पा आदि से पूजन करके यजमान उत्तर या पूर्व की ओर मुख करके बलि को गन्धादि से पूजित कर 'पशुस्त्वं बलिरूपेण मम भाग्यादुपस्थितः। प्रणमामि ततः सर्वरूपिणं बलिरूपिणम्॥१॥ चण्डिकाप्रीतिदानेन दातुरापद् विनाशनम्। चामुण्डाबलिरूपाय बले तुभ्यं नमोस्तु मे॥२॥ यज्ञार्थं बलयः सृष्टाः स्वयमेव स्वयंभुवा। अतस्त्वां घातयाम्यद्य तस्माद्यज्ञे वधोऽवधः॥३॥' इन श्लोकों को पढ़ते हुए बलि को अभिमन्त्रित कर उसपर 'ॐ ह्रीं श्रीं' कहकर पुष्प छोड़े। फिर 'रसनां त्वं चण्डिकायाः सुरलोकप्रसाधकः' तथा 'ॐ ह्रां ह्रीं खड्ग आं फट्' इन मन्त्रों से खड्ग (तलवार) या अन्य शस्त्र (गँड़ासा आदि) को पूजकर 'ॐ कलिकालि यज्ञेश्वरि लोहदण्डायै नमः' ऐसा कहकर बलि को काट दे। फिर 'ॐ ह्रीं कौशिकि रुधिरेणाप्यायताम्' कहकर बलि देवी को निवेदित करके उस बलि पदार्थ की शत्रु की मूर्ति बनाकर खड्ग से काटकर स्कन्द के लिये, विशाख के लिये देकर शेष बलि को राक्षसों को दे दे। उसका मन्त्र है—ॐ ह्रीं स्फुर-स्फुर, कुम्भ-कुम्भ, सूनु-सूनु, गुलु-गुलु, धुनु-धुनु, मारय-मारय, विद्रावय-विद्रावय, विदारय-विदारय, कम्पय-कम्पय, कम्पातय-कम्पातय, पूरय-पूरय, ॐ ह्रीं, ॐ हुं फट्, हुं मर्दय-मर्दय हुम्। शेष बलि देवीमूर्ति के बाहर (अलग) दे। उस बलिहेतु मूल में लिखित 'बलिं गृह्णन्त्विमं देवा आदित्या वसवस्तथा। मरुतश्चाश्विनौ रुद्राः सुपर्णाः पन्नगाः खगाः॥१॥ असुरा यातुधानाश्च पिशाचोरगराक्षसाः। डाकिन्यो यक्षवेताला योगिन्यः पूतनाः शिवाः॥२॥ जृम्भकाः सिद्धगन्धर्वाः नागा विद्याधराः खगाः। दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः॥३॥ जगतां शान्तिकर्त्तारो ब्रह्माद्याश्च महर्षयः। मा विघ्नं मा च मे पापं मा सन्तु परिपन्थिनः॥४॥ सौम्याः भवन्तु तृप्ताश्च भूतप्रेतसुखावहाः॥' इन मन्त्रों को पढ़े। यह बलि शूद्र या दुर्ब्राह्मण को उठाकर ले जानी चाहिये। फिर यजमान को स्नान करके तिलक लगाकर देवी की प्रार्थना मूलपाठ में लिखे 'खड्गिनी शूलिनी घोरा' इत्यादि सात मन्त्रों से करनी चाहिये। फिर 'गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत् कृतं जपम्। सिद्धिर्भवतु मे देवि त्वत् प्रसादात् महेश्वरि॥' कहकर देवी के दक्षिण कर में जप का निवेदन करनी चाहिये।

फिर देश-काल का उच्चारण कर 'कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं कुमारीर्ब्राह्मणसुवासिनीर्भोजयिष्ये' कहकर सङ्कल्प करे। फिर सम्मानपूर्वक कुमारियों, ब्राह्मणों तथा सुवासिनों को भोजन कराये। उन्हें भूयसी दक्षिणा देकर उनका आशीर्वाद ग्रहण करे। फिर मूल मन्त्र पढ़कर पुष्प के द्वारा देवी का उद्वासन करे। मूल मन्त्र से ही षडङ्ग करके 'उत्तिष्ठ देवि चण्डेशि शुभां पूजां प्रगृह्य च। कुरुष्व मम कल्याणमष्टाभिः शक्तिभिः सह॥' कहकर देवी का विसर्जन कर दे तथा उनकी प्रतिमा को आचार्य को दे दे। 'त्रैलोक्यमातर्देवि त्वं सर्वभूतदयान्विते। दानेनानेन सन्तुष्टा सुप्रीता वरदा भव। यस्य स्मृत्या च नामोक्त्या तथा प्रमादात् कुर्वतां कर्म' इन तीन मन्त्रों को पढ़कर कर्म को ईश्वरार्पण कर दे। फिर यजमान स्वयं अपने बन्धु-बान्धवों एवं इष्टमित्रों सहित भोजन करे।

इस विधि का दशगुना सहस्रचण्डी में तथा सहस्रचण्डी से दशगुना विधि अयुत चण्डी में करना चाहिये। शेष सब विधि शतचण्डी की भाँति ही सहस्रचण्डी तथा लक्षचण्डी में होती है। ऐसा करने से सभी उपद्रव नष्ट होते हैं और कर्त्ता राज्य, धन, यश, पुत्र तथा अभीष्ट को प्राप्त करता है।

देव्यथर्वशीर्षम्

ॐ सर्वे देवा वै देवीमुपतस्थुः कासि त्वं महादेवी सा ब्रवीदहं ब्रह्मस्वरूपिणी मत्तः प्रकृतिपुरुषात्मकं जगच्छून्यं चाशून्यं च अहमानन्दानानन्दौ अहं विज्ञानाविज्ञाने अहं ब्रह्माब्रह्मणी द्वे ब्रह्मणी वेदितव्ये॥ १-२॥ इति वाथर्वणश्रुतिः। अहं पञ्चभूतानि अहं पञ्चतन्मात्राणि अहमखिलं जगत् वेदोऽहमवेदोऽहं विद्याहमविद्याहम् अजाहमनजाहम् अधश्चोर्ध्वं च तिर्यञ्चाहम् अहꣳरुद्रेभिर्वसुभिश्चरामि अहमादित्ये ऋत विश्वेदेवैः महं मित्रावरुणावुभौ बिभर्मि अहमिन्द्राग्नी अहमश्विनावुभौ अहꣳसोमन्त्वष्टारं पूषणं भगं दधामि अहं विष्णुमुरुक्रमं ब्रह्माणमुतप्रजापतिं दधामि अहं दधामि द्रविण ꣳ हविष्मतेसुप्राव्ये यजमानाय सुव्रते अहꣳराज्ञीसङ्गमनीवसूनाचिकितुषीप्रथमायज्ञियानाम् अहꣳसुवे पितरमस्य मूर्द्धन्मम योनिरस्वात् समुद्रे य एवं वेद स दैवीꣳ सम्पदमाप्नोति ते देवा अब्रुवन्—

नमो देव्यै महादेव्यै शिवायै सततं नमः। नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्॥
तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टां। दुर्गां देवीं शरणं प्रपद्यामहेऽसुरान्नाशयित्र्यै ते नमः॥
देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति। सानोमन्देषमूर्जदुहानाधेनुर्वागस्मानुपसुष्टुतैतु ॥

कालरात्रीं ब्रह्मस्तुतां वैष्णवीं स्कन्दमातरम्। सरस्वतीमदितिं दक्षदुहितरं नमामः। पावनां शिवाम्।

महालक्ष्म्यै च विद्महे सर्वशक्त्यै च धीमहि। तन्नो देवीप्रचोदयात्। अदितिर्ह्यनिष्टं दक्षयादुहितातव। तान्देवाअन्वजायन्ते भद्राअमृततबन्धवः कामेयोनिः कमलावज्रपाणिगुहाहं सामातलिश्चाभ्रमिन्द्रः पुनर्गुहा सकलामायया चापृथक् क्लेशाविश्वमातादिविद्याः। एषात्मशक्तिः एषा विश्वमोहिनीपाशाङ्कुशधनुर्बाणधरा। एषा श्रीमहाविद्या। य एवं वेद स शोकं तरति। नमस्ते भगवति मातरस्मान्पाहि सर्वतः। सैषा वैष्णवा वसवः सैवैकादशरुद्राः सैषा द्वादशादित्याः सैषा विश्वेदेवाः सोमपा असोमपाश्च सैषा यातुधाना असुरा रक्षांसि पिशाचयक्षसिद्धाः सैषा सत्त्वरजस्तमांसि सैषा ब्रह्मविष्णुरुद्ररूपिणी सैषा प्रजापतीन्द्रमनवः सैषा ग्रहनक्षत्रज्योतिष्कलाकाष्ठादिविश्वरूपिणी तामहं प्रणौमि नित्यम्।

पापापहारिणी देवी भुक्तिमुक्तिप्रदायिनी। अनन्तां विजयां शुद्धां शरण्यां सर्वदा शिवाम्॥
वियदाकारसंयुक्तं वीतिहोत्रसमन्वितम्। अर्द्धेन्दुलसितं देव्या बीजं सर्वार्थसाधकम्॥
एवमेकाक्षरं मन्त्रं यतयः शुद्धचेतसः। ध्यायन्ति परमानन्दमया ज्ञानाम्बुराशयः॥
वाङ्मयाब्रह्मभूस्तस्मात् षष्ठवक्त्रसमन्वितम्। सूर्योवामश्रोत्रबिन्दुसंयुक्ताष्टतृतीयकम् ॥
नारायणेन सम्मिश्रो वायुश्चाधारयुक्तयः। विच्चे नवार्णकोणस्य महानानन्ददायकः॥
हृत्पुण्डरीकमध्यस्थां प्रातःसूर्यसमप्रभाम्। पाशाङ्कुशधरां सौम्यां वरदाभयहस्तिकाम्॥
त्रिनेत्रां रक्तवसनां भक्तकामदुहं भजे। भजामि त्वां महादेवि महाभयविनाशिनि॥
महादारिद्र्यशमनि महाकारुण्यरूपिणि॥

यस्याः स्वरूपं ब्रह्मादयो न जानन्ति तस्मादुच्यते अज्ञेया। यस्या अन्तो न लभ्यते तस्मादुच्यतेऽनन्ता। यस्या लक्षं नोपलभ्यते तस्मादुच्यते अलक्ष्या। यस्या जननं नोपलक्ष्यते तस्मादुच्यते अजा। एकैव सर्वत्र वर्तते तस्मादुच्यते एका। एकैवं विश्वरूपिणी तस्मादुच्यतेऽनेका। अत एवोच्यतेऽज्ञेयानन्तालक्ष्याजैकानेकामन्त्राणां मातृकादेवीशब्दानां ज्ञानरूपिणी ज्ञानानां चिन्मयातीता शून्यसाक्षिणी। यस्याः परतरं नास्ति सैषा दुर्गा प्रकीर्तिता। तां दुर्गां दुर्गमां देवीं दुराचारविघातिनीम्॥ नमामि भवभीतोऽहं संसारार्णवतारिणीम्॥

इदमथर्वशीर्षं योऽधीते स पञ्चाथर्वशीर्षफलमाप्नोति। इदमथर्वशीर्षमज्ञात्वा योऽर्चां ँ ७ स्थापयति। शतलक्षं प्रजप्त्वापि नार्चाशुद्धिं च विन्दति। शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः॥ दशवारं पठेद्यस्तु सद्यः पापात्प्रमुच्यते। महादुर्गाणि तरति महादेव्याः प्रसादतः। सायमधीयानो दिवसकृतं पापं नाशयति। प्रातरधीयानो रात्रिकृतं पापं नाशयति। सायंप्रातः प्रयुञ्जानोऽपापो भवति। निशीथे तुरीयसन्ध्यायां जप्तुर्वाक्सिद्धिर्भवति। नूतनायां प्रतिमायां जप्त्वा देवतासान्निध्यं भवति। भौमाश्विन्यां महादेवीसन्निधौ जप्त्वा महामृत्युं तरति। स महामृत्युं तरति। य एवं वेद। इत्युपनिषत्। इति देव्यथर्वशीर्षं समाप्तम्।

देवी अथर्वशीर्ष—ॐ सभी देवता देवी के निकट गये तथा पूछने लगे—हे महादेवि! आप कौन हैं ? वह बोली—मैं ब्रह्मस्वरूप हूँ तथा मुझसे प्रकृति-पुरुषात्मक (सद-असद् रूप) जगत उत्पन्न हुआ है। मैं आनन्द तथा अनानन्द रूप वाली हूँ। मैं विज्ञान तथा अविज्ञान स्वरूपिणी हूँ। मैं जानने योग्य ब्रह्म तथा अब्रह्म हूँ। मैं पञ्चभूत तथा अपञ्चभूत हूँ। मैं सम्पूर्ण जगत् हूँ। वेद तथा अवेद हूँ। मैं विद्या तथा अविद्या हूँ। मैं अजा तथा अनजा (प्रकृति तथा उससे भिन्न) हूँ। मैं नीचे, ऊपर तथा तिर्यक् (अगल-बगल) हूँ। मैं रुद्रों एवं वसुओं के रूप में सञ्चरित होती हूँ। मैं आदित्यों एवं विश्वेदेवों के रूपों में फिरा करती हूँ। मैं मित्र तथा वरुण दोनों का, इन्द्र एवं अग्नि का एवं अश्विनीद्वय का पोषण करती हूँ। मैं सोम, त्वष्टा, पूषा तथा भग को धारण करती हूँ। तीनों लोकों को अपने पादक्षेप से आक्रान्त करने वाले विष्णु को तथा ब्रह्मा एवं प्रजापति को मैं ही धारण करती हूँ। मैं देवताओं को हवि पहुँचाने वाले तथा सोमरस निकालने वाले यजमान के लिये हविर्द्रव्यों से युक्त धन को धारण करती हूँ। मैं सम्पूर्ण संसार की ईश्वरी, उपासकों को धन प्रदान करने वाली, ब्रह्मस्वरूपा तथा यजन करने योग्य देवों में प्रथमा हूँ। मैं आत्मस्वरूप पर आकाश आदि का निर्माण करती हूँ। मैं आत्मस्वरूप को धारण करने वाली बुद्धिवृत्ति में स्थित रहती हूँ। जो इस बात को जानता है, दैवी सम्पदा को प्राप्त होता है।

वे देवता बोले—देवी को प्रणाम है, बड़ों-बड़ों को भी स्वकर्त्तव्य मार्ग पर आरूढ़ करने वाली कल्याणी को प्रणाम है। उन अग्नि के समान चमक वाली, तप से जलने वाली वैरोचनी देवी की शरण में हम देवता लोग जाते हैं। उन असुरों को नष्ट करने वाली देवी को नमस्कार है। प्राणस्वरूप देवताओं ने जिस भास्वर वैखरी वाणि का प्रदान किया, उसे अनेक प्रकार के प्राणी बोलते हैं। वह कामधेनु के समान आनन्ददायक, अन्न तथा बलदायक, वाणीरूप भगवती उत्तम स्तुति से सन्तुष्ट होकर हमारे समीप पधारने की कृपा करे। काल की नाशक, वेदों द्वारा स्तुत, विष्णुशक्ति, स्कन्दमाता (शिवशक्ति), देवमाता (अदिति), सरस्वती (ब्रह्मशक्ति), दक्षकन्या (सती), पापनाशिनी कल्याणकारिणी देवी को हम (देवगण) प्रणाम करते हैं। हम महालक्ष्मी को जानते हैं। हम उन शक्तिस्वरूपिणी का ही ध्यान करते हैं। वह देवी हमें ज्ञान में प्रवृत्त करे।

हे दक्ष! आपकी पुत्री अदिति से देव उत्पन्न हुए हैं। काम (क), योनि (ए), कमला (ई), वज्रपाणि इन्द्र ('लं' बीज), गुहा (ह्रीं बीज), सकल वर्ण तथा माया बीज (ह्रीं)—यह सर्वात्मिका जगन्माता की मूल विद्या है तथा वह ब्रह्मस्वरूपिणी है। ये परात्म शक्ति हैं। ये विश्वमोहिनी हैं; जो पाश, अङ्कुश, धनुष, बाण को धारण करने वाली हैं। ये श्री महाविद्या हैं। जो इस बात को जानता है, वह व्यक्ति सभी शोक से पार हो जाता है। हे भगवति! आपको नमस्कार है। हे माता! आप हम देवों की रक्षा करें।

(मन्त्रद्रष्टा ऋषियों ने कहा)—वही यातुधान है; वही असुर, राक्षस, पिशाच, यक्ष तथा सिद्ध हैं; वही सत्व-रज-तम हैं। वही ब्रह्म-विष्णु-रुद्रस्वरूपिणी है। वही प्रजापति, इन्द्र एवं मन है। वही देवी इन ग्रह, नक्षत्र, तारों, कला, काष्ठा आदि के रूप में प्रकट है। वह पापनाशक, भोग-मोक्षप्रद, अन्तरहित, विजयाधिष्ठात्री, दोषरहित,

शरण्या, कल्याणदात्री तथा मङ्गलरूपिणी है; उसे हम प्रणाम करते हैं। आकाश (ह) तथा 'ई' वर्ण से युक्त जो वीतिहोत्र (अग्नि='रं' बीज) युक्त अर्धचन्द्र से अलंकृत देवीबीज है, वह सभी मनोरथों को पूरा करना है। इस एकाक्षर ब्रह्म (ह्रीं) को शुद्ध चित्त वाले साधक ज्ञान के सागर होकर ध्याते हैं। हे चित्स्वरूपिणी महासरस्वती, हे सद्रूपिणी महालक्ष्मी, हे आनन्दरूपिणी महाकाली! ब्रह्मविद्या पाने के लिये हम प्रत्येक समय आपका ध्यान करते हैं। आपको नमस्कार है। आप अविद्या रज्जु की हृद्ग्रन्थि को खोलकर मुझे मुक्त करो।

हृत्कमल के मध्य में रहने वाली, प्रातःकालीन सूर्य जैसी कान्ति से युक्त, पाशाङ्कुशधारिणी, मनोहर-स्वरूपिणी, वरद एवं अभयमुद्राधारिणी, त्रिनेत्रा, रक्तवस्त्रधारिणी तथा कामधेनु के समान भक्तों के मनोरथ को पूर्ण करने वाली देवी को मैं भजता हूँ। महाभयनाशिनी, महासङ्कट को शान्त करने वाली, करुणामयी देवीमूर्ति! आपको नमस्कार है। जिस देवी का स्वरूप ब्रह्मादि देवता भी नहीं जानते हैं, इसलिये वह अज्ञेया कहलाती है। अन्त न मिलने से वह अनन्ता है। लक्ष्य न दिखने से वह अलक्ष्या है। जन्म का पता नहीं होने से वह अजा है। वह अकेली है, सर्वव्याप्त है। अतः एका है; किन्तु वही विश्व में नाना रूपों में दिखती है; अतः नैका है। इसीलिये वह देवी अज्ञेया, अनन्ता, अलक्ष्या, अजा, एका तथा नैका कहलाती है। सब देवों में मातृका (मूलाक्षर) रूप में, शब्दों में ज्ञान के रूप में, ज्ञानों में चिन्मयातीता के रूप में, शून्यों में शून्यसाक्षिणी के रूप में वह देवी रहती है। अतः उस दुर्गा के नाम से प्रसिद्ध देवी के समान अन्य कोई श्रेष्ठ नहीं है। अतः उन दुर्विज्ञेया, दुराचारनाशिनी, संसारतारिणी दुर्गा को मैं संसारभय से भीत होकर नमस्कार करता हूँ।

इस अथर्वशीर्ष का जो अध्ययन करता है, उसे पाँच अथर्वशीर्षों के जप का फल प्राप्त होता है। इस अथर्वशीर्ष को बिना जाने जो देवी की प्रतिमा का स्थापन करता है, उसे सैकड़ों लाख जप करने पर भी देवी-पूजा का फल नहीं मिलता है। अष्टोत्तर (१०८) जप इसकी पुरश्चरण विधि है। जो इसका दस बार पाठ करता है, वह उसी समय पापों से छुटकारा पा जाता है। जो सायङ्काल इसका पाठ करता है, वह दिन में किये गये पापों को नष्ट कर लेता है। प्रातःकाल में जो इसका अध्ययन करता है, उसके रात में किये हुए पाप नष्ट हो जाते हैं। दोनों सन्ध्याओं में इसको पढ़ने वाला निष्पाप रहता है। जो इसका मध्यरात्रि में तुरीय सन्ध्या के समय जप करता है, उसे वाक्सिद्धि प्राप्त होती है। नयी प्रतिमा पर (प्रतिष्ठा के समय) किया गया जप देवी का सान्निध्य प्राप्त कराता है। प्राणप्रतिष्ठा के समय इसका जप करने से प्राणों की प्रतिष्ठा होती है। भौमवार में अश्विनी नक्षत्र के योग से बने अमृतसिद्धि योग में इसका जप महादेवी के सान्निध्य में करने पर महामृत्यु से तर जाता है (मुक्त हो जाता है)। जो इस प्रकार से जानता है, वह महामृत्यु से तर जाता है। इस प्रकार यह (देव्यथर्वशीर्ष) अविद्यानाशिनी ब्रह्मविद्या है।

विमर्श—सामान्यतः दैनिक कृत्य में त्रिकाल सन्ध्या करने का विधान है, जिसके अनुसार प्रातः, मध्याह्न तथा सूर्यास्त समय—इन तीन कालों में सन्ध्या करने का नियम है; परन्तु तन्त्रमार्ग में जो श्रीविद्या के साधक होते हैं, वे चार समय सन्ध्योपासना करते हैं, इनमें चौथी सन्ध्या निशीथ काल (अर्धरात्रि के समय) में की जाती है। इसी का नाम तुरीय सन्ध्या है।

लक्ष्मीमन्त्रानुष्ठानम्

श्रीगणेशाय नमः। अथ लक्ष्मीमन्त्रानुष्ठानविधानं शारदातिलके—

अथ वक्ष्ये श्रियो मन्त्रान् श्रीसौभाग्यफलप्रदान्। यस्याः कटाक्षमात्रेण त्रैलोक्यमपि वर्द्धते॥ १॥

तत्र तावल्लक्ष्म्या एकाक्षरमन्त्रपुरश्चरणप्रयोगः। मन्त्रस्वरूपं यथा 'श्रीं' इत्येकाक्षरो बीजमन्त्रः॥ १॥ ऐं श्रीं ह्रीं क्लीं इति चतुर्बीजात्मको मन्त्रः॥ २॥ अस्य लक्ष्मीबीजमन्त्रस्य भृगुर्ऋषिः निचृच्छन्दः श्रीलक्ष्मीः देवता। शं बीजम्। ईं शक्तिः। रं कीलकम्। सर्वेष्टसिद्ध्यर्थे जपे विनियोगः। ॐ भृगुऋषये नमः शिरसि॥ १॥ ॐ निचृच्छन्दसे नमः मुखे॥ २॥ ॐ श्रीदेवतायै नमः हृदये॥ ३॥ ॐ शं बीजाय नमः गुह्ये॥ ४॥ ईं शक्तये नमः पादयोः॥ ५॥ रं कीलकाय नमः सर्वाङ्गे॥ ६॥ इति ऋष्यादिन्यासः। ॐ श्रां अङ्गुष्ठाभ्यां नमः॥ १॥ ॐ श्रीं तर्जनीभ्यां नमः॥ २॥ ॐ श्रूं मध्यमाभ्यां नमः॥ ३॥ ॐ श्रैं अनामिकाभ्यां नमः॥ ४॥ ॐ श्रौं कनिष्ठिकाभ्यां नमः॥ ५॥ ॐ श्रः करतलकरपृष्ठाभ्यां नमः॥ ६॥ इति करन्यासः। एवमेव हृदयादिन्यासं कृत्वा ध्यायेत्।

एकाक्षरमन्त्रध्यानम्—

कान्त्या काञ्चनसन्निभां हिमगिरिप्रख्यैश्चतुर्भिर्गजैर्हस्तोत्क्षिप्तहिरण्मयामृतघटैरासिच्यमानां श्रियम्।
बिभ्राणां वरमब्जयुग्ममभयं हस्तैः किरीटोज्ज्वलां क्षौमाबद्धनितम्बबिम्बलसितां वन्देऽरविन्दस्थिताम्॥

अथ चतुरक्षरमन्त्रध्यानम्—

माणिक्यप्रतिमप्रभाहिमनिभैस्तुङ्गैश्चतुर्भिर्गजैर्हस्ताग्राहितरत्नकुम्भसलिलैरासिच्यमानां मुदा।
हस्ताब्जैर्वरदानमम्बुजयुगाभीतीर्दधानां हरेः कान्तां काङ्क्षितपारिजातलतिकां वन्दे सरोजासनाम्॥

इति ध्यात्वा मानसोपचारैः सम्पूज्य पीठपूजां कुर्यात्।

एकाक्षर तथा चतुरक्षर लक्ष्मी मन्त्र-प्रयोग (शारदातिलक में)—अब मैं श्री लक्ष्मी जी के सर्वसौभाग्यप्रद मन्त्रों को बता रहा हूँ, जिसके कटाक्षमात्र से तीनों लोक वृद्धि को प्राप्त होते हैं। अब प्रथम लक्ष्मी के एकाक्षर एवं चतुरक्षर मन्त्रों के प्रयोग को कहता हूँ। 'श्रीं' यह एकाक्षर मन्त्र है तथा 'ऐं श्रीं ह्रीं क्लीं' यह चतुर्बीजात्मक (चार अक्षरों का) मन्त्र है।

विनियोग—'ॐ अस्य श्रीलक्ष्मीबीजमन्त्रस्य भृगुर्ऋषिः निचृच्छन्दः श्रीलक्ष्मीः देवता शं बीजं ईं शक्तिः रं कीलकम् सर्वेष्टसिद्धिजपे विनियोगः' कहकर विनियोग करे। फिर मूल में लिखे 'ॐ भृगुऋषये नमः शिरसि' इत्यादि छः मन्त्रों से उनमें निर्दिष्ट अङ्गों में ऋष्यादिन्यास करे। फिर मूलोक्त 'ॐ श्रां अङ्गुष्ठाभ्यां नमः।' इत्यादि छः मन्त्रों से उनमें निर्दिष्ट अङ्गों में करन्यास करे। तदनन्तर 'ॐ श्रां हृदयाय नमः, ॐ श्रीं शिरसे स्वाहा, ॐ श्रूं शिखायै वषट्, ॐ श्रैं कवचाय हुम्, ॐ श्रौं नेत्रत्रयाय वौषट् तथा ॐ श्रः अस्त्राय फट्' इन मन्त्रों से हृदयादिन्यास करना चाहिये (फिर ध्यान करे)। एकाक्षर मन्त्र का ध्यान इस प्रकार है—

कान्त्या काञ्चनसन्निभां हिमगिरिप्रख्यैश्चतुर्भिर्गजैर्हस्तोत्क्षिप्तहिरण्मयामृतघटैरासिच्यमानां श्रियम्।
बिभ्राणां वरमब्जयुग्ममभयं हस्तैः किरीटोज्ज्वलां क्षौमाबद्धनितम्बविंबलसितां वन्देऽरविन्दस्थिताम्॥

चतुरक्षर मन्त्र का ध्यान इस प्रकार है—

माणिक्यप्रतिमप्रभाहिमनिभैस्तुङ्गैश्चतुर्भिर्गजैर्हस्ताग्राहितरत्नकुम्भसलिलैरासिच्यमानां मुदा।
हस्ताब्जैर्वरदानमम्बुजयुगाभीतीर्दधानां हरेः कान्तां काङ्क्षितपारिजातलतिकां वन्दे सरोजासनाम्॥

इस प्रकार से जिस मन्त्र का अनुष्ठान करना हो, उसका ध्यान करे। फिर मानसोपचार से श्री लक्ष्मी जी की पूजा करके पीठपूजा करे।

ॐ मण्डूकादिपरतत्त्वान्तपीठदेवताभ्यो नमः इति पीठदेवताः सम्पूज्य पूर्वादिषु ॐ विभूत्यै नमः॥ १॥ ॐ उन्नत्यै नमः॥ २॥ ॐ कान्त्यै नमः॥ ३॥ ॐ सृष्ट्यै नमः॥ ४॥ ॐ कीर्त्यै नमः॥ ५॥ ॐ सन्नत्यै नमः॥ ६॥ ॐ पुष्ट्यै नमः॥ ७॥

ॐ उत्कृष्टयै नमः ॥ ८ ॥ (मध्ये) ॐ ऋद्ध्यै नमः ॥ ९ ॥ इति पीठशक्तीः पूजयेत्। तदुपरि श्रीकमलासनाय नमः इत्यासनं दत्त्वा मूलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पान्तैरुपचारैः सम्पूज्य आवरणपूजां कुर्यात्।

पीठपूजा—'ॐ मण्डूकादिपरतत्वान्तपीठदेवताभ्यो नमः' कहकर पीठदेवताओं को पूजकर मूल में लिखित पूर्वादि आठ दिशाओं में प्रदक्षिणक्रम से 'ॐ विभूत्यै नमः' इत्यादि आठ मन्त्रों से क्रमशः पूजन करे, फिर पीठ के मध्य भाग में 'ॐ ऋद्ध्यै नमः' कहकर नौ पीठशक्तियों का पूजन सम्पन्न करना चाहिये। फिर उस पीठ पर 'श्रीकमलासनाय नमः' कहकर लक्ष्मी जी को आसन दे। फिर मूल मन्त्र से लक्ष्मी जी की मूर्ति की कल्पना करके पाद्यादि पुष्पान्त उपचारों से पूजन कर फिर आवरणपूजा करनी चाहिये।

(षट्कोणे) आग्नेयादिकोणकेसरेषु मध्ये दिक्षु च ॐ श्रां हृदयाय नमः ॥ १ ॥ ॐ श्रीं शिरसे स्वाहा ॥ २ ॥ ॐ श्रूं शिखायै वषट् ॥ ३ ॥ ॐ श्रैं कवचाय हुँ ॥ ४ ॥ ॐ श्रौं नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ श्रः अस्त्राय फट् ॥ ६ ॥ इति षडङ्गानि पूजयेत्। तद्बहिरष्टदले पूर्वादिचतुर्दिक्षु क्रमेण ॐ वासुदेवाय नमः ॥ १ ॥ ॐ सङ्कर्षणाय नमः ॥ २ ॥ ॐ प्रद्युम्नाय नमः ॥ ३ ॥ ॐ अनिरुद्धाय नमः ॥ ४ ॥ (कोणदलेषु) ॐ दमकाय नमः ॥ ५ ॥ ॐ सलिलाय नमः ॥ ६ ॥ ॐ गुग्गुलाय नमः ॥ ७ ॥ ॐ कुरुण्डकाय नमः ॥ ८ ॥ इति पूजयेत्। (ततो देवीदक्षिणभागे) ॐ शङ्खनिधये नमः ॥ १ ॥ ॐ वसुधायै नमः ॥ २ ॥ (देवीवामे) ॐ पद्मनिधये नमः ॥ १ ॥ ॐ वसुमत्यै नमः ॥ २ ॥ इति पूजयेत्। (ततोऽष्टदलाग्रेषु पूर्वादिक्रमेण) ॐ बलाक्यै नमः ॥ १ ॥ ॐ विमलायै नमः ॥ २ ॥ ॐ कमलायै नमः ॥ ३ ॥ ॐ नवमालिकायै नमः ॥ ४ ॥ ॐ विभीषिकायै नमः ॥ ५ ॥ ॐ भालिकायै नमः ॥ ६ ॥ ॐ शाङ्कर्यै नमः ॥ ७ ॥ ॐ सुमालिकायै नमः ॥ ८ ॥ इति पूजयेत्। तद्बाह्ये इन्द्रादीन् दशदिक्पालान् पूजयेत्। तद्बाह्ये वज्राद्यायुधानि च पूजयेत्। इत्यावरणपूजां कृत्वा धूपादिनमस्कारान्तं सम्पूज्य स्तवेन स्तुत्वा जपं कुर्यात्। अस्य पुरश्चरणं द्वादशलक्षजपः। अन्यत्सर्वं पूर्ववत्।

आवरण-पूजा—सर्वप्रथम षट्कोण में आग्नेयादि कोण, केसरों के मध्य तथा दिशाओं में 'ॐ श्रां हृदयाय नमः' इत्यादि मूल में लिखित छः मन्त्रों से पूजन करे। इस प्रकार षडङ्ग पूजन करने के पश्चात् बाहर अष्टदलों में मूलोक्त 'ॐ वासुदेवाय नमः' इन चार मन्त्रों से मुख्य दिशाओं में फिर 'ॐ दमकाय नमः' इत्यादि शेष चार मन्त्रों से चारो कोणों (विदिशाओं) के दलों में पूजन करे। फिर देवी के दक्षिण भाग में 'ॐ शङ्खनिधये नमः तथा ॐ वसुधायै नमः' से पूजन करे। फिर उनके वामभाग में 'ॐ पद्मनिधये नमः तथा ॐ वसुमत्यै नमः' से पूजन करे। फिर आठो दलों में क्रम से 'ॐ बलाक्यै नमः' इत्यादि मूलोक्त आठ मन्त्रों से पूजन करना चाहिये। फिर उसके बाहर दश दिक्पालों तथा उनके बाहर उनके वज्रादि आयुधों की पूजा करनी चाहिये। इस प्रकार से आवरण-पूजा करके धूपादि नमस्कारान्त पूजित कर लक्ष्मीस्तव (आगे दिये गये हैं) से स्तुति कर मन्त्र (एकाक्षरी मन्त्र अथवा चतुरक्षरी मन्त्र) का जप करना चाहिये। इन मन्त्रों का पुरश्चरण बारह लाख जप करने से होता है। अन्य सब पूर्ववत् करना चाहिये।

तथा च—

भानुलक्षं जपेन्मन्त्रं दीक्षितो विजितेन्द्रियः। श्रियमभ्यर्चयेन्नित्यं सुगन्धिकुसुमादिभिः ॥
तत्सहस्रं प्रजुहुयात्कमलैर्मधुरोक्षितैः। जपान्ते जुहुयान्मन्त्री तिलैर्वा मधुराप्लुतैः ॥
बैल्वैः फलैर्वा जुहुयात्त्रिभिर्वा साधकोत्तमः। इत्थं यो भजते देवीं विधिना साधकोत्तमः ॥
धनधान्यसमृद्धिः स्याच्छ्रियमाप्नोत्यनिन्दिताम् ॥
वक्षःप्रमाणे सलिले स्थित्वा मन्त्रमिमं जपेत्। त्रिलक्षं संयतो मन्त्री देवीं ध्यात्वार्कमण्डले ॥
स भवेदल्पकालेन रमाया वसतिः स्थिरा। विष्णुगेहस्थबिल्वस्य मूलमास्थाय मन्त्रवित् ॥

त्रिलक्षं प्रजपेन्मन्त्रं वाञ्छितं लभते धनम्। अशोकवह्नौ जुहुयात्तण्डुलैराज्यलोलितैः॥
वशयत्यचिरादेव त्रैलोक्यमपि मन्त्रवित्। जुहुयात्तण्डुलैः शुद्धैरर्काग्नौ नियुतं वशी॥
राज्यश्रियमवाप्नोति राजपुत्रो महीयसीम्। जुहुयात्खादिरे वह्नौ तण्डुलैर्मधुरोक्षितैः॥
राजा वश्यो भवेच्छीघ्रं महालक्ष्मीश्च वर्द्धते। बिल्वछायामधिवसन्बिल्वमिश्रहविष्यभुक् ॥
संवत्सरद्वयं हुत्वा तत्फलैरथवाम्बुजैः। साधकेन्द्रो महालक्ष्मीं चक्षुषा पश्यति ध्रुवम्॥
हविषा घृतसिक्तेन पायसेन ससर्पिषा। हुत्वा श्रियमवाप्नोति नियुतं मन्त्रवित्तमः॥
मधुराक्तारुणाम्भोजैर्जुहुयाल्लक्षमादरात् । न मुञ्चति रमा तस्य वंशमाभूतसम्प्लवम्॥
इत्येकाक्षरचतुरक्षरलक्ष्मीमन्त्रपुरश्चरणप्रयोगः।

पुरश्चरण की फलश्रुति—दीक्षा लेकर जितेन्द्रिय होकर बारह लाख जप करते हुए प्रतिदिन लक्ष्मी का पूजन सुगन्ध कुङ्कुमादि से करे। जप का दशांश मधुरत्रय (घी, दूध तथा मधु—ये तीन मधुरत्रय हैं) से आप्लावित कर कमलों से अथवा मधुर-प्लावित तिलों से अथवा बेलफलों के तीन टुकड़े करके साधक को हवन करना चाहिये। जो इस प्रकार से देवी को भजता है, उसके धन-धान्य की समृद्धि होती है तथा उसे नित्य ही लक्ष्मी की प्राप्ति होती है। यदि आवक्ष गहरे जल में खड़े होकर इस मन्त्र को तीन लाख की सङ्ख्या में जपे तथा सूर्यमण्डल में देवी का ध्यान करे तो उसके यहाँ एक कल्प समय तक लक्ष्मी स्थिर रहती है। भगवान् विष्णु के मन्दिर प्राङ्गण में लगे बेलवृक्ष की जड़ में बैठकर यदि इस मन्त्र का जप किया जाय तो वाञ्छित धन की प्राप्ति होती है। यदि अशोक की समिधा की अग्नि में घृताक्त चावलों से हवन किया जाय तो तीनों लोक शीघ्र ही वश में हो जाते हैं। यदि आक की समिधा की अग्नि में हवन करे तो उस राजपुत्र को राज्यलक्ष्मी की प्राप्ति होती है। यदि खैर की समिधाओं की अग्नि में मधुर-मिश्रित तण्डुल से हवन करे तो उसके वश में राजा हो जाता है और उसकी लक्ष्मी बढ़ती है। यदि बेलवृक्ष की छाया में बैठकर बेलफल-मिश्रित हविष्य का भोजन करते हुये दो वर्ष तक बेलफलों अथवा कमलों से हवन करे तो वह अपने नेत्रों से निश्चित ही लक्ष्मी के दर्शन करता है। यदि घी मिश्रित पायस से हवन करे तो लक्ष्मी की प्राप्ति होती है। मधुराक्त लाल कमल के फूलों से एक लाख हवन भक्तिपूर्वक करे तो लक्ष्मी उसके वंश को छोड़कर नहीं जाती है। इस प्रकार यह एकाक्षर तथा चतुरक्षर लक्ष्मी मन्त्र की प्रयोगविधि समाप्त हुई।

दक्षाक्षरलक्ष्मीमन्त्रप्रयोगः

मन्त्रो यथा—'नमः कमलवासिन्यै स्वाहा' इति दशाक्षरो मन्त्रः। अस्य मन्त्रस्य दक्षऋषिः। विराट् छन्दः। लक्ष्मीर्देवता। इष्टसिद्ध्यर्थे जपे विनियोगः। ॐ दक्षऋषये नमः शिरसि॥ १॥ ॐ विराट्छन्दसे नमः मुखे॥ २॥ ॐ लक्ष्मीदेवतायै नमः हृदि॥ ३॥ इति ऋष्यादिन्यासः। ॐ देव्यै नमः अङ्गुष्ठाभ्यां नमः॥ १॥ ॐ पद्मिन्यै नमः तर्जनीभ्यां नमः॥ २॥ ॐ विष्णुपत्न्यै नमः मध्यमाभ्यां नमः॥ ३॥ ॐ वरदायै नमः अनामिकाभ्यां नमः॥ ४॥ ॐ कमलरूपायै नमः कनिष्ठिकाभ्यां नमः॥ ५॥ इति करन्यासः। एवं नेत्रहीनं हृदयादिपञ्चाङ्गन्यासं कृत्वा ध्यायेत्। ध्यानम्—

आसीना सरसीरुहे स्मितमुखी हस्ताम्बुजैर्बिभ्रती दानं पद्मयुगाभये च वपुषा सौदामिनीसन्निभा।
मुक्तादामविराजमानपृथुलोत्तुङ्गस्तनोद्भासनी पायान्नः कमला कटाक्षविभवैरानन्दयन्ती हरिम्॥
इति ध्यात्वा पूर्वोक्तावरणपूजां कृत्वा जपं कुर्यात्। अस्य पुरश्चरणं दशलक्षणजपः।

दशाक्षर लक्ष्मी मन्त्र-प्रयोग—'नमः कमलवासिन्यै स्वाहा' यह दशाक्षरों वाली लक्ष्मी मन्त्र है। विनियोग-हेतु 'ॐ अस्य दशाक्षरलक्ष्मीमन्त्रस्य दक्षऋषिः विराट्छन्दः। लक्ष्मीर्देवता। इष्टसिद्ध्यर्थे जपे विनियोगः' कहकर जल

छोड़े। फिर 'ॐ दक्षऋषये नमः शिरसि, ॐ विराट् छन्दसे नमः मुखे तथा ॐ लक्ष्मीदेवतायै नमः हृदि' कहकर ऋष्यादि न्यास क्रमशः शिर-मुख तथा हृदय में करे। तत्पश्चात् 'ॐ देव्यै नमः अङ्गुष्ठाभ्यां नमः, ॐ पद्मिन्यै नमः तर्जनीभ्यां नमः, ॐ विष्णुपत्न्यै नमः मध्यमाभ्यां नमः, ॐ वरदायै नमः अनामिकाभ्यां नमः, ॐ कमलरूपायै नमः कनिष्ठिकाभ्यां नमः' इन पाँच मन्त्रों से करन्यास करे। फिर नेत्रों को छोड़कर शेष पाँच अङ्गों का न्यास इन्हीं मन्त्रों से इस प्रकार करे—'ॐ देव्यै नमः हृदयाय नमः, ॐ पद्मिन्यै नमः शिरसे स्वाहा, ॐ विष्णुपत्न्यै नमः शिखायै वषट्, ॐ वरदायै नमः कवचाय हुम्, ॐ कमलरूपायै नमः अस्त्राय फट्।' फिर लक्ष्मी जी का ध्यान मूल में लिखित—'आसीना सरसीरुहे स्मितमुखी' इत्यादि से करे। (भावार्थ—कमल पर विराजमान, प्रसन्न मुख वाली, हाथों में दान अभयमुद्रा तथा दो कमल लिये, बिजली के समान चमक वाली मोतियों की झालरों से सुसज्जित पीन उत्तुङ्ग स्तनों से सुशोभित लक्ष्मी जी भगवान् विष्णु को आनन्दित करती हुई मेरी रक्षा करे। इस प्रकार ध्यान करके पूर्व के एकाक्षर-चतुरक्षर मन्त्र में कथित आवरण-पूजा की विधि से पीठपूजा तथा यन्त्रावरण पूजा करे (लक्ष्मी यन्त्र आगे दिया जा रहा है)। फिर इस दशाक्षर लक्ष्मी मन्त्र का दश लाख की सङ्ख्या में जप करके पुरश्चरण सम्पन्न करे।

तथा च—

दशलक्षं जपेन्मन्त्रं मन्त्रविद्विजितेन्द्रियः। दशांशं जुहुयान्मन्त्री मधुराक्तैः सरोरुहैः॥
समुद्रगायां सरिति कण्ठमात्रे जले स्थितः। त्रिलक्षं प्रजपेन्मन्त्री साक्षाद्वैश्रवणो भवेत्॥
आराध्योत्तरनक्षत्रे देवीं स्रक्चन्दनादिभिः। नन्द्यावर्तभवैः पुष्पैः सहस्रं जुहुयात्ततः॥
पौर्णमास्यां फलैर्बैल्वैर्जुहुयान्मधुराप्लुतैः। पञ्चम्यां विंशदाम्भोजैः शुक्रवारे सुगन्धिभिः॥
अन्यैर्वा विशदैः पुष्पैः प्रतिमासं विशालधीः। स भवेदब्दमात्रेण सर्वदा सम्पदां निधिः॥

इति दशाक्षरलक्ष्मीमन्त्रप्रयोगः समाप्तः।

पुरश्चरण-विधि—साधक जितेन्द्रिय होकर इस मन्त्र का दश लाख जप करे तथा जप का दशांश (एक लाख) हवन मधुराक्त (घी-दूध-मधु) कमलों से करे। समुद्र में जाने वाली नदी में कण्ठमात्र जल में स्थित होकर यदि साधक इस मन्त्र (नमः कमलवासिन्यै स्वाहा) का जप करे तो वह कुबेर के समान हो जाता है। उत्तरा नक्षत्र में लक्ष्मी की लाल चन्दन आदि से पूजा करके नन्द्यावर्त्त के फूलों की एक सहस्र आहुतियाँ दे तथा पूर्णिमा के दिन मधुराप्लुत बेलपत्रों की आहुतियाँ दे। पञ्चमी को निर्मल कमलों की तथा शुक्रवार को सुगन्धि की आहुति दे। अथवा अन्य विशद् पुष्पों से प्रतिमास की पूर्णिमा पर इस दशाक्षर मन्त्र से एक वर्ष तक आहुति देता रहे तो वह बुद्धिमान् मनुष्य एक वर्ष के उपरान्त ही सम्पूर्ण सम्पदाओं का स्वामी हो जाता है।

महालक्ष्मीमन्त्रपुरश्चरणम्

मन्त्रो यथा—'ॐ ऐं ह्रीँ श्रीँ क्लीं सौं जगत्प्रसूत्यै नमः' इति द्वादशाक्षरो मन्त्रः। अस्य मन्त्रस्य ब्रह्मा ऋषिः। गायत्री छन्दः। महालक्ष्मीर्देवता। सर्वेष्टसिद्ध्यर्थे विनियोगः। ॐ ब्रह्मऋषये नमः शिरसि॥ १॥ ॐ गायत्रीछन्दसे नमः मुखे॥ २॥ ॐ महालक्ष्मीदेवतायै नमः हृदि॥ ३॥ इति ऋष्यादिन्यासः। ततो मूलेन हस्तौ संशोध्य ॐ ऐं नमः अङ्गुष्ठाभ्यां नमः॥ १॥ ॐ ह्रीं नमः तर्जनीभ्यां नमः॥ २॥ ॐ श्रीं नमः मध्यमाभ्यां नमः॥ ३॥ ॐ क्लीं नमः अनामिकाभ्यां नमः॥ ४॥ ॐ सौं नमः कनिष्ठिकाभ्यां नमः॥ ५॥ ॐ जगत्प्रसूत्यै नमः करतलकरपृष्ठाभ्यां नमः॥ ६॥ ॐ ऐं ह्रीँ श्रीँ क्लीँ सौं जगत्प्रसूत्यै नमः इति मूर्द्धादिचरणान्तं व्यापकं न्यसेत्॥ ७॥ इति करन्यासः। ॐ ऐं नमः मूर्ध्नि॥ १॥ ॐ ह्रीं नमः मुखे॥ २॥ ॐ श्रीँ नमः वक्षसि॥ ३॥ ॐ क्लीं नमः गुह्ये॥ ४॥ ॐ सौं नमः पादयोः। इति पञ्चबीजानि विन्यसेत्। ॐ जं नमः त्वचि॥ १॥ ॐ गं नमः रक्ते॥ २॥ ॐ त्रं नमः मांसे॥ ३॥ ॐ सूं नमः मेदसि॥ ४॥ ॐ त्यैं नमः अस्थिन॥ ५॥ ॐ नं नमः मज्जायाम्॥ ६॥ ॐ मं नमः शुक्रे॥ ७॥ इति सप्तवर्णान् सप्तधातुषु हृदये न्यसेत्। ॐ ऐं ज्ञानाय अङ्गुष्ठाभ्यां नमः॥ १॥ ॐ ह्रीं ऐश्वर्याय

तर्जनीभ्यां नमः ॥ २ ॥ ॐ श्रीं शक्तये मध्यमाभ्यां नमः ॥ ३ ॥ ॐ क्लीं बलाय अनामिकाभ्यां नमः ॥ ४ ॥ ॐ सौं वीर्याय कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ जगत्प्रसूत्यै तेजसे नमः करतलकरपृष्ठाभ्यां नमः इति करन्यासः। एवमेव हृदयादिन्यासं कृत्वा ध्यायेत्।

महालक्ष्मी मन्त्र (द्वादशाक्षर लक्ष्मी मन्त्र) **का पुरश्चरण**—'ॐ ऐं ह्रीं श्रीं क्लीं सौं जगत्प्रसूत्यै नमः' यह द्वादशाक्षर लक्ष्मी-मन्त्र है। सर्वप्रथम 'अस्य द्वादशाक्षरलक्ष्मीमन्त्रस्य ब्रह्मात्रऋषिः। गायत्रीछन्दः। महालक्ष्मीर्देवता। सर्वेष्टसिद्ध्यर्थे जपे विनियोगः' इस मन्त्र से जल छोड़कर विनियोग करे। फिर मूल में लिखित 'ॐ ब्रह्मर्षये नमः शिरसि, ॐ गायत्री छन्दसे नमः मुखे तथा ॐ महालक्ष्मीदेवतायै नमो हृदि' इन मन्त्रों से ऋष्यादि न्यास करे। फिर मूल मन्त्र से हाथों को शुद्ध कर मूल पाठ में लिखित 'ॐ ऐं नमः अङ्गुष्ठाभ्यां नमः' इत्यादि सात मन्त्रों से निर्दिष्ट अङ्गों में करन्यास करे। फिर मूलोक्त 'ॐ ऐं नमः मूर्ध्नि' इत्यादि सात मन्त्रों का उनके साथ निर्दिष्ट शरीर की सात धातुओं में न्यास करे। फिर मूल में लिखित 'ॐ ऐं ज्ञानाय अङ्गुष्ठाभ्यां नमः' इत्यादि छः मन्त्रों से पुनः करन्यास करे।

पुनः हृदयादि न्यास ॐ ऐं ज्ञानाय हृदयाय नमः, ॐ ह्रीं ऐश्वर्याय शिरसे स्वाहा, ॐ श्रीं शक्तये शिखायै वषट्, ॐ क्लीं बलाय कवचाय हुम्, ॐ सौं वीर्याय नेत्रत्रयाय वौषट् तथा ॐ जगत् प्रसूत्यै तेजसे नमः अस्त्राय फट् मन्त्रों से करे।

श्रीमहालक्ष्मीयन्त्रम्



तत्रादावुद्यानस्मरणम्—

चम्पकाशोकपुन्नागपाटलैरुपशोभितम् । लवङ्गमालतीबिल्वदेवदारुनमेरुभिः ॥
मन्दारपारिजाताद्यैः कल्पवृक्षैः सुपुष्पितैः । चन्दनैः कर्णिकारैश्च मातुलुङ्गैश्च वञ्जुलैः ॥
दाडिमीलकुचाङ्कोलैः पूगैः कुरवकैरपि । कदलीकुन्दमन्दारनारिकेरैरलङ्कृतैः ॥
अन्यैः सुगन्धिपुष्पाद्यैर्वृक्षसङ्घैश्च मण्डितम् । मालतीमल्लिकाजातीकेतकीशतपत्रकैः ॥
पारन्तीतुलसीनन्द्यावर्तैर्दमनकैरपि । सर्वर्तुकुसुमोपेतैर्नमद्भिरुपशोभितम् ॥
मन्दमारुतसम्भिन्नकुसुमामोदिदिङ्मुखम् । तस्य मध्ये सदोत्फुल्लैः कुमुदोत्पलपङ्कजैः ॥
सौगन्धिकैश्च कह्लारैर्नवैः कुवलयैरपि । हंससारसकारण्डभ्रमरैश्चक्रनामभिः ॥
अन्यैः कलकलारावैर्विहङ्गैरुपशोभितम् । महासरसि तन्मध्ये पुलिनेऽतिमनोहरे ॥
परितः पारिजाताद्यं मण्डपं मणिकुट्टिमम् । उद्यदादित्यसङ्काशं भास्वरं शशिशीतलम् ॥
चतुर्द्वारसमायुक्तं हैमप्राकारशोभितम् । रत्नापक्लृप्तिसंशोभि कपाटाष्टकसंयुतम् ॥
नवरत्नसमाक्लृप्तं तुङ्गगोपुरतोरणम् । हेमदण्ड समालम्बि ध्वजावलिपरिष्कृतम् ॥
नवरत्नसमाबद्धस्तम्भराजिविराजितम् । सहस्रदीपसंयुक्तदीपं दण्डविराजितम् ॥
तप्तहाटकसंक्लृप्तवातायनमनोहरम् । नानावर्णांशुकोद्बद्धसुवर्णशतकोटिभिः ॥
किङ्किणीमल्लिकायुक्तपताकाभिरलङ्कृतम् । जातरूपमयै रत्नविचित्रैरतिविस्तृतैः ॥
माणिक्यरत्नैर्वैडूर्य्यस्वर्णमालावलीयुतैः । अन्तरान्तरसम्बद्धरत्नैर्दृष्टिमनोहरैः ॥
विचित्रैश्चित्रवर्णैश्च वितानैरुपशोभितम् । सर्वरत्नसमायुक्तं हेमकुट्टिममुज्ज्वलम् ॥
केतकीमालतीजातीचम्पकोत्पलकेसरैः । मल्लिकातुलसीजातीनन्द्यावर्तकदम्बकैः ॥
एतैरन्यैश्च कुसुमैरलङ्कृतमहीतलम् । अम्बुकाश्मीरकस्तूरीमृगनाभितमालकैः ॥
चन्दनागरुकर्पूरैरामोदितदिगन्तरम् । एवं सञ्चिन्त्य मनसा मण्डपं सुमनोहरम् ॥
तन्मध्ये भावयेन्मन्त्री पारिजातं मनोहरम् । तस्याधस्तात्स्मरेन्मन्त्री रत्नसिंहासनं शुभम् ॥
तस्मिन्सञ्चिन्तयेद्देवीं महालक्ष्मीं मनोरमाम् ।

उद्यान-स्मरण—चम्पा, अशोक, पुन्नाग, पाटला से सुशोभित; लौंग, मालती, बेल, देवदारु, नमेरु, मन्दार, पारिजात आदि कल्पवृक्षों से सुशोभित; चन्दन, कर्णिकार, बिजौरा नीबू, वञ्जुल, अनार, बड़हर, अङ्कोल (ढेरा या अकोला), सुपारी, कुरवक, केला, कुन्द, मन्दार, नारियल से अलंकृत; अन्य सुगन्धित पुष्पादि वृक्षों से मण्डित; मालती, मल्लिका, चमेली, केतकी, शतपत्रक (गुलाब), पारन्ती, तुलसी, नन्द्यावर्त, दौना, सभी ऋतुओं में खिलने वाले फूलों से सुशोभित; मन्द-मन्द पवन से झरते हुए फूलों से सभी दिशाओं में सुगन्ध फूट रही है। उन सबके मध्य में सदैव खिलने वाले कमलों, सौगन्धिक कल्हारों, नवीन कुवलयों, हंस, सारस, कारण्ड, भ्रमर, चक्रनाम तथा अन्य पक्षियों के कलरव से सुशोभित एक महान् सरोवर है; उसके मध्य में अत्यन्त मनोहर तट पर चारो ओर से पारिजात एवं मणियों से निर्मित कुटी मण्डप है, जो कि उदित होते हुए सूर्य के समान चमकदार तथा चन्द्रमा के समान शीतल है, जिसमें चार द्वार हैं। स्वर्ण का परकोटा शोभायमान है। रत्नजटित आठ कपाटों से संयुक्त, नवरत्नयुक्त, ऊँचे गोपुर तथा तोरणों से युक्त, स्वर्णदण्डों पर फहराने वाले ध्वजों से युक्त, नवरत्नजटित खम्भों से सुशोभित, सहस्र दीपों से युक्त दीपदण्डों से विराजित, तप्त सुवर्ण से निर्मित मनोहर वातायनों से युक्त, अनेक वर्णों

के अंशुक वस्त्रों से बँधे सैकड़ों सुवर्ण, किङ्किणियों, मल्लिकाओं की पताकाओं से अलंकृत, स्वर्ण-माणिक्य आदि से निर्मित मनोहर वितानों से उपशोभित, समस्त रत्नों से युक्त कुटे हुए सुवर्ण के समान उज्ज्वल केतकी, मालती, नन्द्यावर्त्त-कदम्बक तथा अन्य पुष्पों से जहाँ पृथ्वी मण्डित है, जिसमें कस्तूरी, तमाल, चन्दन, अगरु, कपूर से दिशाएँ आमोदित हैं—ऐसा महालक्ष्मी का मण्डप है; उसमें देवी विराजमान हैं—ऐसा ध्यान करना चाहिये।

अथ ध्यानम्—

बालार्कद्युतिमिन्दुखण्डविलसत्कोटीरहारोज्ज्वलां रत्नाकल्पविभूषितां कुचनतां शालैः करैर्मञ्जरीम्।
पद्मं कौस्तुभरत्नमप्यविरतं सम्बिभ्रतीं सस्मितां फुल्लाम्भोजविलोचनत्रययुतां ध्यायेत्परां देवताम्॥
सिञ्जन्मञ्जीरसंशोभिपदाम्भोजविराजिताम् । नवरत्नगणाकीर्णां काञ्चीदामविभूषिताम्॥
मुक्तामाणिक्यवैदूर्यसम्बद्धोदरबन्धनाम् । बिभ्राजमानां मध्येन बलित्रितयशोभिताम्॥
जाह्नवीसरिदावर्तशोभिनाभिविभूषिताम् । पाटीरपङ्ककर्पूरकुङ्कुमालङ्कृतस्तनीम् ॥
वारिवाहविनिर्मुक्तमुक्तादामगरीयसीम् । वहन्तीमुत्तरासङ्गं दुकूलपरिकल्पिताम्॥
तप्तकाञ्चनसन्नद्धवैदूर्याङ्गदभूषणाम् । पद्मरागस्फुरद्वर्णकङ्कणाढ्यकराम्बुजाम् ॥
माणिक्यशकलाबद्धमुद्रिकाभिरलङ्कृताम् । तप्तहाटकसंक्लृप्तमालग्रैवेयशोभिताम् ॥
विचित्रविविधाकल्पकम्बुसङ्काशकन्धराम् । उद्यद्दिनकराकारमणिताटङ्कमण्डिताम् ॥
रत्नाङ्कितलसत्स्वर्णकर्णपूरोपशोभिताम् । जपाविद्रुमलावण्यललिताधरपल्लवाम् ॥
दाडिमीफलबीजाभदन्तपङ्क्तिविभूषिताम् । कलङ्ककार्श्यनिर्मुक्तशरच्चन्द्रनिभाननाम् ॥
पुण्डरीकदलाकारनयनत्रयसुन्दरीम् । भ्रूलताजितकन्दर्पकरकार्मुकबिभ्रमाम् ॥
विलसत्तिलपुष्पश्रीविजयोद्यतनासिकाम् । ललाटकान्तिविभवविजितार्द्धसुधाकराम् ॥
सान्द्रसौरभसम्पन्नकस्तूरीतिलकाङ्किताम् । मत्तालिमालाविलसदलकाढ्यमुखाम्बुजाम् ॥
पारिजातप्रसूनश्रीवाहिधम्मिल्लबन्धनाम् । अनर्घ्यरत्नघटितमुकुटाङ्कितमस्तकाम् ॥
सर्वलावण्यवसतिं भवनं विभ्रमश्रियः। तेजसां जन्मभूमिं तां महालक्ष्मीं मनोहराम्॥

एवं ध्यात्वा मानसोपचारैः सम्पूज्य पूर्वोक्ते श्रीबीजोदिते पीठे मूलेन मूर्तिं प्रकल्प्यापाद्यादिपुष्पान्तैरुपचारैः सम्पूज्यावरणपूजां कुर्यात्।

महालक्ष्मी का ध्यान—मूल पाठ में लिखित 'बालार्कद्युति' इत्यादि १५ श्लोकों में ध्यान का भावार्थ इस प्रकार है—जिनके सिर पर बने जूड़े (कोटीर) पर बालसूर्य के समान चन्द्रखण्ड तथा हार सुशोभित हैं। जिनके कुच रत्नाभूषणों से नत हैं, शाल जैसे हाथों में मञ्जरी सुशोभित है। कमल, कौस्तुभमणि धारण कर मुस्कराती हुई खिले कमल जैसे तीन नेत्रों वाली परा देवता का ध्यान करना चाहिये। जिनके चरणकमल नूपुरों की झङ्कार से सुशोभित हैं। नवरत्नों से जिनकी करधनी भूषित है। उदरबन्धन में माणिक्य, वैदूर्य आदि बँधे हैं। उदरमध्य में त्रिवलियाँ सुशोभित हैं। जो गङ्गाजी की धार में पड़ने वाले आवर्त्तों की भाँति वाली नाभि से सुशोभित हैं। जिनकी स्तनी (चोली) कमल-केसर-कर्पूर-पङ्क से अलंकृत है, मेघमाला के सदृश मुक्तादाम से भी श्रेष्ठ है। दुकुल परिकल्पित उत्तरीय को धारण किये हैं, जिनकी भुजाओं में तप्त स्वर्ण में वैदूर्य-जटित आभूषण हैं। जिनके करकमलों में लाल माणिक्य के समान वर्ण के कङ्कण चमक रहे हैं। माणिक्य के टुकड़ों से जड़ी अङ्गूठियाँ पहिने हैं। तप्त सुवर्ण से निर्मित कण्ठीमाला शोभित है। शङ्ख के समान विचित्र ग्रीवा है। उगते हुए सूर्य के समान

मणिताटङ्क (कान की बाली) शोभित हैं; रत्नाङ्कित, स्वर्ण के कर्णपूरों से सुशोभित हैं। जिनके अधर गुड़हल, मूँगा के समान हैं; अनारदाना के समान जिनकी दन्तपंक्ति है। जिनका आनन्द निर्मल पूर्ण चन्द्रमा के समान है। जो कमल पत्राकार तीन नेत्रों वाली सुन्दरी हैं। जिनकी भौंहें कामदेव के धनुष के समान हैं। जिनकी नाक तिलपुष्प के समान शोभित है। जिनके ललाट की कान्ति अर्धचन्द्र के कारण विभवयुक्त है। जिस ललाट पर सान्द्र सौरभ से सम्पन्न कस्तूरी का तिलक है। मुखकमल पर मतवाले भौंरों की माला विराजमान है। पीछे की चोटी (जूड़े) में पारिजातपुष्पों का बन्धन है। मस्तक पर बहुमूल्य रत्नों का मुकुट है। इस प्रकार सम्पूर्ण सौन्दर्य से युक्त मनोहर महालक्ष्मी सभी तेजसों की जन्मभूमि हैं—इस भाव से महालक्ष्मी का ध्यान करे। पूजा करके पूर्वोक्त श्री बीज में कथित पीठ पर मूल मन्त्र (द्वादशाक्षरी) लक्ष्मीमन्त्र से महालक्ष्मी की मूर्ति रखकर या कल्पित करके पाद्यादि पुष्पान्त उपचारों से पूजन कर फिर आवरण-पूजा करे।

तद्यथा (लक्ष्म्या दक्षभागे) ॐ शङ्करनन्दनाय नमः ॥ १ ॥ (वामभागे) ॐ पुष्पधन्वने नमः ॥ २ ॥ ततः षड्दले (पूज्यपूजकयोर्मध्ये प्राचीं प्रकल्प्य) आग्नेयादिकोणकेसरेषु मध्ये दिक्षु च ॐ ऐं ज्ञानाय नमः हृदयाय नमः ॥ १ ॥ ॐ ह्रीं ऐश्वर्याय नमः शिरसे स्वाहा ॥ २ ॥ ॐ श्रीं शक्त्यै नमः शिखायै वषट् ॥ ३ ॥ ॐ क्लीं बलाय नमः कवचाय हुं ॥ ४ ॥ ॐ सौं वीर्याय नमः नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ जगत्प्रसूत्यै नमः अस्त्राय फट् ॥ ६ ॥ इति षडङ्गानि पूजयेत्।

ततोऽष्टदलेषु पूर्वादिक्रमेण—ॐ उमायै नमः ॥ १ ॥ ॐ श्रियै नमः ॥ २ ॥ ॐ सरस्वत्यै नमः ॥ ३ ॥ ॐ दुर्गायै नमः ॥ ४ ॥ ॐ धरिण्यै नमः ॥ ५ ॥ ॐ गायत्र्यै नमः ॥ ६ ॥ ॐ देव्यै नमः ॥ ७ ॥ ॐ उषायै नमः ॥ ८ ॥ इति पूजयेत्। (दक्षिणे) ॐ जाह्नव्यै नमः ॥ १ ॥ (वामे) ॐ यमुनायै नमः ॥ २ ॥ इति सम्पूज्य (पुनर्दक्षिणपार्श्वे) ॐ शङ्खनिधये नमः ॥ १ ॥ (वामपार्श्वे) ॐ पद्मनिधये नमः ॥ २ ॥ (पश्चिमे) ॐ वरुणाय नमः ॥ ३ ॥ इति पूजयेत्।

तद्बहिर्द्वादशदलेषु पूर्वादिक्रमेण—ॐ मेषाय नमः ॥ १ ॥ ॐ वृषाय नमः ॥ २ ॥ ॐ मिथुनाय नमः ॥ ३ ॥ ॐ कर्काय नमः ॥ ४ ॥ ॐ सिंहाय नमः ॥ ५ ॥ ॐ कन्यायै नमः ॥ ६ ॥ ॐ तुलायै नमः ॥ ७ ॥ ॐ वृश्चिकाय नमः ॥ ८ ॥ ॐ धनुषे नमः ॥ ९ ॥ ॐ मकराय नमः ॥ १० ॥ ॐ कुम्भाय नमः ॥ ११ ॥ ॐ मीनाय नमः ॥ १२ ॥ इति राशीन् पूजयेत्।

तद्बहिः—ॐ सूर्याय नमः ॥ १ ॥ ॐ चन्द्रमसे नमः ॥ २ ॥ ॐ मङ्गलाय नमः ॥ ३ ॥ ॐ बुधाय नमः ॥ ४ ॥ ॐ बृहस्पतये नमः ॥ ५ ॥ ॐ शुक्राय नमः ॥ ६ ॥ ॐ शनैश्चराय नमः ॥ ७ ॥ ॐ राहवे नमः ॥ ८ ॥ ॐ केतवे नमः ॥ ९ ॥ इति ग्रहान् पूजयेत्।

तद्बाह्ये—ॐ ऐरावताय नमः ॥ १ ॥ ॐ पुण्डरीकाय नमः ॥ २ ॥ ॐ वामनाय नमः ॥ ३ ॥ ॐ कुमुदाय नमः ॥ ४ ॥ ॐ अञ्जनाय नमः ॥ ५ ॥ ॐ पुष्पदन्ताय नमः ॥ ६ ॥ ॐ सार्वभौमाय नमः ॥ ७ ॥ ॐ सुप्रतीकाय नमः ॥ ८ ॥ इत्यष्टौ दिग्गजान्पूजयेत्।

तद्बहिः भूपुरे पूर्वादिदिक्षु—ॐ इन्द्राय नमः ॥ १ ॥ ॐ अग्नये नमः ॥ २ ॥ ॐ यमाय नमः ॥ ३ ॥ ॐ निर्ऋतये नमः ॥ ४ ॥ ॐ वरुणाय नमः ॥ ५ ॥ ॐ वायवे नमः ॥ ६ ॥ ॐ कुबेराय नमः ॥ ७ ॥ ॐ ईशानाय नमः ॥ ८ ॥ (ऊर्ध्वम्) ॐ ब्रह्मणे नमः ॥ ९ ॥ (अधः) ॐ अनन्ताय नमः ॥ १० ॥ इति दशदिक्पालान् पूजयेत्।

तद्बाह्ये—ॐ वज्राय नमः ॥ १ ॥ ॐ शक्तये नमः ॥ २ ॥ ॐ दण्डाय नमः ॥ ३ ॥ ॐ खड्गाय नमः ॥ ४ ॥ ॐ पाशाय नमः ॥ ५ ॥ ॐ अङ्कुशाय नमः ॥ ६ ॥ ॐ गदायै नमः ॥ ७ ॥ ॐ त्रिशूलाय नमः ॥ ८ ॥ ॐ पद्माय नमः ॥ ९ ॥ ॐ चक्राय नमः ॥ १० ॥ इत्यायुधानि पूजयेत्। एवं सप्तावरणपूजां कृत्वा धूपदीपनैवेद्यताम्बूलदक्षिणादिभिर्भगवतीं सम्पूज्य नीराजनं कृत्वा साष्टाङ्गं प्रणम्य स्तोत्रैः स्तुत्वा जपं कुर्यात्। अस्य पुरश्चरणं द्वादशलक्षजपः। जपान्ते दशांशेन घृतपद्मबिल्वफलैर्होमं कृत्वा तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनानि कुर्यात्।

आवरणपूजा—महालक्ष्मी यन्त्र के आवरण की पूजा इस प्रकार करे। लक्ष्मी के दक्षिण भाग में 'ॐ शङ्कराय नमः' कहकर पूजन करे। फिर वामभाग में मूल पाठ में लिखित 'ॐ पुष्पधन्वने नमः' से पूजा करे। फिर यन्त्र के षड्दल कमल में (पूज्य-पूजक के मध्य में प्राची की कल्पना करके) मूलोक्त 'ॐ ऐं ज्ञानाय हृदयाय नमः' इत्यादि छः मन्त्रों से अग्निकोण से आरम्भ कर फिर मध्य में तथा दिशाओं में षडङ्गों की पूजा करे। फिर उसके बाहर अष्टदल में पूर्वादि क्रम से मूलोक्त 'ॐ उमायै नमः' इत्यादि आठ मन्त्रों से निर्देशानुसार पूजा करे। फिर दक्षिण में 'ॐ जाह्नव्यै नमः' तथा वामभाग में 'ॐ यमुनायै नमः' कहकर पूजे। पुनः दक्षिण पार्श्व में 'ॐ शङ्खनिधये नमः' तथा वामपार्श्व में 'ॐ पद्मनिधये नमः' कहकर पूजे। पश्चिम में 'ॐ वरुणाय नमः' कहकर पूजना चाहिये। फिर उसके बाहर बारह दलों में क्रमशः पूर्वादि क्रम से 'ॐ मेषाय नमः, ॐ वृषाय नमः, ॐ मिथुनाय नमः, ॐ कर्काय नमः' इस क्रम से चारो दिशाओं में राशियों की पूजा करे। फिर 'ॐ सिंहाय नमः, ॐ कन्यायै नमः, ॐ तुलायै नमः' तथा 'ॐ वृश्चिकायै नमः' इन मन्त्रों से प्रदक्षिणक्रम से पुनः पूर्वादि दिशाओं में पूजा करे। फिर तीसरी आवृत्ति में 'ॐ धनुषे नमः, ॐ मकराय नमः, ॐ कुम्भाय नमः' तथा 'ॐ मीनाय नमः' इन शेष चार राशियों की पूजा पूर्वादिक्रम से करे (चारो राशियों की दिशायें राशियों में इसी क्रम से मान्य हैं)। फिर उसके बाहर 'ॐ सूर्याय नमः' इत्यादि मूलोक्त नौ मन्त्रों से नवग्रहों की पूजा करे। फिर उनके बाहर पूर्व से (दिशाओं विदिशाओं में) प्रदक्षिणक्रम से 'ॐ ऐरावताय नमः, ॐ पुण्डरीकाय नमः, ॐ वामनाय नमः, ॐ कुमुदाय नमः, ॐ अञ्जनाय नमः, ॐ पुष्पदन्ताय नमः, ॐ सार्वभौमाय नमः, ॐ सुप्रतीकाय नमः' इन आठ दिशाओं की पूजा करे। फिर उसके बाहर भूपुर में पूर्वादि आठ दिशाओं में 'ॐ इन्द्राय नमः, ॐ अग्नये नमः, ॐ यमाय नमः, ॐ निर्ऋतये नमः, ॐ वरुणाय नमः, ॐ वायवे नमः, ॐ कुबेराय नमः, ॐ ईशानाय नमः' कहकर पूजन करे। फिर ऊर्ध्व में 'ॐ ब्रह्मणे नमः' तथा अधः में 'ॐ अनन्ताय नमः' कहकर पूजन करे। ये दश दिक्पाल हैं। इन दिक्पालों के बाहर 'ॐ वज्राय नमः, ॐ शक्तये नमः, ॐ दण्डाय नमः, ॐ खड्गाय नमः, ॐ पाशाय नमः, ॐ अङ्कुशाय नमः, ॐ गदायै नमः, ॐ त्रिशूलाय नमः, ॐ पद्माय नमः' तथा 'ॐ चक्राय नमः' इन मन्त्रों से उन दश दिक्पालों के आयुधों का पूजन करे। इस प्रकार यन्त्र के सातों आवरणों की पूजा करके धूप, दीप, नैवेद्य, ताम्बूल एवं दक्षिणा द्वारा भगवती महालक्ष्मी का पूजन कर आरती करके साष्टाङ्ग प्रणाम कर उनके स्तोत्र (आगे दिये गये हैं) का पाठ कर मन्त्रजप करे। बारह लाख मन्त्रजप से इसका पुरश्चरण सम्पन्न होता है। जप के अन्त में जप का दशांश होम घी, कमल, बेलफल से करे। उसका दशांश तर्पण, फिर उसका दशांश मार्जन तथा उसका दशांश ब्राह्मणभोजन कराये।

तथा च शारदातिलके—

एवं सञ्चिन्त्य यो देवीं हविष्याशी जितेन्द्रियः। भानुलक्षं जपेन्मन्त्रं दशांशं जुहुयाद्घृतैः॥
जुहुयाच्छ्रीफलैः पद्मैः प्रत्येकमयुतं ततः। तर्पयेत्सलिलैः शुद्धैः सुगन्धिरयुतद्वयम्॥
आगमोक्तेन विधिना सुगन्धैः सुमनोहरैः। पूजयेद्गन्धपुष्पाद्यैर्देवीमन्वहमादरात् ॥
दूर्वाभिराज्यसिक्ताभिर्जुहुयादायुषे नरः। दशरात्रे समिद्धेऽग्नौ अष्टोत्तरसहस्रकम्॥
गुडूचीमाज्यसंसिक्तां जुहुयात्सप्तवासरम्। अष्टोत्तरसहस्रं यः स जीवेच्छरदां शतम्॥
हुत्वा तिलान्घृताभ्यक्तान्दीर्घमायुरवाप्नुयात्। आरभ्यार्कदिनं मन्त्री दशरात्रं दिने-दिने॥
आज्याक्तार्कसमिद्धोमादारोग्यं लभते ध्रुवम्। कण्ठमात्रोदके स्थित्वा ध्यात्वा देवीं दिवाकरे॥
ऊर्ध्वबाहुर्दशशतमष्टोत्तरमिमं हुनेत्। आरोग्यं लभते सद्यो वाञ्छितान्यपि मन्त्रवित्॥

शालिभिर्जुह्वतो नित्यमष्टोत्तरसहस्रकम्। अचिरादेव महती लक्ष्मीः सञ्जायते ध्रुवम्॥
प्रसूनैर्जुहुयान्मन्त्री लक्ष्मीवल्लीसमुद्भवैः। नन्द्यावर्तसमुत्थैश्च सिद्धार्थैश्च घृतप्लुतैः॥
महतीं श्रियमाप्नोति मान्यते सर्वजन्तुभिः। मरीचजीरकोन्मिश्रैर्नारिकेलरजःप्लुतैः ॥
सगुडैराज्यसम्पक्वैरपूपैराज्यलोलितैः । जुहुयात्पयआहारो मन्त्रविद्विजितेन्द्रियः॥
अष्टोत्तरशतं नित्यं मण्डलाद्धनदो भवेत्। हविषा गुडमिश्रेण जुहुयादर्थवान्भवेत्॥
जपापुष्पाणि जुहुयादष्टोत्तरसहस्रकम्। गृहीत्वा प्रजपेद्भस्म नागवल्लीसमन्वितम्॥
तिलकं तनुयात्तेन सर्ववश्यकरं भवेत्। ब्रह्मवृक्षसमित्पुष्पैर्ब्राह्मणान्वशयेद्वशी ॥
जातीपुष्पैश्च राजानं वैश्यान् रक्तोत्पलैः शुभैः। शूद्रान्नीलोत्पलैर्हुत्वा वशयेन्मन्त्रविन्नरः॥
पुष्पैर्मधूकजैर्हुत्वा वशमानयति स्त्रियः।

शारदातिलक के अनुसार द्वादशाक्षर मन्त्र के पुरश्चरण का फल—इस प्रकार से जो साधक हविष्यान्न का भोजन कर जितेन्द्रिय रहते हुए देवी का पूजन एवं ध्यान करके बारह लाख जप द्वादशाक्षर मन्त्र का करता है, वह उसका दशांश (एक लाख बीस सहस्र) संख्या में घृत से आप्लावित कर होम करे एवं दस सहस्र श्रीफल (नारियल) का होम करे। फिर दश सहस्र कमलपुष्प या कमलगट्टा से हवन करे। शुद्ध सुगन्धियुक्त जल से दो अयुत (बीस सहस्र) तर्पण करे। आगमोक्त विधि से विविध प्रकार की मनोहर सुगन्ध तथा गन्ध-पुष्पादि से श्रद्धापूर्वक देवी का पूजन करे। आयु की प्राप्ति के लिये घृत में डुबोकर दूर्वा का हवन करना चाहिये। दश रात्रियों में समिधा की अग्नि में एक सहस्र आठ होम करे। जो सात दिनों तक गिलोय के टुकड़ों को घृत से सींचकर १००८ हवन करता है, वह सौ वर्षों तक जीवित रहता है। जो घृताभ्यक्त काले तिलों का रविवार से आरम्भ कर द्वादशाक्षर मन्त्र से (लक्ष्मी मन्त्र से) दश दिनों तक होम करता है, उसे दीर्घायु प्राप्त होती है। जो घृताक्त आक की समिधाओं से महालक्ष्मी मन्त्र से आहुतियाँ देता है, उसे शीघ्र आरोग्य की प्राप्ति होती है। जो कण्ठ-पर्यन्त जल में स्थित होकर सूर्य में देवी का ध्यान करके आक की समिधाओं से होम करता है, वह साधक शीघ्र ही आरोग्य तथा वाञ्छित अर्थ प्राप्त करता है। जो साधक शालि चावलों से नित्य अष्टोत्तर सहस्र (१००८) हवन करता है, उसको शीघ्र ही विपुल लक्ष्मी प्राप्त हो जाती है। जो साधक लक्ष्मीवल्ली (लवङ्गलता के फूल=लौंग) के फूलों से, नन्द्यावर्त्त के फूलों से तथा सफेद सरसों को घृत में सानकर हवन करता है, उसे बहुत लक्ष्मी प्राप्त होती है तथा वह सभी जन्तुओं से मानित होता है अर्थात् उसे कोई भी प्राणी पीड़ा नहीं देता है। काली मिर्च, जीरा, नारियल का चूरा, गुड़—इनको मिलाकर घी में पका ले, फिर घी के साथ इनसे हवन करे। केवल दूध के आहार पर रहे। जितेन्द्रिय रहकर साधक नित्य चालीस दिन तक महालक्ष्मी मन्त्र से हवन करे तो धनवान हो जाता है। यदि ऐसा साधक गुड़ एवं हवि-मिश्रित हवन करे तो भी धनवान हो जाता है। जवाकुसुम से एक सहस्र आठ (१००८) हवन करे तथा उसका भस्म लगाकर महालक्ष्मी मन्त्र का जप करे एवं उसी भस्म को पान के रस में घोंटकर तिलक लगाये तो वह साधक सबको वश में कर लेता है। यदि महालक्ष्मी मन्त्र से पलाश की समिधा एवं पुष्पों से (घृताक्त करके) होम किया जाय तो साधक ब्राह्मणों को वश में कर लेता है। चमेली के पुष्पों का होम राजाओं को तथा लालकमल के फूलों के होम से वैश्यों को वश में कर लेता है। नीलकमल के होम से शूद्र वश में हो जाते हैं। महुआ के फूलों से होम करने पर स्त्रियाँ वश में हो जाती हैं।

होम किया जाय तो साधक ब्राह्मणों को वश में कर लेता है। चमेली के पुष्पों का होम राजाओं को तथा लालकमल के फूलों के होम से वैश्यों को वश में कर लेता है। नीलकमल के होम से शूद्र वश में हो जाते हैं। महुआ के फूलों से होम करने पर स्त्रियाँ वश में हो जाती हैं।

कृत्वा नवपदात्मानं मण्डलं यन्त्रभूषितम्॥
अभिषेकं प्रकुर्वीत विधिना सर्वसिद्धये। कलशान् स्थापयेत्तेषु पदेषु शुभलक्षणान्॥
चन्दनालिप्तसर्वाङ्गान् दूर्वाशतसमन्वितान्। दुकूलवेष्टितानेतान् पूरयेत्तीर्थवारिणा॥
नवरत्नसमाबद्धं कर्षकाञ्चनकल्पितम्। मध्यकुम्भे क्षिपेत्पद्मं यन्त्राढ्यं देशकोत्तमः॥
चन्दनोशीरकर्पूरजातीकं कोलकुङ्कुमम्। कुष्ठागरुतमालैलायुतं सम्पिष्य भागतः॥
विलोड्य सर्वकुम्भेषु रत्नान्यपि विनिक्षिपेत्। लक्ष्मीदूर्वासहाभद्रासहदेवीमधुव्रताः॥
मुशलीं शक्रवल्लीं च क्रान्तापामार्गपत्रकान्। प्रियङ्गुमुद्गगोधूमव्रीहींश्च सतिलान्यवान्॥
शालितण्डुलमाषांश्च प्रक्षाल्यैतेषु निक्षिपेत्। धात्रीलकुचबिल्वानां कदलीनारिकेलयोः॥
फलान्यपि विनिक्षिप्य पुष्पाण्येतानि निक्षिपेत्। पद्मसौगन्धिकं जातिं मल्लिकां बकुलं तथा॥
चम्पकाशोकपुन्नागतुलसीकेतकोद्भवम्। पल्लवानि वटाश्वत्थप्लक्षोदुम्बरशाखिनाम्॥
ब्रह्मकूर्चं विनिक्षिप्य चषकैः सुफलान्वितैः। पिधाय कुम्भवक्त्राणि क्षौमैराच्छादयेत्ततः॥
आवाह्य कलशमध्ये महालक्ष्मीं प्रपूजयेत्। यजेदुमाद्याः शिष्टेषु कलशेष्वष्टसु क्रमात्॥
गन्धैर्मनोहरैः पुष्पैर्धूपदीपसमन्वितैः। निवेद्य भक्ष्यभोज्यानि तान्स्पृष्ट्वा प्रजपेन्मनुम्॥
त्रिसहस्रं जपस्यान्ते साध्यमानीय संयुतम्। संस्थाप्य स्थण्डिले पीठं तस्मिंस्तं विनिवेशयेत्॥
रम्यैरावरणैर्वस्त्रैरलङ्कृत्य तमादरात्। सुमङ्गलाभिर्नारीभिः क्षिप्तपुष्पाक्षतान्वितम्॥
अर्चितानां द्विजातीनामाशीर्वादपुरःसरम्। नदत्सु पञ्चवाद्येषु मुहूर्ते शोभने सुधीः॥
मध्यस्थं कुम्भमुत्सृज्य महालक्ष्मीमनुस्मरन्। अभिषिञ्चेत्क्रमादन्यैः कलशैरपि देशिकः॥
करेणास्य शिरः स्पृष्ट्वा प्रयुञ्जीताशिषं गुरुः।
भद्रमस्तु शिवं चास्तु महालक्ष्मीः प्रसीदतु॥
रक्षन्तु त्वां सदा देवाः सम्पदः सन्तु सर्वदा।

नवपदमण्डल

१ कलश	२ कलश	३ कलश
८ कलश	महालक्ष्मी ९ कलश	४ कलश
७ कलश	६ कलश	५ कलश

अभिषेक—नव पदों का यन्त्र अपने लिये बनाकर विधिपूर्वक अभिषेक करे तो सभी प्रकार की सफलता मिलती है। उन नौ पदों के मण्डल में शुभ लक्षणों वाले कलशों को स्थापित करे। कलशों की संख्या ९ होगी। उन कलशों के सर्वाङ्ग में चन्दन का लेप हो तथा प्रत्येक कलश में एक सौ दूर्वाङ्कुर हों। उन सभी कलशों में तीर्थ जल भरा होना चाहिये। बीच वाले कुम्भ में यन्त्र तथा कमल डाल दे। चन्दन, उशीर, चमेली, कङ्कोल, कुङ्कुम, कूठ, अगुरु, तमाल, इलायची—इनमें से प्रत्येक समान भाग लेकर पीसकर मिलाकर सभी कलशों में डाल दे। तुलसी, दूर्वा, सहदेवी, भद्रा (कठूमर = कठवर), सहा (माषपर्णी = मखवन = जङ्गली उड़द = मासा), मधुव्रता (मीठा बिजौरा नींबू), मूसली, शक्रवल्ली (इन्द्रायण),

पीपल, पाकर तथा गूलर के पत्ते—इनको डालकर उन कलशों को प्यालों से ढँककर बन्द कर दे तथा अलसी के वस्त्र से उन्हें ढँक दे। महालक्ष्मी का आवाहन मध्य के कलश पर करके उनका पूजन करे। शेष कलशों पर ईशान से उमा आदि आठ शक्तियों का पूजन करे। मनोहर गन्ध, पुष्प, दीप, धूप तथा नैवेद्य भक्ष्य-भोज्य आदि का निवेदन महालक्ष्मी से करके फिर उस कलश का स्पर्श कर महालक्ष्मी मन्त्र का जप करना चाहिये। तीन सहस्र जप की समाप्ति पर साध्य (राज्याभिषेक योग्य व्यक्ति) को स्थण्डिल पीठ (चौकी) पर बिठाकर रमणीय वस्त्रों से आदरपूर्वक अलंकृत कर सुमङ्गली स्त्रियों द्वारा पुष्पादि की वृष्टि कराकर द्विजों की पूजा कर उनसे आशीर्वाद ग्रहण कराये। सुमुहूर्त में इस कार्य को कराते हुए पञ्चवाद्य बजवाये। फिर बीच के प्रधान कलश को उठाकर महालक्ष्मी का स्मरण करता हुआ देशिक (पुरोहित=गुरु=आचार्य) साध्य व्यक्ति का शिर अपने हाथ से स्पर्श कर आशीर्वाद देते हुए कल्याण हो, शिव हो, महालक्ष्मी प्रसन्न हों, देवता तुम्हारी सदैव रक्षा करें तथा सदैव सम्पदा बनी रहे, इस प्रकार सभी कुम्भों के जल से अभिषेक कर दे।

अथोत्थायाभिषिक्तः सन् वाससी परिधाय च॥

यथाविधि समाचम्य दण्डवत्प्रणमेद्गुरुम्। वस्त्रैराभरणैर्धान्यैर्धनैर्गोमहिषादिभिः॥
दासीदासैश्च विधिवत्तोषयेद्देवताधिया। ब्राह्मणान् भोजयेत्पश्चाद्दीनान्धकृपणैः सह॥
महान्तमुत्सवं कुर्याद्भवने बन्धुभिः सह। तदा कृतार्थमात्मानं मन्यते मनुजोत्तमः॥
अभिषिक्तो नरपतिः परान्विजयतेऽचिरात्। पदेच्छुः पदमाप्नोति राजपुत्रो न संशयः॥
अभिषिक्ता सती वन्ध्या सूते पुत्रं महामतिम्। महारोगेषु जातेषु कृत्याद्रोहेषु देशिकः॥
भूतेषु दुर्निमित्तादौ विदध्यादभिषेचनम्। सर्वसम्पत्करं पुंसां सर्वसौभाग्यसिद्धिदम्॥
सर्वरोगप्रशमनं सर्वापद्विनिवारणम्। गर्भरक्षाकरं स्त्रीणां दीर्घायुर्जनकं परम्॥
प्रसूतानामपि स्त्रीणां सूतिकागाररक्षकम्। प्रनष्टपुष्पगर्भाणां पुष्पगर्भाभिरक्षणम्॥
आसन्नशत्रुभीतीनां नाशनं च महीभृताम्। अभिषेकमिमं प्राहुरागमार्थविशारदाः॥
सर्वदुःखप्रशमनं सर्वापद्विनिवारणम्। बहुना किमिहोक्तेन परमस्मान्न विद्यते॥

इति श्रीशारदातिलके महालक्ष्मीमन्त्रपुरश्चरणं समाप्तम्।

अक्षराढ्यानि पत्राणि नोपेक्षेत न लङ्घयेत्। चतुर्दश्यष्टमीपर्वप्रतिपद्ग्रहणेषु च॥
सङ्क्रमेषु च सर्वेषु विद्यां नैव पठेद्द्विजः। व्याख्याने सन्त्यजेन्निद्रामालस्यं जृम्भणं बुधः॥
क्रोधं निष्ठीवनं तद्वन्नीचाङ्गस्पर्शनं तथा। मनुष्यसर्पमार्जारमण्डूकनकुलादयः॥
अन्तरा यदि गच्छेयुस्तदा व्याख्यां परित्यजेत्। निशासु दीपध्वंसेषु पाठं सद्यः परित्यजेत्॥
ज्ञात्वा दोषानिमान्सम्यग्भक्त्या यो भारतीं यजेत्। वाचं सिद्धिमवाप्नोति वाचस्पतिरिवापरः॥

इति शारदातिलके सरस्वतीमन्त्रानुष्ठानप्रयोगः समाप्तः।

कहा भी गया है—बारह लाख का जप करके फिर बारह सहस्र (अथवा एक लाख बीस सहस्र) हवन श्वेत कमल अथवा नागचम्पा के फूलों से करे। इस प्रकार सरस्वती देवी की पूजा करने से साधक साक्षात् वाग्वल्लभ हो जाता है। दशाक्षर मन्त्र-प्रयोग में जो कर्म वर्णित हैं, उनको यहाँ भी करना चाहिये। इस प्रकार कहे गये मन्त्रों को जो साधक दीक्षित होकर संयमित मन से जप करता है, वह भुक्ति एवं मुक्ति का अधिकारी हो जाता है। श्वेत वर्ण के सुगन्धित फूलों से सरस्वती एवं ब्रह्माजी की पूजा करे। दूर्वा, बीजाङ्कुर (जवारे), गजवृक्ष (अमलतास) के फूल, कमल, सिन्दुवार (निर्गुण्डी) के अङ्कुर (कोमल जड़ों)—इनसे नित्य ही सरस्वती की पूजा करनी चाहिये तथा सरस्वती की पूजा में निम्न कार्य त्याज्य हैं—

अमाड़ा, गाजर, बेलफल, कलञ्ज, लहसन, प्याज, तेल, पीना (खली) तथा करञ्जफल—इनको भोजन में त्याग दे। सभी बासी भोज्य तथा पेय त्यागना चाहिये। रात में ताम्बूल-भक्षण, मैथुन त्याग दे तथा दिन में एवं दोनों सन्ध्याओं में शयन न करे। अपवित्र वाणी न बोले। प्रदोषकाल में मौन रहना चाहिये। नग्न स्त्री को न देखे। मासिक धर्म वाली स्त्री के समीप न जाय। न स्त्रियों की निन्दा करे। झूठ न बोले, पुस्तकों को न लाँघे। जिन कागजों पर अक्षर लिखे हों, उनकी उपेक्षा न करे और न उनको लाँघे। ४-८-१५-३०-१ तिथियों एवं ग्रहण के समय में भी विद्या न पढ़े। संक्रान्तियों के संक्रमणकाल में भी विद्या न पढ़े। व्याख्यान कर्म में निद्रा, आलस्य तथा जँभाई को त्याग दे। क्रोध, थूकना, गुप्ताङ्गों एवं कमर से नीचे के अङ्गों का स्पर्श न करे। मनुष्य, सर्प, बिल्ली, मेढक, नकुल यदि व्याख्यान के बीच से निकल जायँ तो व्याख्यान को त्याग दे। रात में दीप बुझ जाने पर पाठ तुरन्त त्याग दे। इन दोषों को जानकर भक्तिपूर्वक जो सरस्वती की पूजा करता है, वह वाणी की सिद्धि को प्राप्त कर साक्षात् ब्रह्माजी की भाँति हो जाता है।

सरस्वतीस्तोत्रम्

अस्य श्रीवाग्वदिनीशारदामन्त्रस्य मार्कण्डेय आश्वलायन ऋषिः। स्त्रग्धरानुष्टुप्छन्दांसि। श्रीसरस्वतीदेवता-श्रीसरस्वतीप्रसादसिद्ध्यर्थे जपे विनियोगः।

अथ ध्यानम्—

शुक्लां ब्रह्मविचारसारपरमामाद्यां जगद्व्यापिनीं वीणापुस्तकधारिणीमभयदां जाड्यान्धकारापहाम्।
हस्ते स्फाटिकमालिकां विदधतीं पद्मासने संस्थितां वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम्॥ १॥

ब्रह्मोवाच—

ह्रींह्रींहृद्यैकविद्ये शशिरुचिकमलाकल्पविस्पष्टशोभे भव्ये भावानुकूले कुमतिवनमहे विश्ववन्द्यांघ्रिपद्मे।
पद्मे पद्मोपविष्टे प्रणतजनमनोमोदसम्पादयित्रि प्रोत्प्लुष्टाज्ञानकूटे हरिनिजदयिते देवि संसारसारे॥ १॥
ऐंऐंऐं इष्टमन्त्रे कमलभवमुखाम्भोजरूपे स्वरूपे रूपारूपप्रकाशे सकलगुणमये निर्गुणे निर्विकारे।
न स्थूले नैव सूक्ष्मेऽप्यविदितविषये नापि विज्ञाततत्त्वे विश्वे विश्वान्तराले सुरवरनमिते निष्कले नित्यशुद्धे॥ २॥
ह्रींह्रींह्रीं जाप्यतुष्टे हिमरुचिमुकुटे वल्लकीव्यग्रहस्ते मातर्मातर्नमस्ते दहदह जडतां देहि बुद्धिं प्रशस्ताम्।
विद्ये वेदान्तगीते श्रुतिपरिपठिते मोक्षदे मुक्तिमार्गे मार्गातीतप्रभावे भव मम वरदा शारदे शुभ्रहारे॥ ३॥
धींधींधीं धारणाख्ये धृतिमतिनुतिभिर्नामभिः कीर्त्तनीये नित्येनित्ये निमित्ते मुनिगणनमिते नूतने वै पुराणे।
पुण्ये पुण्यप्रभावे हरिहरनमिते वर्णशुद्धे सुवर्णे मात्रे मात्रार्थतत्त्वे मतिमतिमतिदे माधवप्रीतिनादे॥ ४॥
ह्रीं क्षीं धीं ह्रीं स्वरूपे दहदह दुरितं पुस्तकव्यग्रहस्ते सन्तुष्टाकारचित्ते स्मितमुखि सुभगे जृम्भणिस्तम्भविद्ये।
मोहे मुग्धप्रबोधे मम कुरु सुमतिं ध्वान्तविध्वंसिनित्ये गीर्वाग्गौर्भारति त्वं कविवृषरसनासिद्धिदा सिद्धिसाध्या॥ ५॥

सौंसौंसौं शक्तिबीजे कमलभवमुखाम्भोजभूतस्वरूपे रूपारूपप्रकाशे सकलगुणमये निर्गुणे निर्विकारे।
न स्थूले नैव सूक्ष्मेऽप्यविदितविभवे जाप्यविज्ञानतत्त्वे विश्वे विश्वान्तराले सुरगणनमिते निष्कले नित्यशुद्धे॥ ६॥

सरस्वतीस्तोत्र—स्तोत्रपाठ करने के पूर्व 'अस्य श्रीवाग्वादिनीशारदामन्त्रस्य मार्कण्डेय-आश्वलायन ऋषिः। स्रग्धरानुष्टुप् छन्दांसि। श्रीसरस्वती देवता। श्रीसरस्वतीप्रसादसिद्ध्यर्थे जपे विनियोगः' इस मन्त्र से स्तोत्रपाठ का विनियोग करे। फिर मूल में लिखित 'शुक्लां ब्रह्मविचारसार०' इत्यादि मन्त्र के अनुसार ध्यान करे।

मूल स्तोत्र का भावार्थ—श्री ब्रह्माजी बोले—'ह्रीं ह्रीं हृद्यैकविद्ये!!' आप चन्द्र के समान शुभ्र कान्ति वाली, लक्ष्मी के समान शोभा वाली, भव्य भावानुकूल, कुमतिरूपी वन में सर्प के समान विश्ववन्दित कर-चरण वाली हैं। हे पद्मे! आप कमल पर बैठी हैं, प्रणतजनों के मन को प्रसन्न करने वाली हैं। अज्ञान के समूह को दग्ध करने वाली हैं। आप संसार की सार तथा ब्रह्माजी की निजपुत्री हैं। हे ऐं ऐं ऐं इष्ट मन्त्र वाली, कमल भवमुखाम्भोजरूपे, स्वरूपे, रूपारूपप्रकाशे, सकलगुणमये, निर्गुणे, निर्विकारे! आप न स्थूल हैं न सूक्ष्म हैं, न आप अविदित विषय हैं और न ही आप विज्ञाततत्त्वा हैं। हे विश्वे! आप इस विश्वान्तराल में, देवश्रेष्ठों द्वारा नामित, निष्कल तथा नित्य शुद्ध हैं। हे ह्रीं ह्रीं ह्रीं जाप्यतुष्टे! हिम के समान धवल मुकुट वाली, हाथ में वीणा धारण किये मातर्मते! आपको नमस्कार है। आप मेरी बौद्धिक जड़ता को नष्ट कर प्रशस्त बुद्धि प्रदान करें। हे वेदान्त गायन करने वाली गीते, वेदपरिपठिते, मोक्षदायिनी, मुक्तिमार्गे, मार्गातीतप्रभावे शुभ्रहार वाली शारदे! मुझे वर प्रदान करो॥ ३॥ हे ध्रीं, ध्रीं ध्रीं धारणा नाम वाली, धृतिमति देवि! आप प्रणाम एवं नामों के द्वारा कीर्तनीया हैं, नित्यनित्या, मुनिगणों के नमन-निमित्त से पुरानी होकर भी नूतना हैं। हे पुण्ये, पुण्यप्रभावे, विष्णु एवं शिव से प्रणमित सरस्वति! आप शुद्धवर्ण वाली, सुवर्णमात्रा हैं; आप मात्रार्थतत्त्व भी हैं, मतिमति, मतिदायिनी माधव की प्रसन्नता के लिये नादस्वरूपा हैं। हे ह्रीं, क्ष्रीं, धीं ह्रीं स्वरूप वाली सरस्वति! आप पुस्तक व्यग्र हाथ वाली, सन्तुष्टाकार चित्त वाली, स्मितमुखी, सुभगे! जृम्भणमात्र से विद्या को स्तम्भित कर देने वाली हैं, आप मेरे पापों को जला दें। हे मोहे, मुग्धप्रबोधे! आप मुझे सुमति प्रदान करें। हे ध्वंसविध्वंसि, नित्ये, गीर्वाग्गौ भारति! आप कविश्रेष्ठों की रसना को सिद्धि देने वाली सिद्धिसाध्या हैं। हे सौं सौं सौं शक्तिबीजे, ब्रह्माजी के मुखकमल से उत्पन्न स्वरूप वाली, रूपारूपप्रकाशे, सकलगुणमयी, निर्गुण, निर्विकार, न स्थूल, न सूक्ष्म होने पर भी अविदित विभव वाली, अजा होने पर भी अविज्ञ तत्त्व वाली विश्वे! आप इस विश्वान्तराल में सुरगणों द्वारा नमित, निष्कल तथा शुद्ध हैं॥ १-६॥

स्तौमि त्वां त्वां च वन्दे भज मम रसनां मा कदाचित्त्यजेथा मा मे बुद्धिर्विरुद्धा भवतु न च मनो देवि मे यातु पापम्।
मा मे दुःखं कदाचिद्विपदि च समयेऽप्यस्तु मे नाकुलत्वं शास्त्रे वादे कवित्वे प्रसरतु मम धीर्मास्तु कुण्ठा कदाचित्॥ ७॥
इत्येतैः श्लोकमुख्यैः प्रतिदिनमुषसि स्तौति यो भक्तिनम्रो वाण्या वाचस्पतेरप्यतिमतिविभवो वाक्पटुर्नष्टपङ्कः।
स स्यादिष्टार्थलाभः सुतमिव सततं पाति तं सा च देवी सौभाग्यं तस्य लोके प्रसरति कविता विघ्नमस्तं प्रयाति॥ ८॥
ब्रह्मचारी व्रती मौनी त्रयोदश्यां निरामिषः। सारस्वतो नरः पाठात्स स्यादिष्टार्थलाभवान्॥ ९॥
पक्षद्वयेऽपि यो भक्त्या त्रयोदश्येकविंशतिः। अविच्छेदं पठेद्धीमान्ध्यात्वा देवीं सरस्वतीम्॥ १०॥
शुक्लाम्बरधरां देवीं शुक्लाभरणभूषिताम्। वाञ्छितं फलमाप्नोति स लोके नात्र संशयः॥ ११॥
इति ब्रह्मा स्वयं प्राह सरस्वत्याः स्तवं शुभम्। प्रयत्नेन पठेन्नित्यं सोऽमृतत्वं प्रयच्छति॥ १२॥

इति ब्रह्मपुराणे ब्रह्मणा कृतं सरस्वत्याः स्तोत्रम्।

मैं आपकी स्तुति तथा वन्दना करता हूँ। आप मेरी जीभ पर बैठें, उसे छोड़कर कहीं अन्यत्र न जायँ। मेरी बुद्धि को आप विपरीत न करें। मेरा मन कभी पापों में न जाय। मुझे कभी दुःख एवं विपत्तियाँ प्राप्त न हों। मुझे शास्त्र पढ़ने में, बाद में कभी भी आकुलता न हो। मेरी बुद्धि कवित्व में प्रसरित हो, कभी कुण्ठित न हो। इन मुख्य श्लोकों से जो व्यक्ति प्रतिदिन प्रातःकाल में भक्तिपूर्वक नम्रभाव से सरस्वती की स्तुति करता है, वह ब्रह्माजी के समान वाग्वैभव तथा वाक्पटु होकर पापरहित हो जाता है। उसे इष्टार्थ-लाभ प्राप्त होता है तथा वह देवी उसकी रक्षा पुत्र की भाँति करती हैं, उसे सौभाग्य मिलता है तथा उसकी कविता लोक में प्रसरित होती है, विघ्न समाप्त हो जाते हैं। जो मनुष्य ब्रह्मचारी, व्रती तथा मौनी होकर त्रयोदशी तिथि को निरामिषभोजी होकर इस स्तोत्र को पढ़ता है, उसे इष्टलाभ की प्राप्ति होती है। जो व्यक्ति दोनों पक्षों की त्रयोदशी में भक्तिपूर्वक इसके इक्कीस पाठ अविच्छिन्न रूप में करता है तथा जो शुक्लाम्बरधरा शुक्लाभरणभूषिता का ध्यान करता है, उसे इस लोक में वाञ्छित फल की प्राप्ति होती है। इस प्रकार के इस सरस्वती स्तव को ब्रह्माजी ने स्वयं अपने मुख से कहा है। इसे प्रयत्नपूर्वक नित्य पढ़ने से अमरत्व की प्राप्ति होती है॥ ७-१२॥

अन्नपूर्णामन्त्रप्रयोगः

मन्त्रमहोदधौ—

अन्नपूर्णेश्वरीमन्त्रं वक्ष्येऽभीष्टप्रदायकम्। कुबेरो यामुपास्याशु लब्धवान्निधिनाथताम्॥ १॥
शम्भोः सख्यं दिगीशत्वं कैलासाधीशतामपि।

अथ प्रयोगः; मन्त्रो यथा—'ॐ ह्रीं श्रीं क्लीं नमः भगवति माहेश्वरि अन्नपूर्णे स्वाहा' इति विंशतिवर्णो मन्त्रः। अस्य अन्नपूर्णामन्त्रस्य द्रुहिणः ऋषिः। कृतिः छन्दः। अन्नपूर्णेशी देवता। ह्रीँ बीजम्। स्वाहा शक्तिः। ममाखिलसिद्ध्यर्थे जपे विनियोगः। ॐ द्रुहिणऋषये नमः शिरसि॥ १॥ ॐ कृतिच्छन्दसे नमः मुखे॥ २॥ ॐ अन्नपूर्णादेवतायै नमः हृदि॥ ३॥ ॐ ह्रीं बीजाय नमः गुह्ये॥ ४॥ ॐ स्वाहाशक्तये नमः पादयोः॥ ५॥ इति ऋष्यादिन्यासः। ॐ ह्रां अङ्गुष्ठाभ्यां नमः॥ १॥ ॐ ह्रीं तर्जनीभ्यां नमः॥ २॥ ॐ ह्रुं मध्यमाभ्यां नमः॥ ३॥ ॐ ह्रैं अनामिकाभ्यां नमः॥ ४॥ ॐ ह्रौं कनिष्ठिकाभ्यां नमः॥ ५॥ ॐ ह्रः करतलकरपृष्ठाभ्यां नमः॥ ६॥ इति करन्यासः। एवमेव हृदयादिषडङ्गन्यासं कुर्य्यात्। ॐ नमः मुखे॥ १॥ ॐ ह्रीं नमः दक्षिणनासिकायाम्॥ २॥ ॐ श्रीं नमः वामनासिकायाम्॥ ३॥ ॐ क्रीं नमः दक्षिणनेत्रे॥ ४॥ ॐ नमो नमः वामनेत्रे॥ ५॥ ॐ भगवति नमः दक्षिणकर्णे॥ ६॥ ॐ माहेश्वरि नमः वामकर्णे॥ ७॥ ॐ अन्नपूर्णे नमः लिङ्गे॥ ८॥ ॐ स्वाहा नमः गुदे॥ ९॥ इति मन्त्रन्यासः। एवं न्यासविधिं कृत्वा ध्यायेत्—

तप्तस्वर्णनिभा शशाङ्कमुकुटा रत्नप्रभाभासुरा नानावस्त्रविराजिता त्रिनयना भूमीरमाभ्यां युता।
दर्वीहाटकभाजनं च दधती रम्भोच्चपीनस्तनी नृत्यन्तं शिवमाकलय्य मुदिता ध्येयान्नपूर्णेश्वरी॥

इति ध्यात्वा मानसोपचारैः सम्पूज्य पीठपूजां कुर्यात्। तद्यथा—मण्डूकादिपरतत्त्वान्तपीठदेवताः सम्पूज्य पूर्वादिक्रमेण ॐ जयायै नमः॥ १॥ ॐ विजयायै नमः॥ २॥ ॐ अजितायै नमः॥ ३॥ ॐ अपराजितायै नमः॥ ४॥ ॐ नित्यायै नमः॥ ५॥ ॐ विलासिन्यै नमः॥ ६॥ ॐ दोग्ध्र्यै नमः॥ ७॥ ॐ अघोरायै नमः॥ ८॥ (मध्ये) ॐ मङ्गलायै नमः॥ ९॥ इति पीठशक्तीः पूजयेत्। 'ॐ ह्रीं अन्नपूर्णात्मने नमः' इत्यासनं दत्त्वा मूलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पान्तै-रुपचारैः सम्पूज्य आवरणपूजां कुर्यात्।

श्रीअन्नपूर्णापूजायन्त्रम्



अन्नपूर्णा मन्त्रप्रयोग (मन्त्रमहोदधि के अनुसार)—अब मैं अभीष्ट-प्रदायक अन्नपूर्णेश्वरी मन्त्र को कहता हूँ जिसकी उपासना करने से कुबेर को निधिनाथता प्राप्त हुई थी तथा भगवान् शङ्कर की मित्रता, दिक्पालपद एवं कैलाश का भी अधीश्वरत्व प्राप्त हुआ था। मन्त्र है—'ॐ ह्रीं श्रीं क्लीं नमः भगवति माहेश्वरि अन्नपूर्णे स्वाहा।' यह बीस अक्षरों का मन्त्र है। सर्वप्रथम 'ॐ अस्य श्री अन्नपूर्णामन्त्रस्य द्रुहिणऋषिः। कृतिः छन्दः। अन्नपूर्णेश्वरी देवता। ह्रीं बीजम् स्वाहा शक्तिः। ममाखिलसिद्ध्यर्थे जपे विनियोगः' इसको कहकर मन्त्र का विनियोग करे। तदनन्तर 'ॐ द्रुहिणऋषये नमः शिरसि' इत्यादि मूल में लिखित पाँच मन्त्रों से ऋष्यादि न्यास करे। फिर प्रणवपूर्वक मूल में लिखित छः मन्त्रों 'ॐ ह्रां अङ्गुष्ठाभ्यां नमः' इत्यादि से करन्यास करे। फिर 'ॐ ह्रां हृदयाय नमः, ॐ ह्रीं शिरसे स्वाहा, ॐ ह्रूं शिखायै वषट्, ॐ ह्रैं कवचाय हुम्, ॐ ह्रौं नेत्रत्रयाय वौषट्, ॐ ह्रः अस्त्राय फट्' इन छः मन्त्रों से हृदयादि षडङ्गन्यास करे। फिर मूलोक्त 'ॐ नमः मुखे' इत्यादि नौ मन्त्रों से शरीर के निर्दिष्ट अङ्गों में मन्त्रन्यास करना चाहिये। मूलोक्त 'तप्तस्वर्णनिभा०' इत्यादि मन्त्र से अन्नपूर्णा का ध्यान करे। ध्यान का भावार्थ इस प्रकार है—तपे हुए सोने के समान चन्द्रमा का मुकुट धारण किये रत्नों की कान्ति से चमकयुक्त अनेक वस्त्रों से सुशोभित, त्रिनेत्र, भूमि तथा रमा (लक्ष्मी) से युक्त, दक्षिण हस्त में दर्वी—चमचा तथा वामहस्त में सोने का कटोरा धारण किये, केला के समान ऊँची, पुष्ट स्तनों वाली, नाचते हुए शिव को देखकर मुदित हो रही अन्नपूर्णा का ध्यान करे। इस प्रकार ध्यान करके मानसोपचारों से पूजा करके फिर पीठपूजा करे। एतदर्थ मण्डूकादि परतत्त्वान्त पीठदेवताओं को पूजकर फिर पूर्वादि क्रम से मूलोक्त 'ॐ जयायै नमः' इत्यादि नौ मन्त्रों से (पूर्व-आग्नेय-दक्षिण-नैर्ऋत्य-

पश्चिम-वायव्य-उत्तर-ईशान तथा मध्य में) पीठशक्तियों को पूजे। फिर 'ॐ ह्रीं अन्नपूर्णात्मने नमः' इस मन्त्र से आसन देकर मूल मन्त्र से मूर्ति की कल्पना करके पाद्य से लेकर पुष्पाञ्जलि-पर्यन्त उपचारों से पूजा करके फिर आवरणपूजा करे।

तद्यथा—'त्रिकोणवेदपत्राष्टपत्रषोडशपत्रके। भूपुरेण युते यन्त्रे प्रदद्यान्माययासनम्'। आग्नेयादिकोणत्रितये क्रमेण 'ॐ ह्रौं नमः शिवाय' इति मन्त्रेण शिवं पूजयेत्॥ १॥ ततो द्वितीयकोणे 'ॐ नमो भगवते वराहरूपाय भूर्भुवः स्वः पतये भूपतित्वं मे देहि दापय स्वाहा' इति त्रयस्त्रिंशद्वर्णात्मकमन्त्रेण वराहं पूजयेत्॥ २॥ तृतीयकोणे 'ॐ नमो नारायणाय' इति माधवं पूजयेत्॥ ३॥ तद्बाह्ये ॐ ह्रां हृदयाय नमः॥ १॥ ॐ ह्रीं शिरसे स्वाहा॥ २॥ ॐ ह्रूं शिखायै वषट्॥ ३॥ ॐ ह्रैं कवचाय हुं॥ ४॥ ॐ ह्रौं नेत्रत्रयाय वौषट्॥ ५॥ ॐ ह्रः अस्त्राय फट्॥ ६॥ इति षडङ्गानि पूजयेत्। ततो देव्या वामे 'ग्लौं अन्नं मह्यन्नं मे देह्यन्नाधिपतये ममान्नं प्रदापय स्वाहा ग्लौं' इति धरां पूजयेत्। ततो दक्षभागे 'श्रीं अन्नं मह्यन्नं मे देह्यन्नाधिपतये ममान्नं प्रदापय स्वाहा श्रीं' इति लक्ष्मीं पूजयेत्॥ २॥ ततश्चतुर्दले पूज्यपूजकयोर्मध्ये प्राचीं प्रकल्प्य प्राच्यादिक्रमेण ॐ परायै नमः॥ १॥ ह्रीं भुवनेश्वर्य्यै नमः॥ २॥ श्रीं कमलायै नमः॥ ३॥ क्लीं सुभगायै नमः॥ ४॥ इति पूजयेत्। तद्बहिरष्टदले प्राच्यादिक्रमेण ॐ ब्राह्म्यै नमः॥ १॥ ॐ माहेश्वर्य्यै नमः॥ २॥ ॐ कौमार्य्यै नमः॥ ३॥ ॐ वैष्णव्यै नमः॥ ४॥ ॐ वाराह्यै नमः॥ ५॥ ॐ इन्द्राण्यै नमः॥ ६॥ ॐ चामुण्डायै नमः॥ ७॥ ॐ महालक्ष्म्यै नमः॥ ८॥ इति पूजयेत्। तद्बाह्ये षोडशदले तेनैव क्रमेण 'नं अमृतायै नमः॥ १॥ मं मानदायै नमः॥ २॥ भं तुष्ट्यै नमः॥ ३॥ गं पुष्ट्यै नमः॥ ४॥ वं प्रीत्यै नमः॥ ५॥ तीं रत्यै नमः॥ ६॥ मां ह्रियै नमः॥ ७॥ हें श्रियै नमः॥ ८॥ श्वं स्वधायै नमः॥ ९॥ रिं स्वाहायै नमः॥ १०॥ अं ज्योत्स्नायै नमः॥ ११॥ भं हैमवत्यै नमः॥ १२॥ पूं छायायै नमः॥ १३॥ णं पूर्णिमायै नमः॥ १४॥ स्वां नित्यायै नमः॥ १५॥ हां अमावास्यायै नमः॥ १६॥' इति पूजयेत्। तद्बहिः पूर्वादिदशदिक्षु इन्द्रादिदशदिक्पालान् तद्बाह्ये वज्राद्यायुधानि च पूजयेत्। इत्यावरणार्चनं कृत्वा धूपदीपनैवेद्याचमनीयताम्बूल-दक्षिणानीराजनैर्भगवतीं मूलेन सम्पूज्य स्तवेन स्तुत्वा जपं कुर्य्यात्। अस्य पुरश्चरणं लक्षजपः। घृतसहितेन चरुणा दशांशहोमः। तद्दशांशेन तर्पणं तद्दशांशेन मार्जनं तद्दशांशेन ब्राह्मणभोजनं च कार्य्यम्।

इत्थं जपादिभिः सिद्धे मन्त्रेऽस्मिन्धनसञ्चयैः। कुबेरसदृशो मन्त्री जायते जनवन्दितः॥

इत्यन्नपूर्णामन्त्रपुरश्चरणं समाप्तम्।

आवरण-पूजा—(यहाँ दिये गये) त्रिकोण, चतुर्दल, अष्टदल तथा षोडश दलात्मक भूपुरयुक्त यन्त्र में आसन देकर आग्नेयादि तीन कोणों में क्रम से 'ॐ ह्रौं नमः शिवाय' इस मन्त्र से शिवजी की पूजा करे। फिर द्वितीय कोण में 'ॐ नमो भगवते वराहरूपाय भूर्भुवः स्वःपतये भूपतित्वं मे देहि दापय स्वाहा' इस मन्त्र से वराह की पूजा करे। फिर तृतीय कोण में 'ॐ नमो नारायणाय' से माधव की पूजा करे। फिर उसके बाहर मूल में लिखित 'ॐ ह्रां हृदयाय नमः' इत्यादि छः मन्त्रों से उनमें निर्दिष्ट षडङ्गों की पूजा करे। फिर देवी के वाम भाग में तथा दक्षिण भाग में क्रमशः 'ग्लौं०' इत्यादि तथा 'श्रीं' इत्यादि मन्त्रों से पूजा करके फिर चतुर्दल में पूज्य-पूजक के मध्य में प्राची दिशा की कल्पना करके पूर्वादिक्रम से 'ॐ परायै नमः' इत्यादि मूलोक्त चार मन्त्रों से पूजा करे। फिर उसके बाहर अष्टदल में मूलोक्त 'ॐ ब्राह्म्यै नमः' इत्यादि आठ मन्त्रों से पूजा करे। फिर उसके बाहर षोडशदल में उसी क्रम से (प्राच्यादि क्रम से) 'नं अमृतायै नमः' इत्यादि सोलह मन्त्रों से पूजा करे। फिर उसके बाहर पूर्वादि दश दिशाओं में प्रदक्षिणक्रम से प्रथम इन्द्र आदि दश दिक्पालों को पूजकर फिर उन्हीं स्थानों में उनके आयुधों की भी पूजा करनी चाहिये। इस प्रकार आवरण का अर्चन करके धूप, दीप, नैवेद्य, आचमनीय, ताम्बूल, दक्षिणा, नीराजन

आदि के द्वारा भगवती अन्नपूर्णा का पूजन उनके मूल मन्त्र (बीस अक्षरी) से करके अन्नपूर्णा स्तोत्र का पाठ करके (जो आगे दिया गया है) मूल मन्त्र (ॐ ह्रीं श्रीं क्लीं नमः भगवति माहेश्वरि अन्नपूर्णे स्वाहा) का जप करे। एक लाख जप करने से इस मन्त्र का पुरश्चरण हो जाता है। घृतसहित खीर के द्वारा इसका दशांश (दस सहस्र) हवन करना चाहिये। उसका दशांश (एक सहस्र) तर्पण करे। फिर उसका दशांश (एक सौ) मार्जन करे। फिर उसका दशांश (दस) ब्राह्मणों को भोजन कराये। इस प्रकार की विधि से जो साधक अन्नपूर्णेश्वरी मन्त्र को सिद्ध कर लेता है तो फिर उसके जप करते रहने से वह साधक (अपने पुरुषार्थ से) कुबेर के समान धन-सम्पत्ति एवं वैभव से सम्पन्न हो जाता है तथा जनता के द्वारा पूजित होता है।

अन्नपूर्णाकवचम्

देव्युवाच—

कथिता अन्नपूर्णाया या या विद्याः सुदुर्लभाः। कृपया कथिताः सर्वाः श्रुताश्चाधिगता मया॥ १॥
साम्प्रतं श्रोतुमिच्छामि कवचं मन्त्रविग्रहम्।

अन्नपूर्णा कवच—देवी ने कहा—आपने मुझसे देवी की दुर्लभ विद्या कही, उसे मैंने सुनी और समझी। अब मैं उनके मन्त्रविग्रहस्वरूप कवच को सुनने की इच्छा करती हूँ॥ १॥

ईश्वर उवाच—

शृणु पार्वति वक्ष्यामि सावधानावधारय॥ २॥
ब्रह्मविद्यास्वरूपं च महदैश्वर्यदायकम्। पठनाद्धारणान्मर्त्यस्त्रैलोक्यैश्वर्यभाग्भवेत् ॥ ३॥
त्रैलोक्यरक्षणस्यास्य कवचस्य ऋषिः शिवः। छन्दो विराट् देवता च अन्नपूर्णासमृद्धिदा॥ ४॥
धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः। ह्रीं नमो भगवत्यन्ते माहेश्वरिपदं ततः॥ ५॥
अन्नपूर्णे ततः स्वाहा चैषा सप्तदशाक्षरी। पातु मामन्नपूर्णा सा या ख्याता भुवनत्रये॥ ६॥
विमायाप्रणवाद्यैषा तथा सप्तदशाक्षरी। या त्वन्नपूर्णा सर्वाङ्गे रत्नकुम्भान्नपात्रदा॥ ७॥
श्रीबीजाद्या तथैवेषा द्विरन्धार्णा तथा मुखम्। प्रणवाद्या भ्रुवौ पातु कण्ठं वाग्बीजपूर्विका॥ ८॥
कामबीजादिका चैषा हृदयं तु महेश्वरी। ऐंश्रीह्रीं च नमोऽन्ते च भगवतिपदं ततः॥ ९॥
माहेश्वरिपदं चान्नपूर्णे स्वाहेति पातु मे। नाभिमेकोनविंशार्णा पायान्माहेश्वरी सदा॥ १०॥
तारं मायारमाकामः षोडशार्णा ततः परम्। शिरःस्था सर्वदा पातु विंशत्यर्णात्मिका परा॥ ११॥
अन्नपूर्णा महाविद्या ह्रीं पातु भुवनेश्वरी। शिरः श्रींह्रीं तथा क्रीं च त्रिपुटा पातु मे गुदम्॥ १२॥
षड्दीर्घभाजा बीजेन षडङ्गानि पुनन्तु माम्। इन्द्रो मां पातु पूर्वे च वह्निकोणेनलोऽवतु॥ १३॥
यमो मां दक्षिणे पातु नैर्ऋत्यां नैर्ऋतिश्च माम्। पश्चिमे वरुणः पातु वायव्यां पवनोऽवतु॥ १४॥
कुबेरश्चोत्तरे पातु ऐशान्यां शङ्करोऽवतु। ऊर्ध्वाधः पातु सततं ब्रह्मानन्तो यथाक्रमात्॥ १५॥
वज्राद्याश्चायुधाः पान्तु दशदिक्षु यथाक्रमात्।

श्री महादेवजी बोले—हे पार्वति! अब मैं कहता हूँ, उसे सावधानी से धारण करे। इस ब्रह्मविद्या का स्वरूप विपुल ऐश्वर्य देने वाला है। इसके पढ़ने तथा समझने से व्यक्ति तीनों लोकों के ऐश्वर्य को प्राप्त कर लेता है। इस

त्रैलोक्यरक्षणकर्त्ता कवच के शिव ऋषि हैं, विराट् छन्द है तथा समृद्धिदा अन्नपूर्णा इसकी देवता हैं। धर्म-अर्थ-काम तथा मोक्ष के हेतु इसका विनियोग कहा गया है। 'ॐ ह्रीं नमः भगवति माहेश्वरि अन्नपूर्णे स्वाहा' इस प्रकार यह सत्रह अक्षरों वाली विद्या (मन्त्र) है। जो अन्नपूर्णा तीनों लोकों में प्रसिद्ध है, वह मेरी रक्षा करें। जो मायाबीज-रहित सप्तदशाक्षरी तथा जिसके आरम्भ में प्रणव (ॐ) है, वह रत्नकुम्भ एवं अन्नपात्र प्रदान करने वाली अन्नपूर्णा मेरी रक्षा करें। जिसके आदि में श्रीबीज है, द्विरन्ध्रवर्ण तथा मुखयुक्त है। प्रणवाद्या मेरी भ्रू की रक्षा करें। वाग्बीज-पूर्विका मेरे कण्ठ की रक्षा करें। वह कामबीजादिका माहेश्वरी हृदय की रक्षा करें। फिर ऐंश्रींह्रीं नमोऽन्त भगवती पद माहेश्वरी पद, तथा अन्नपूर्णे स्वाहा मेरी रक्षा करें। २१ वर्णों वाली माहेश्वरी मेरी सदैव रक्षा करें। तार मायाबीज, लक्ष्मीबीज, कामबीज तथा सोलह वर्णों वाली विद्या मेरी रक्षा करें। मेरे शिर की बीस वर्णों वाली पराविद्या रक्षा करें। अन्नपूर्णा महाविद्या ह्रीं भुवनेश्वरी रक्षा करें। श्रीं, ह्रीं, क्रीं मेरे शिर की तथा त्रिपुटा गुद की रक्षा करें। मेरे छः अङ्गों को षड्दीर्घभाजा बीज से पवित्र करे। इन्द्र पूर्व में मेरी रक्षा करें तथा आग्नेय में अग्नि रक्षा करें। यम दक्षिण में मेरी रक्षा करें तथा नैर्ऋत्य में निर्ऋति मेरी रक्षा करें। पश्चिम में वरुण मेरी रक्षा करें। वायव्य में वायु रक्षा करें। कुबेर उत्तर में रक्षा करें तथा ईशान में श्री शङ्कर रक्षा करें। ऊर्ध्व में ब्रह्मा तथा अधः में अनन्त रक्षा करें। उन इन्द्रादि दिक्पालों के वज्रादि आयुध भी यथाक्रम से पूर्वादि दश दिशाओं में रक्षा करें॥ २-१५॥

इति ते कथितं पुण्यं त्रैलोक्यरक्षणं परम्॥ १६॥
यद्धृत्वा पठनाद्देवा सर्वैश्वर्यमवाप्नुयुः। ब्रह्मा विष्णुश्च रुद्रश्च धारणात्पठनाद्यतः॥ १७॥
सृजत्यवति हन्त्येव कल्पे-कल्पे पृथक्पृथक्। पुष्पाञ्जल्यष्टकं देव्यै मूलेनैव पठेत्ततः॥ १८॥
युगायुतकृतायास्तु पूजायाः फलमाप्नुयात्। वाणी वक्त्रे वसेत्तस्य सत्यं सत्यं न संशयः॥ १९॥
अष्टोत्तरशतं चास्य पुरश्चर्याविधिः स्मृतः। भूर्जे विलिख्य गुटिकां स्वर्णस्थां धारयेद्यदि॥ २०॥
कण्ठे वा दक्षिणे बाहौ सोऽपि पुण्यवतां वरः। ब्रह्मास्त्रादीनि शस्त्राणि सद्गात्र प्राप्य पार्वति।
माल्यानि कुसुमान्येव सुखदानि भवन्ति हि॥ २१॥

इति भैरवतन्त्रेऽन्नपूर्णाकवचं समाप्तम्।

इस प्रकार तुमसे मैंने त्रैलोक्यरक्षक कवच कहा है। जिसको पढ़कर तथा धारण कर देवों ने सभी ऐश्वर्य प्राप्त किये। ब्रह्मा, विष्णु, रुद्र इस कवच के धारण एवं पठन करने से सृष्टि, पालन तथा संहार का कार्य करते हैं। फिर आठ मूल मन्त्रों को पढ़कर पुष्पाञ्जलि देनी चाहिये। इसके पाठ से चारो युगों की पूजा का फल मिलता है। उसके मुख से निकली वाणी निस्सन्देह सत्य होती है। इसका पुरश्चरण एक सौ आठ बार जप का है। यदि भूर्जपत्र पर लिखकर स्वर्णगुटिका (ताबीज या ढुलनियाँ) में कण्ठ या दक्षिण भुजा में धारण करे तो ब्रह्मास्त्र भी उसके शरीर को पीड़ित नहीं करता तथा शस्त्र माला की भाँति सुखदाई होते हैं॥ १६-२१॥

अन्नपूर्णास्तोत्रम्

ॐ नमः कल्याणदे देवि नमः शङ्करवल्लभे। नमो भुक्तिप्रदे देवि अन्नपूर्णे नमोऽस्तु ते॥ १॥
नमो मायागृहीताङ्गि नमः शङ्करवल्लभे। माहेश्वरि नमस्तुभ्यमन्नपूर्णे नमोऽस्तु ते॥ २॥
अन्नपूर्णे हव्यवाहपत्नीरूपे हरप्रिये। कलाकाष्ठास्वरूपे च अन्नपूर्णे नमोऽस्तु ते॥ ३॥
उद्यद्भानुसहस्राभे नयनत्रयभूषिते। चन्द्रचूडे महादेवि अन्नपूर्णे नमोऽस्तु ते॥ ४॥
विचित्रवसने देवि अन्नदानरतेऽनघे। शिवनृत्यकृतामोदे अन्नपूर्णे नमोऽस्तु ते॥ ५॥

षट्कोणपद्ममध्यस्थे षडङ्गयुवतीमये। ब्रह्मण्यादिस्वरूपे च अन्नपूर्णे नमोऽस्तु ते॥ ६॥
देवि चन्द्रकृता पीठे सर्वसाम्राज्यदायिनि। सर्वानन्दकरे देवि अन्नपूर्णे नमोऽस्तु ते॥ ७॥
साधकाभीष्टदे देवि भवदु:खविनाशिनि। कुचभारनते देवि अन्नपूर्णे नमोऽस्तु ते॥ ८॥
इन्द्राद्यर्चितपादाब्जे रुद्रादिरूपधारिणि। सर्वसम्पत्प्रदे देवि अन्नपूर्णे नमोऽस्तु ते॥ ९॥

अन्नपूर्णा स्तोत्र—हे कल्याणदे देवि! आपको नमस्कार है। हे शङ्करवल्लभे! आपको नमस्कार है। हे अन्नपूर्णे! आपको नमस्कार है। मायागृहीताङ्गी शङ्करवल्लभे! आपको नमस्कार है। माहेश्वरि! आपको नमस्कार है। अन्नपूर्णे! आपको नमस्कार है। हे अन्नपूर्णे, अग्नि की पत्नीरूप हरप्रिये! कलाकाष्ठास्वरूपे अन्नपूर्णे! आपको नमस्कार है। हे तीन नेत्रों से शोभित सहस्रों बालसूर्यों की आभा वाली चन्द्रपूर्णे, चन्द्रचूडे महादेवि! आपको नमस्कार है। हे विचित्र वस्त्रधारिणी, अन्नदान में रत, निष्पाप तथा शिव के नृत्य से प्रमुदित होने वाली देवी अन्नपूर्णे! आपको नमस्कार है। हे षट्कोण कमल के मध्य में स्थित षडङ्ग युवतियों से युक्त ब्रह्माणी आदि के स्वरूप वाली अन्नपूर्णे! आपको नमस्कार है। हे चन्द्रकृत पीठ पर विराजमान सर्वसाम्राज्यदायिनी, सर्वानन्दकरी अन्नपूर्णे! आपको नमस्कार है। साधकों को अभीष्ट देने वाली, भवदु:खों का नाश करने वाली, कुचों के भार से नत अन्नपूर्णे देवि! आपको नमस्कार है। हे इन्द्रादि द्वारा अर्चित चरणकमलों वाली रुद्रादि रूपधारिणी, सर्वसम्पत् प्रदे अन्नपूर्णे! आपको नमस्कार है॥ १-९॥

पूजाकाले पठेद्यस्तु स्तोत्रमेतत्समाहितः। तस्य गेहे स्थिरा लक्ष्मीर्जायते नात्र संशयः॥ १०॥
प्रातःकाले पठेद्यस्तु मन्त्रजापपुरःसरम्। तस्यैवान्नसमृद्धिः स्याद्वर्द्धमाना दिनेदिने॥ ११॥
यस्मै कस्मै न दातव्यं न प्रकाश्यं कदाचन। प्रकाशात्सिद्धिहानिः स्यात्तस्माद्यत्नेन गोपयेत्॥ १२॥
इत्यन्नपूर्णास्तोत्रं समाप्तम्।

जो पूजा-समय में समाहित मन से इस स्तोत्र का पाठ करता है, उसके घर में लक्ष्मी स्थिर होकर निवास करती है, इसमें सन्देह नहीं है। जो अन्नपूर्णा के मन्त्र के जप के उपरान्त इस स्तोत्र का नित्य प्रातःकाल पाठ करता है, उसकी अन्नसमृद्धि दिन-प्रतिदिन बढ़ती जाती है। इस स्तोत्र को हर किसी को नहीं देना चाहिये और न ही बताना चाहिये। इसके प्रकट करने से सिद्धि की हानि होती है; अतः इसे गुप्त रखना चाहिये॥ १०-१२॥

गङ्गामन्त्रपुरश्चरणप्रयोगः

मन्त्रमहोदधौ मन्त्रो यथा—'ॐ नमः शिवायै नारायण्यै दशहरायै गङ्गायै स्वाहा' इति विंशतिवर्णात्मको मन्त्रः। 'अस्य श्रीगङ्गामन्त्रस्य वेदव्यास ऋषिः। कृतिश्छन्दः। गङ्गा देवता। ममाभीष्टसिद्ध्यर्थे जपे विनियोगः।' ॐ वेदव्यासऋषये नमः शिरसि॥ १॥ ॐ कृतिच्छन्दसे नमो मुखे॥ २॥ ॐ गङ्गादेवतायै नमः हृदये॥ ३॥ इति ऋष्यादिन्यासः। ॐ नमः अङ्गुष्ठाभ्यां नमः॥ १॥ ॐ शिवायै तर्जनीभ्यां नमः॥ २॥ ॐ नारायण्यै मध्यमाभ्यां नमः॥ ३॥ ॐ दशहरायै अनामिकाभ्यां नमः॥ ४॥ ॐ गङ्गायै कनिष्ठिकाभ्यां नमः॥ ५॥ ॐ स्वाहा करतलकरपृष्ठाभ्यां नमः॥ ६॥ इति करन्यासः। एवमेव हृदयादिषडङ्गन्यासं कृत्वा ध्यायेत्—

उत्फुल्लामलपुण्डरीकरुचिरा कृष्णेशविन्ध्यात्मिका कुम्भेष्टाभयतोयजानि दधती श्वेताम्बरालङ्कृता।
हृष्टास्या शशिशेखराखिलनदीशोणादिभिः सेविता ध्येया पापविनाशिनी मकरगा भागीरथी साधकैः॥
इति ध्यात्वा मानसोपचारैः सम्पूज्य पीठपूजां कुर्यात्।

गङ्गायन्त्रम्



गङ्गामन्त्र पुरश्चरण-प्रयोग—'ॐ नमः शिवायै नारायण्यै दशहरायै गङ्गायै स्वाहा' यह बीस अक्षरों का मन्त्र है। इस गङ्गामन्त्र के वेदव्यास ऋषि हैं। कृति छन्द है। गङ्गा देवता हैं। मेरे अभीष्ट-सिद्धिहेतु किये गये जपार्थ विनयोग है। 'ॐ वेदव्यासऋषये नमः शिरसि, ॐ कृतिच्छन्दसे नमः मुखे तथा ॐ गङ्गादेवतायै नमः हृदये' इन तीन मन्त्रों से ऋष्यादिन्यास करे। फिर मूलोक्त 'ॐ नमः अङ्गुष्ठाभ्यां नमः' इत्यादि छः मन्त्रों से क्रमशः अङ्गूठा, तर्जनी, मध्यमा, अनामिका, कनिष्ठा तथा करतल में न्यास करे। इसी प्रकार हृदयादि षडङ्गन्यास भी करे; जैसे—ॐ नमः हृदयाय नमः, ॐ शिवायै शिरसे स्वाहा, ॐ नारायण्यै शिखायै वषट्, ॐ दशहरायै कवचाय हुम्, ॐ गङ्गायै नेत्रत्रयाय वौषट्, ॐ स्वाहा अस्त्राय फट्। फिर मूल में लिखित 'उत्फुल्लामलपुण्डरीक०' इत्यादि श्लोक से ध्यान करे। ध्यान का भावार्थ है—'खिले हुए निर्मल कमल की भाँति शोभित, कृष्णेशविन्ध्यात्मिका, कुम्भ, इष्टमुद्रा, अभयमुद्रा तथा कमलों को धारण किये, श्वेत वस्त्रों से अलंकृत, प्रसन्नमुख, सम्पूर्ण शोणादि नदियों के द्वारा सेवित, शिवजी की जटाओं में स्थित पापविनाशिनी भागीरथी (गङ्गा) जो कि मकर पर सवार हैं, उनका ध्यान साधकों को करना चाहिये।' ऐसा ध्यान करके मानस पूजा करने के उपरान्त पीठपूजा करे।

ॐ मण्डूकादिपरतत्त्वान्तदेवताभ्यो नमः इति पूर्ववत् पीठदेवताः सम्पूज्य पूर्वादिषु ॐ जयायै नमः॥ १॥ ॐ विजयायै नमः॥ २॥ ॐ अजितायै नमः॥ ३॥ ॐ अपराजितायै नमः॥ ४॥ ॐ नित्यायै नमः॥ ५॥ ॐ विलासिन्यै

नमः ॥ ६ ॥ ॐ दोग्ध्र्यै नमः ॥ ७ ॥ ॐ अघोरायै नमः ॥ ८ ॥ (मध्ये) ॐ मङ्गलायै नमः ॥ ९ ॥ इति पीठशक्तीः पूजयेत्। ततो मूर्तिं प्रकल्प्य आवाहनादिपुष्पान्तैरुपचारैर्गङ्गां सम्पूज्य आवरणपूजां कुर्यात्। षट्कोणे आग्नेयादिकेसरेषु ॐ नमः हृदयाय नमः ॥ १ ॥ ॐ शिवायै शिरसे स्वाहा ॥ २ ॥ ॐ नारायण्यै शिखायै वषट् ॥ ३ ॥ ॐ दशहरायै कवचाय हुं ॥ ४ ॥ ॐ गङ्गायै नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ स्वाहा अस्त्राय फट् ॥ ६ ॥ इति षडङ्गानि पूजयेत्। तद्बहिरष्टदलेषु प्राचीक्रमेण ॐ रुद्राय नमः ॥ १ ॥ ॐ हरये नमः ॥ २ ॥ ॐ विधये नमः ॥ ३ ॥ ॐ सूर्य्याय नमः ॥ ४ ॥ ॐ हिमाचलाय नमः ॥ ५ ॥ ॐ मेनायै नमः ॥ ६ ॥ ॐ भगीरथाय नमः ॥ ७ ॥ ॐ अपांपतये नमः ॥ ८ ॥ इति पूजयेत्। ततो दलाग्रेषु ॐ मीनाय नमः ॥ १ ॥ ॐ कूर्माय नमः ॥ २ ॥ ॐ मण्डूकाय नमः ॥ ३ ॥ ॐ मकराय नमः ॥ ४ ॥ ॐ हंसेभ्यो नमः ॥ ५ ॥ ॐ कारण्डवेभ्यो नमः ॥ ६ ॥ ॐ वकेभ्यो नमः ॥ ७ ॥ ॐ सारसकेभ्यो नमः ॥ ८ ॥ इति पूजयेत्। तद्बाह्ये चतुरस्रे भूपुरे पूर्वादिदशदिक्षु इन्द्रादिदशदिक्पालान् तद्बहिर्वज्राद्यायुधानि च पूजयेत्। एवमावरणपूजां कृत्वा धूपदीपादि-नमस्कारान्तैरुपचारैः सम्पूज्य स्तवेन स्तुत्वा जपं कुर्यात्। अस्य पुरश्चरणं लक्षजपः। तथा च—

लक्षं जपेद्दशांशेन जुहुयात्सघृतैस्तिलैः। एवं संसाधितो मन्त्रोऽभीष्टं यच्छति मन्त्रिणाम् ॥
ज्येष्ठशुक्लदशम्यां तां विशेषेण भजेद्बुधः। दद्याद्दशभ्यो विप्रेभ्यो दशप्रस्थमितांस्तिलान् ॥
जप्त्वा सहस्रं हुत्वा चोपोष्य तत्र विकल्मषः। सर्वभोगसमायुक्तो ज्ञायते मानवो भुवि ॥

इति विंशतिवर्णात्मकश्रीगङ्गामन्त्रप्रयोगः।

पीठपूजा—'ॐ मण्डूकादि परतत्त्वान्तदेवताभ्यो नमः' कहकर पीठपूजा करे। फिर उस पीठ की शक्तियों की पूजा मूल में लिखित 'ॐ जयायै नमः' इत्यादि नौ मन्त्रों से पूर्वादि आठ दिशाओं में तथा मध्य में करना चाहिये। फिर मूर्ति की कल्पना करके आवाहन से लेकर पुष्पाञ्जलि-पर्यन्त पूजा करके श्रीगङ्गायन्त्र के आवरणों की पूजा करे। प्रथम षट्कोण की केसरों में मूलोक्त 'ॐ नमः हृदयाय नमः' इत्यादि छः मन्त्रों से आग्नेयादि क्रम से (यन्त्र के रेखाचित्र के अनुसार) पूजा करे। फिर उसके बाहर के अष्टदल में प्राची क्रम से 'ॐ रुद्राय नमः' इत्यादि आठ मन्त्रों से पूजा करे। फिर उन्हीं आठ दलों के अग्रभागों में मूलोक्त 'ॐ मीनाय नमः' इत्यादि आठ मन्त्रों से उसी क्रम से पूजा करनी चाहिये। फिर उन दलाग्रों के बाहर बने भूपुर में (जो कि चौकोर होता है) पूर्वादि दश दिशाओं में इन्द्रादि दश दिक्पालों की पूजा (इन्द्राय नमः इत्यादि मन्त्रों से) करे तदुपरान्त उन्हीं स्थानों में 'ॐ वज्राय नमः' इत्यादि कहकर उनके आयुधों की भी पूजा करनी चाहिये। इस प्रकार आवरण पूजा कर चुकने के पश्चात् धूप-दीप-नमस्कारान्त उपचारों से पूजा करके गङ्गास्तोत्र से स्तुति करने के उपरान्त जप करना चाहिये। इसका पुरश्चरण एक लाख मन्त्रजप से होता है। कहा भी गया है—जप के दशांश तिल एवं घृत से हवन करे। ऐसा करने से मन्त्र सिद्ध होकर साधक को सफलता देता है। ज्येष्ठ शुक्ल दशमी को इसका जप विशेष रूप से करना चाहिये। दश ब्राह्मणों को दश प्रस्थ (दस किलो) काले तिल का दान करना चाहिये। फिर जपकर होम करने के उपरान्त साधक पापरहित होकर सभी भोगों से युक्त हो जाता है।

दशहरागङ्गास्तोत्रम्

स्कान्दे काशीखण्डे च तत्रादौ स्नानार्चनविधिं विधाय पश्चाज्जलान्तरे स्थित्वा देशकालौ सङ्कीर्त्य 'मम दशविधपाप-प्रणाशनार्थं श्रीभगवतीगङ्गाप्रीत्यर्थं च ज्येष्ठे मासि सिते पक्षे प्रतिपदमारभ्य दशमीपर्यन्तं प्रतिदिनमुत्तरोत्तरवृद्ध्या दशहरास्तोत्रजपमहं करिष्ये' इति सङ्कल्प्य पठेत्।

दशहरा गङ्गा स्तोत्र—सर्वप्रथम स्नान एवं पूजा को समाप्त कर जल के भीतर स्थित होकर देश-काल का संकीर्तन कर 'मम दशविधपापप्रणाशनार्थं श्रीभगवतीगङ्गाप्रीत्यर्थं च ज्येष्ठमासि सिते पक्षे प्रतिपदमारभ्य दशमीपर्यन्तं प्रतिदिनमुत्तरोत्तरवृद्ध्या दशहरास्तोत्रजपमहं करिष्ये' यह सङ्कल्प करके (ज्येष्ठ मास के शुक्लपक्ष की प्रतिपदा से गङ्गादशहरा-पर्यन्त प्रतिदिन) यह स्तोत्रपाठ प्रारम्भ करना चाहिये अथवा मन्त्रसिद्ध्यर्थ अन्य समय में भी करा सकते हैं।

ब्रह्मोवाच—

नमः शिवायै गङ्गायै शिवदायै नमो नमः। नमस्ते विष्णुरूपिण्यै ब्रह्ममूर्त्यै नमो नमः॥ १॥
नमस्ते रुद्ररूपिण्यै शाङ्कर्य्यै ते नमो नमः। सर्वदेवस्वरूपिण्यै नमो भेषजमूर्तये॥ २॥
सर्वस्य सर्वव्याधीनां भिषक्छ्रेष्ठ्यै नमो नमः। स्थाणुजङ्गमसम्भूते विषहन्त्र्यै नमो नमः॥ ३॥
भोगोपभोगदायिन्यै भोगवत्यै नमो नमः। मन्दाकिन्यै नमस्तेऽस्तु स्वर्गदायै नमो नमः॥ ४॥
नमस्त्रैलोक्यभूषायै जगद्धात्र्यै नमो नमः। नमस्त्रिशुक्लसंस्थायै तेजोवत्यै नमो नमः॥ ५॥
नन्दायै लिङ्गधारिण्यै नारायण्यै नमो नमः। नमस्ते विश्वमुख्यायै रेवत्यै ते नमो नमः॥ ६॥
बृहत्यै ते नमस्तुभ्यं लोकधात्र्यै नमो नमः। नमस्ते विश्वमित्रायै नन्दिन्यै ते नमो नमः॥ ७॥
पृथ्व्यै शिवामृतायै च सुवृषायै नमो नमः। शान्तायै च वशिष्ठायै वरदायै नमो नमः॥ ८॥
उस्रायै सुखदोग्ध्र्यै च सञ्जीविन्यै नमो नमः। ब्रह्मिष्ठायै ब्रह्मदायै दुरितघ्न्यै नमो नमः॥ ९॥
प्रणतार्तिप्रभञ्जिन्यै जगन्मात्रे नमोऽस्तु ते। सर्वापत्प्रतिपक्षायै मङ्गलायै नमो नमः॥ १०॥
शरणागतदीनार्तपरित्राणपरायणे। सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते॥ ११॥
निर्लेपायै दुर्गहन्त्र्यै दक्षायै ते नमो नमः। परात्परतरे तुभ्यं नमस्ते मोक्षदे सदा॥ १२॥
गङ्गे ममाग्रतो भूया गङ्गे मे देवि पृष्ठतः। गङ्गे मे पार्श्वयोरेहि त्वयि गङ्गेऽस्तु मे स्थितिः॥ १३॥
आदौ त्वमन्ते मध्ये च सर्वं त्वं गां गते शिवे। त्वमेव मूलप्रकृतिस्त्वं हि नारायणः परः॥ १४॥
गङ्गे त्वं परमात्मा च शिवस्तुभ्यं नमः शिवे।

ब्रह्माजी बोले—शिवा गङ्गा, शिवदा के लिये नमो नमः। विष्णुरूपिणी को नमस्ते। ब्रह्ममूर्ति को नमो नमः। रुद्ररूपिणी को नमस्ते। शाङ्करी को नमो नमः। सर्वदेवस्वरूपिणी को नमस्ते, भेषजमूर्ति को नमो नमः। सबकी सब व्याधियों के लिये भिषक्श्रेष्ठी को नमो नमः। स्थावर-जङ्गम से उत्पन्न विषों की नाशक, आपको नमो नमः। भोगोप-भोगदायिनी तथा भोगवती को नमो नमः। मन्दाकिनी को नमस्ते, स्वर्गदायिनी को नमो नमः। त्रैलोक्यभूषा जगद्धात्री को नमो नमः। त्रिशुक्लसंस्था, तेजोवती को नमो नमः। नन्दा, नारायणी तथा लिङ्गधारिणी को नमो नमः। विश्वमुख्या, रेवती! आपको नमो नमः। हे बृहती, लोकधात्री, विश्वमित्रा, नन्दिनी! आपको नमो नमः। हे पृथ्वी, शिवा, अमृता, सुवृषा, शान्ता, वशिष्ठा, वरदा तुझे नमस्कार है। उस्रा, सुखदा, दोग्ध्री, सञ्जीवनी को नमो नमः। ब्रह्मिष्ठा, ब्रह्मदा, दुरितघ्नी को नमो नमः। प्रणतार्ति प्रभञ्जनी, जगन्माता, सर्वापत्प्रतिपक्षा, मङ्गला को नमो नमः। शरणागत-दीनार्त-परित्राण परायणा, सबकी पीड़ा हरने वाली को नमस्कार है। निर्लेपा, दुर्गहन्त्री, दक्षा, परात्परतरा, मोक्षदा! तुझे सदैव नमस्कार है। हे गङ्गे! आप मेरे पीछे, आगे तथा पार्श्व में रहें। आपमें मेरी स्थिति रहे। आप ही आदि-अन्त-मध्य में सबकी गतिस्वरूपा शिवा हैं। आप ही मूल प्रकृति तथा नारायण हैं। हे गङ्गे! आप ही परमात्मा, शिव तथा शिवा हैं॥ १-१४॥

य इदं पठति स्तोत्रं भक्त्या नित्यं नरोऽपि यः॥ १५॥

शृणुयाच्छ्रद्धया युक्तः कायवाक्चित्तसम्भवैः। दशधा संस्थितैर्दोषैः सर्वैरेव प्रमुच्यते॥ १६॥

सर्वान्कामानवाप्नोति प्रेत्य ब्रह्मणि लीयते। ज्येष्ठमासि सिते पक्षे दशमी हस्तसंयुता॥ १७॥

तस्यां दशम्यामेतच्च स्तोत्रं गङ्गाजले स्थितः। यः पठेद्दशकृत्वस्तु दरिद्रो वापि चाक्षमः।

सोऽपि तत्फलमाप्नोति गङ्गां सम्पूज्य यत्नतः॥ १८॥

अदत्तानामुपादानं हिंसा चैवाविधानतः। परदारोपसेवा च कायिकं त्रिविधं स्मृतम्॥ १९॥

पारुष्यमनृतं चैव पैशून्यं चापि सर्वशः। असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम्॥ २०॥

परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम्। वितथाभिनिवेशश्च मानसं त्रिविधं स्मृतम्॥ २१॥

एतानि दश पापानि हर त्वं मम जाह्नवि। दशपापहरा यस्मात्तस्माद्दशहरा स्मृता॥ २२॥

त्रयस्त्रिंशच्छतं पूर्वान्पितॄनथ पितामहान्। उद्धरत्येव संसारान्मन्त्रेणानेन पूजिता॥ २३॥

जो मनुष्य नित्य भक्तिपूर्वक इस स्तोत्र का पाठ करता है, मन-वाणी-चित्त को एकाग्र कर सुनता है, वह दश प्रकार के पापों एवं सभी पापों से मुक्त हो जाता है। उसकी सभी कामनाएँ पूर्ण होकर मरने पर वह ब्रह्मलीन हो जाता है। ज्येष्ठ शुक्ल दशमी में हस्त नक्षत्र के संयोग में इस स्तोत्र को गंगाजल में स्थित होकर जो दश बार पढ़ता है, वह भले ही दरिद्र एवं अक्षम हो, वह भी गङ्गा को पूजकर उस फल को प्राप्त होता है। अदत्तानामुपादानं, अनावश्यक हिंसा, परदारागमन, कठोरता, मिथ्या वाणी, चुगली, असम्बद्ध प्रलाप, पराए द्रव्य पर मन लगाना, मन से बुरा सोचना, दम्भ—इन (कायिक, वाचिक, मानसिक) दश पापों को हे गङ्गे! हरण करो। आप दश पाप हरण करने वाली होने से दशहरा कही जाती हैं। आप इस मन्त्र से आराधित होकर मेरे पूर्व की ३३०० पीढ़ियों के पूर्वजों का उद्धार कर दें॥ १५-२३॥

ॐ नमो भगवत्यै दशपापहरायै गङ्गायै नारायण्यै रेवत्यै।
शिवायै दक्षायै अमृतायै विश्वरूपिण्यै नन्दिन्यै ते नमो नमः॥ २४॥

सितमकरनिषण्णां शुभ्रवर्णां त्रिनेत्रां करधृतकलशोद्यत्सोत्पलामत्यभीष्टाम्।
विधिहरिहररूपां सेन्दुकोकीरजुष्टां कलितसितदुकूलां जाह्नवीं तां नमामि॥ २५॥

आदावादिपितामहस्य निगमव्यापारपात्रे जलं पश्चात्पन्नगशायिनो भगवतः पादोदकं पावनम्।
भूयः शम्भुजटाविभूषणमणिर्जह्नोर्महर्षेरियं कन्या कल्मषनाशिनी भगवती भागीरथी दृश्यते॥ २६॥

गङ्गागङ्गेति यो ब्रूयाद्योजनानां शतैरपि। मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति॥ २७॥

इति गङ्गास्तोत्रं समाप्तम्।

ॐ भगवती, दशपापहरा, गङ्गा, नारायणी, रेवती, शिवा, दक्षा, अमृता, विश्वरूपिणी नन्दिनी! आपको नमो नमः। श्वेत मगर पर बैठी, शुभ्र वर्ण की, त्रिनेत्रा, हाथ में कलश, कमल, अति अभीष्ट वरमुद्रा-धारिणी ब्रह्मा-विष्णु-रुद्रस्वरूपिणी, चन्द्र-शुकयुक्त, सुन्दर किनारों से युक्त जाह्नवी को प्रणाम करता हूँ। प्रथम पितामह के कमण्डलु से निकलकर फिर विष्णु के चरणों का पादोदक बनकर शम्भु की जटाओं का विभूषण बनी यह जह्नु की श्रेष्ठ कन्या पापनाशिनी, भगवती, भागीरथी दिख रही है। जो सैकड़ों लोगों के साथ मिलकर गङ्गा-गङ्गा कहता है, वह सभी पापों से मुक्त होकर विष्णुलोक को जाता है॥ २४-२७॥

शीतलामन्त्रप्रयोगः

मन्त्रमहोदधौ मन्त्रो यथा—'ॐ ह्रीं श्रीं शीतलायै नमः' इति नवाक्षरो मन्त्रः। अस्य मन्त्रस्य उपमन्युर्ऋषिः। बृहती छन्दः। शीतला देवता। ममाभीष्टसिद्ध्यर्थे जपे विनियोगः। ॐ उपमन्युऋषये नमः शिरसि॥ १॥ ॐ बृहतीछन्दसे नमः मुखे॥ २॥ ॐ शीतलादेवतायै नमः हृदि॥ ३॥ इति ऋष्यादिन्यासः। ह्राँ श्राँ अङ्गुष्ठाभ्यां नमः॥ १॥ ह्रीं श्रीं तर्जनीभ्यां नमः॥ २॥ ह्रूं श्रूं मध्यमाभ्यां नमः॥ ३॥ ह्रैं श्रैं अनामिकाभ्यां नमः॥ ४॥ श्रौं ह्रौं कनिष्ठिकाभ्यां नमः॥ ५॥ ह्रः श्रः करतलकरपृष्ठाभ्यां नमः॥ ६॥ इति करन्यासः। एवं हृदयादिन्यासं कृत्वा ध्यायेत्—

दिग्वाससं मार्जनिकां च शूर्पं करद्वये सन्दधतीं घनाभाम्। श्रीशीतलां सर्वरुजार्तिनष्टौ रक्ताङ्गरागस्त्रजमर्चयामि॥

एवं ध्यात्वा मानसोपचारैः सम्पूज्य अथवा स्वपुरतः प्रतिमायां भगवतीं शीतलां शीतजलेन पाद्यादिषोडशोपचारैः सम्पूज्य स्तवेन स्तुत्वा जपं कुर्यात्। अस्य पुरश्चरणमयुतजपः। तथा च—

अयुतं प्रजपेन्मन्त्रं पायसेन सहस्त्रकम्। जुहुयात्पूर्ववत्पीठे स्फोटानां नाशिनी त्वियम्॥
नाभिमात्रे जले स्थित्वा यः सहस्त्रं जपेन्मनुम्। तेन सम्मार्जितास्तीव्राः स्फोटा नश्यन्ति तत्क्षणात्॥

इति शीतलामन्त्रप्रयोगः।

शीतलामन्त्र-प्रयोग (मन्त्र महोदधि के अनुसार)—'ॐ ह्रीं श्रीं शीतलायै नमः' यह नौ अक्षरों का मन्त्र है। इस मन्त्र के उपमन्यु ऋषि, बृहती छन्द तथा शीतला देवता हैं। अभीष्ट सफलताहेतु इसका जप में विनियोग है। इस भाव को व्यक्त करने वाला मन्त्र मूल से पढ़कर विनियोग का जल छोड़े। फिर मूलोक्त 'ॐ उपमन्युऋषये नमः शिरसि' इत्यादि तीन मन्त्रों से ऋष्यादि न्यास करे। फिर 'ॐ ह्रां श्रां अङ्गुष्ठाभ्यां नमः' इत्यादि छः मन्त्रों से करन्यास करे। फिर हृदयादि न्यास कर ध्यान करे। 'ॐ ह्रां श्रां हृदयाय नमः, ॐ ह्रीं श्रीं शिरसे स्वाहा, ॐ ह्रूं श्रूं शिखायै वषट्, ॐ ह्रैं श्रैं कवचाय हुम, ॐ ह्रौं श्रौं नेत्रत्रयाय वौषट्, ॐ ह्रः श्रः अस्त्राय फट्' इन मन्त्रों से हृदयादि न्यास करे। 'दिगम्बर, अपने दोनों हाथों में मार्जनी तथा शूर्प लिये काले मेघ के समान आभायुक्त शीतला को अपनी सब पीड़ा के नाश-हेतु लाल रङ्ग के अङ्गराग से अर्चित करता हूँ।' ऐसा मूलोक्त ध्यान करके नाभिमात्र जल में खड़े होकर एक सहस्त्र जप करे, उसके मार्जन (झाड़ा) करने से शीतला के तीव्र विस्फोट शीघ्र शान्त हो जाते हैं।

शीतलास्तोत्रम्

ॐ अस्य श्रीशीतलास्तोत्रस्य महादेव ऋषिः। अनुष्टुप् छन्दः। शीतला देवता। लक्ष्मीर्बीजम्। भवानी शक्तिः। सर्वविस्फोटकनिवृत्तये जपे विनियोगः।

शीतला स्तोत्र—मूल में लिखित 'ॐ अस्य श्रीशीतलास्तोत्रस्य०' इत्यादि के द्वारा विनियोग का जल छोड़कर मूल में लिखित स्तोत्र का जप प्रारम्भ करना चाहिये।

ईश्वर उवाच—

वन्देऽहं शीतलां देवीं रासभस्थां दिगम्बराम्। मार्जनीकलशोपेतां शूर्पालङ्कृतमस्तकाम्॥ १॥
वन्देऽहं शीतलां देवीं सर्वरोगभयापहाम्। यामासाद्य निवर्तेत विस्फोटकभयं महत्॥ २॥
शीतले शीतले चेति यो ब्रूयाद्दाहपीडितः। विस्फोटकभयं घोरं क्षिप्रं तस्य प्रणस्यति॥ ३॥
यस्त्वामुदकमध्ये तु धृत्वा पूजयते नरः। विस्फोटकभयं घोरं गृहे तस्य न जायते॥ ४॥
शीतले ज्वरदग्धस्य पूतिगन्धयुतस्य च। प्रनष्टचक्षुषः पुंसस्त्वामाहुर्जीवनौषधम्॥ ५॥
शीतले तनुजात्रोगान्नृणां हरसि दुस्त्यजान्। विस्फोटकविजीर्णानां त्वमेकामृतवर्षिणी॥ ६॥

गलगण्डग्रहा रोगा ये चान्ये दारुणा नृणाम्। त्वदनुध्यानमात्रेण शीतले यान्ति संक्षयम्॥ ७॥
न मन्त्रो नौषधं तस्य पापरोगस्य विद्यते। त्वामेकां शीतले धात्रीं नान्यां पश्यामि देवताम्॥ ८॥

श्री शंकरजी बोले—मैं गधे पर स्थित दिगम्बर शीतला, देवी, जो मार्जनी (बुहारी) तथा कलश अपने हाथों में लिये हैं एवं जिनके माथे पर सूप शोभित है, उनकी वन्दना करता हूँ। मैं सर्वरोग-भय को दूर करने वाली शीतला देवी की वन्दना करता हूँ, जिनके द्वारा विस्फोटकों का महाभय नष्ट हो जाता है। जो दाहपीड़ित व्यक्ति शीतले-शीतले कहता है, उसका विस्फोटकों का घोर भय शीघ्र ही नष्ट हो जाता है। जो आपको जल में स्थित होकर पूजता है, उसके घर में विस्फोटकों का भय नहीं होता है। हे शीतले! आप ज्वर से दग्ध, दुर्गन्धित एवं प्रनष्ट नेत्रों वाले रोगी के लिये जीवनीय औषध कहलाती हो। हे शीतले! आप मनुष्यों के शरीर के कठिन शारीरिक रोगों को हरती हो। विस्फोटकों से विजीर्ण (विदीर्ण) शरीर वालों के लिये आप एकमात्र अमृतवर्षा करने वाली हो। गलगण्ड तथा अन्य जो दारुण रोग हैं, वे सब आपके अनुध्यानमात्र से हे शीतले! संक्षय को प्राप्त हो जाते हैं। उस पापरोग (गलगण्ड-गण्डमाला) की आपके अतिरिक्त अन्य कोई औषधि नहीं है, आप जैसी माता मुझे इस संसार में दिखाई नहीं देती है॥ १-८॥

मृणालतन्तुसदृशीं नाभिहृन्मध्यसंस्थिताम्। यस्त्वां सञ्चिन्तयेद्देवि तस्य मृत्युर्न जायते॥ ९॥
अष्टकं शीतलादेव्या यो नरः प्रपठेत्सदा। विस्फोटकभयं घोरं गृहे तस्य न जायते॥ १०॥
श्रोतव्यं पठितव्यं च श्रद्धाभक्तिसमन्वितैः। उपसर्गविनाशाय परं स्वस्त्ययनं महत्॥ ११॥
शीतले त्वं जगन्माता शीतले त्वं जगत्पिता। शीतले त्वं जगद्धात्री शीतलायै नमो नमः॥ १२॥
रासभो गर्दभश्चैव खरो वैशाखनन्दनः। शीतलावाहनश्चैव दूर्वाकन्दनिकृन्तनः॥ १३॥
एतानि खरनामानि शीतलाग्रे तु यः पठेत्। तस्य गेहे शिशूनां च शीतलारुङ् न जायते॥ १४॥
शीतलाष्टकमेवेदं न देयं यस्य कस्यचित्। दातव्यं च सदा तस्मै श्रद्धाभक्तियुताय वै॥ १५॥

इति श्रीस्कन्दपुराणे शीतलास्तोत्रं सम्पूर्णम्। श्रीशीतलाभगवत्यै नमः।

हे देवि! मृणाल तन्तु के समान आपका ध्यान नाभि एवं हृदय के मध्य में जो करता है, उसकी मृत्यु नहीं होती है। यह शीतलाष्टक जो भी पढ़ता है, उससे स्तोत्रपाठक के घर में घोर विस्फोटकों का भय नहीं होता है। भक्ति एवं श्रद्धा के साथ इसे पढ़ना तथा सुनना चाहिये। यह संक्रामक रोगों के लिये महान् स्वस्त्ययन है। हे शीतले! आप जगन्माता तथा जगत्पिता हो, आप ही जगद्धात्री हो, आपको नमो नमः। रासभ, गर्दभ, खर, वैशाखनन्दन, शीतलावाहन, दूर्वाकन्द-निकृन्तन—ये गधे के (छः) नाम जो शीतला के आगे पढ़ता है, उसके घर में बालकों को शीतला रोग नहीं होता है। यह शीतलाष्टक है, जिसे हर किसी को नहीं देना चाहिये। इसे केवल श्रद्धा-भक्तियुक्त मनुष्य को ही देना चाहिये॥ ९-१५॥

पृथ्वीमन्त्रपुरश्चरणप्रयोगः

शारदातिलके मन्त्रो यथा—'ॐ नमो भगवत्यै धरिण्यै धरणिधरे धरे स्वाहा' इत्येकोनविंशतिवर्णात्मको मन्त्रः। अस्य मन्त्रस्य वराह ऋषिः। निचृच्छन्दः। पृथ्वी देवता। सर्वेष्टसिद्ध्यर्थे जपे विनियोगः। ॐ वराहऋषये नमः शिरसि॥ १॥ ॐ निचृच्छन्दसे नमः मुखे॥ २॥ ॐ पृथ्वीदेवतायै नमः हृदये॥ ३॥ ॐ बीजाय नमः गुह्ये॥ ४॥ ॐ स्वाहाशक्तये नमः पादयोः॥ ५॥ इति ऋष्यादिन्यासः। ॐ नमः हृदयाय नमः॥ १॥ ॐ भगवत्यै शिरसे स्वाहा॥ २॥ ॐ धरिण्यै शिखायै वषट्॥ ३॥ ॐ धरणिधरे कवचाय हुं॥ ४॥ ॐ धरे नेत्रत्रयाय वौषट्॥ ५॥ ॐ स्वाहा अस्त्राय फट्॥ ६॥ एवं षडङ्गन्यासं कृत्वा ध्यायेत्—

श्यामां विचित्रांशुकरत्नभूषणां पद्मासनां तुङ्गपयोधराननाम्।
इन्दीवरे द्वे नवशालिमञ्जरीं शुकं दधानां वसुधां यजामहे॥

इति ध्यात्वा पूर्वोक्ते विष्णोः पीठे भगवतीं पृथ्वीं पुष्पान्तैरुपचारैः सम्पूज्य आवरणपूजां कुर्य्यात्।

तद्यथा—षट्कोणे आग्नेयादिकोणकेसरेषु मध्ये दिक्षु च पूर्ववत् षडङ्गानि पूजयेत्। तद्बहिरष्टदले प्राचीक्रमेण चतुर्दिग्दलेषु ॐ भूम्यै नमः॥ १॥ ॐ अग्नये नमः॥ २॥ ॐ अद्भ्यो नमः॥ ३॥ ॐ वायवे नमः॥ ४॥ इति पूजयेत्। तत आग्नेयादिकोणदलेषु तत्तत्कलां यजेत्। तद्यथा—ॐ निवृत्त्यै नमः॥ १॥ ॐ प्रतिष्ठायै नमः॥ २॥ ॐ विद्यायै नमः॥ ३॥ ॐ शान्त्यै नमः॥ ४॥ ॐ शान्त्यतीतायै नमः॥ ५॥ इति भूम्यादिकलां पूजयेत्। तद्बाह्ये भूपुरे पूर्वादिक्रमेण इन्द्रादिदशदिक्पालान् तद्बाह्ये वज्राद्यायुधानि च पूजयेत्। इत्यावरणपूजां कृत्वा धूपादिनीराजनान्तं सम्पूज्य जपं कुर्यात्। अस्य पुरश्चरणं लक्षजपः।

पृथ्वी मन्त्रपुरश्चरण-प्रयोग—'ॐ नमो भगवत्यै धरिण्यै धरणिधरे धरे स्वाहा' यह उन्नीस अक्षरों वाला मन्त्र है। इसके वराह ऋषि, निचृत् छन्द, पृथ्वी देवता, सर्वेष्ट सिद्ध्यर्थ जप में विनियोग है। इस भाव के मूलोक्त मन्त्र से विनियोग का जल पृथ्वी पर छोड़कर फिर मूलोक्त 'ॐ वराहऋषये नमः शिरसि, ॐ निचृच्छन्दसे नमः मुखे, ॐ पृथ्वीदेवतायै नमः हृदये' इन ५ मन्त्रों से ऋष्यादि न्यास कर फिर मूलोक्त 'ॐ हृदयाय नमः' इत्यादि छः मन्त्रों से षडङ्गन्यास करके फिर 'श्यामां विचित्रांशुक०' इत्यादि श्लोक के अनुसार पृथ्वी का ध्यान करे। फिर पूर्वोक्त विष्णु मन्त्रपीठ पर भगवती पृथ्वी की पुष्पाञ्जलि-पर्यन्त उपचारों से पूजा करके आवरणपूजा करे।

षट्कोण में षडङ्गों को (हृदयादि न्यासोक्त मन्त्रों से) पूजकर उसके बाहर अष्टदल पर पूर्वादि क्रम से चारो दिशाओं के दलों में 'ॐ भूम्यै नमः' इत्यादि चार मन्त्रों से पूजा करे। फिर आग्नेयादि कोणों के दलों में 'ॐ निवृत्त्यै नमः' इत्यादि पाँच मन्त्रों से पूजा करे। फिर बाहर भूपुर में पूर्वादि दश दिशाओं में क्रमशः इन्द्रादि दस दिक्पालों की पूजा कर फिर उन्हीं स्थानों में उनके आयुधों की भी पूजा क्रमशः करनी चाहिये। इस प्रकार यन्त्र की आवरणपूजा करके धूपादि नीराजनान्त पूजा करने के उपरान्त पृथ्वीमन्त्र का जप करना चाहिये। एक लाख की संख्या में इस मन्त्र का जप करने से इसका पुरश्चरण सम्पन्न होता है।

तथा च—

लक्षमेनं जपेन्मन्त्री धराहृदयमादरात्। ससर्पिषा पायसेन जुहुयात्तद्दशांशतः॥
एवं सिद्धे मनौ मन्त्री साधयेत्स्वमनोरथान्। मधुत्रितयसंयुक्तैर्जुहुयादरुणोत्पलैः ॥
सहस्रं भूसमृद्धिः स्यात्तथा नीलोत्पलैर्भवेत्। प्रियङ्गुपुष्पैर्मध्वक्तैर्धनधान्यमहाश्रियः ॥
मञ्जरीशालिसम्भूतां मधुरत्रयलोलिताम्। जुहुयात्साधिते वह्नौ मण्डलात्स्याद्धरापतिः॥
शुक्रवारे दिनमुखे गृहीत्वा साध्यभूमृदम्। तामम्भसि विनिःक्षिप्य शोधितेऽत्र चरुं पचेत्॥
पयोघृताभ्यां सहितं जुहुयात्तं हुताशने। षण्मासं शुक्रवारेषु हुत्वैवं प्राप्नुयाद्धराम्॥
धरामेवं जपेन्मन्त्री पशुरत्नधरादिभिः। धराया वल्लभः स स्यान्नात्र कार्या विचारणा॥

इति पृथ्वीमन्त्रपुरश्चरणं समाप्तम्।

पुरश्चरण का फल—पृथ्वी का हृदय से आदर करते हुए इस मन्त्र का जप करे तथा घृतसहित पायस से उसका दशमांश हवन करे। ऐसा करने से मन्त्र सिद्ध हो जाता है। फिर इस सिद्ध मन्त्र से साधक को अपने मनोरथों को पूर्ण करना चाहिये। लाल कमलों को मधु, घृत एवं दूध के साथ हवन करे तो उसके पास भूसमृद्धि (भूमि, कृषि उत्पादन, पशुधन आदि) सहस्र गुनी हो जाती है। प्रियङ्गु के पुष्पों का मधु के साथ होम करने से धन-धान्य

महाश्री की प्राप्ति होती है। शालिमञ्जरी (धान की बाली) को मधुरत्रय (दूध-घी-मधु) में सानकर होम करने से साधक धरापति होता है। शुक्रवार के दिन प्रातः अभीष्ट खेत की मिट्टी लाकर उसे जल में घोलकर छानकर उससे खीर पकाये; उस खीर का घृत एवं दूध के साथ अग्नि में होम करे। प्रति शुक्रवार को छः मास तक करे तो वह खेत साधक को प्राप्त हो जाते हैं। इस पृथ्वी मन्त्र के जप से भूमि एवं कृषि के साथ समृद्धि प्राप्त होती है।

देवीभागवतोक्तं पृथ्वीस्तोत्रम्

श्रीनारायण उवाच—

जये जये जलाधारे जलशीले जयप्रदे। यज्ञसूकरजाये च जयं देहि जयावहे॥ १॥
मङ्गले मङ्गलाधारे माङ्गल्ये मङ्गलप्रदे। मङ्गलार्थं मङ्गलेशे मङ्गलं देहि मे भवे॥ २॥
सर्वाधारे च सर्वज्ञे सर्वशक्तिसमन्विते। सर्वकामप्रदे देवि सर्वेष्टं देहि मे भवे॥ ३॥
पुण्यस्वरूपे पुण्यानां बीजरूपे सनातनि। पुण्याश्रये पुण्यवतामालये पुण्यदे भवे॥ ४॥
सर्वसस्यालये सर्वसस्याढ्ये सर्वसस्यदे। सर्वसस्यहरे काले सर्वसस्यात्मिके भवे॥ ५॥
भूमे भूमिपसर्वस्वे भूमिपालपरायणे। भूमिपानां सुखकरे भूमिं देहि च भूमिदे॥ ६॥
इदं स्तोत्रं महापुण्यं प्रातरुत्थाय यः पठेत्। कोटिजन्मसु स भवेद्बलवान्भूमिपेश्वरः॥ ७॥
भूमिदानकृतं पुण्यं लभ्यते पठनाज्जनैः। भूमिदानहरात्पापान्मुच्यते नात्र संशयः॥ ८॥
अम्बुवाचीभूकरणपापात्स मुच्यते ध्रुवम्। अन्यकूपे कूपखननपापत्स मुच्यते ध्रुवम्॥ ९॥
परभूमिहरात्पापान्मुच्यते नात्र संशयः। भूमौ वीर्यत्यागपापाद्भूमौ दीपादिस्थापनात्॥ १०॥
पापेन मुच्यते सोऽपि स्तोत्रस्य पठनान्मुने। अश्वमेधशतं पुण्यं लभते नात्र संशयः॥ ११॥
भूमिदेव्या महास्तोत्रं सर्वकल्याणकारकम्॥ १२॥

इति भूमिस्तोत्रम्।

पृथ्वी स्तोत्र—(देवीभागवत में)—श्री नारायण बोले—हे मङ्गले, मङ्गलाधारे, माङ्गल्ये, मङ्गलप्रदे, मङ्गल के लिये मङ्गलेश्वरी देवी पृथ्वी मुझे मङ्गल प्रदान करो। हे जये, अजये, जलाधारे, जलशीले जलप्रदे, यज्ञशूकर की पत्नी, जय देने वाली पृथ्वी मुझे जय प्रदान करो। हे सबकी आधारभूत सर्वज्ञे, सर्वशक्तियों से युक्त, सभी कामनाओं को पूरा करने वाली पृथिवी देवी मेरी सभी कामनाएँ पूरी करो। हे पुण्यदायिनी पृथिवी! आप पुण्यस्वरूपा, पुण्यों की बीजरूपा, सनातनी, पुण्यों का आश्रय तथा पुण्यों का घर हो। आप सभी सस्यों (फसलों) का आलय हो, सभी सस्यों से युक्त हो, सभी सस्यों का समयविशेष पर हरण करके पुनः आप सर्वसस्यात्मक हो जाती हैं। हे भूमि! आप भूपतियों का सर्वस्व हो, भूमिपालपरायणा हो, आप भूमिपालों के लिये सुखदायिनी तथा भूमिदायिनी हैं, आप मुझे कृषिभूमि प्रदान करें।

इस महापुण्यशाली स्तोत्र को जो प्रातःकाल उठकर पढ़ता है, वह करोड़ों जन्म तक भूमिस्वामी रहता है (इस जन्म की तो बात ही क्या है)। इस स्तोत्र का पाठ करने से लोगों को भूमिदान का पुण्य मिलता है तथा भूमिदान-हरण के पाप से भी वह मुक्त हो जाता है। इसमें कोई सन्देह नहीं है। वह पराई भूमि हरण करने के पाप से निश्चित ही मुक्त हो जाता है। भूमि पर वीर्यत्याग के पाप से मुक्त हो जाता है, वह भूमि पर प्रज्वलित दीप रखने के पाप से भी मुक्त हो जाता है। इस स्तोत्र को पढ़ने से हे मुनि! वह पाप से मुक्त होकर एक सौ अश्वमेध का पुण्यफल प्राप्त करता है, इसमें कोई सन्देह नहीं है। यह भूमि देवी का महास्तोत्र सर्वकल्याणकारक है॥ १-१२॥

भूमौ शङ्खादिस्थापने दोषाः

देवीभागवते (स्कं० ९ अ० ९ श्लो० ३९)—

वसुधोवाच—

मुक्तां शुक्तिं हरेरर्चां शिवलिङ्गं शिवां तथा। शङ्खं प्रदीपं यन्त्रं च माणिक्यं हीरकं तथा॥
यज्ञसूत्रं च पुष्पं च पुस्तकं तुलसीदलम्। जपमालां पुष्पमालां कर्पूरं च सुवर्णकम्॥
गोरोचनं चन्दनं च शालग्रामजलं तथा। एतान् वोढुमशक्ताहं क्लिष्टा च भगवञ्छृणु॥

धरती पर शंखादि स्थापित करने के दोष (देवी भागवत स्कन्ध ९, अध्याय ९)—पृथिवी बोली—मोती, मोती की सीप, विष्णु की मूर्ति, शिवलिङ्ग, पार्वती की मूर्ति, शङ्ख, दीपक, यन्त्र, माणिक्य, हीरा, जनेऊ, पुष्प, पुस्तक, तुलसीदल, जप की माला, पुष्पमाला, कपूर, स्वर्ण, गोरोचन, चन्दन, शालिग्राम का जल—इन वस्तुओं का भार सहन करने में मैं असमर्थ हूँ। हे भगवन्! सुनो, यह सब सहन करना मेरे लिये कष्टप्रद है।

श्रीभगवानुवाच—

द्रव्याण्येतानि ये मूढा अर्पयिष्यन्ति सुन्दरि। यास्यन्ति कालसूत्रं ते दिव्यं वर्षशतं त्वयि॥

श्री भगवान् बोले—हे सुन्दरि! जो मूर्ख इन पदार्थों को तुझे अर्पित करते हैं, वे कालसूत्र नरक में एक सौ दिव्य वर्षों तक रहते हैं।

तत्रैव (अ० १० श्लो० १३)—

कामी भूमौ च रहसि वीर्यत्यागं करोति यः। भूमिरेणुप्रमाणं च वर्षं तिष्ठति रौरवे॥
भूमौ दीपं योऽर्पयति स चान्धः सप्तजन्मसु। भूमौ शङ्खं च संस्थाप्य कुष्ठं जन्मान्तरं लभेत्॥
मुक्तं माणिक्यहीरौ च सुवर्णं च मणिं तथा। पञ्च संस्थापयेद्भूमौ स चान्धः सप्तजन्मसु॥
शिवलिङ्गं शिवामर्चां यश्चार्पयति भूतले। शतमन्वन्तरं यावत् कृमिभक्षः स तिष्ठति॥
शङ्खं यन्त्रं शिलातोयं पुष्पं च तुलसीदलम्। यश्चार्पयति भूमौ च स तिष्ठेन्नरके ध्रुवम्॥
जपमालां पुष्पमालां कर्पूरं रोचनं तथा। यो मूढश्चार्पयेद्भूमौ स याति नरकं ध्रुवम्॥
भूमौ चन्दनकाष्ठं च रुद्राक्षं कुशमूलकम्। संस्थाप्य भूमौ नरके वसेन्मन्वन्तरावधि॥
पुस्तकं यज्ञसूत्रं च भूमौ संस्थापयेन्नरः। न भवेद्विप्रयोनौ च तस्य जन्मान्तरे जनिः॥

देवीभागवत में ही अध्याय १० श्लोक १३ में कहा गया है कि जो कामी भूमि पर वीर्यत्याग करता है, वह उतनी भूमि के रेणुतुल्य वर्षों तक नरक में रहता है। जो भूमि पर दीप जलाता है, वह सात जन्मों तक अन्धा होता है। भूमि पर शङ्ख रखने वाला जन्मान्तर में कुष्ठरोगी होता है। मुक्ता, माणिक्य, हीरा, सुवर्ण तथा मणि—इन पाँच को जो भूमि पर रखता है, वह सात जन्मों तक अन्धा रहता है। शिवलिङ्ग, शिव की पूजा को जो धरती पर स्थापित करता है, वह एक सौ मन्वन्तरों तक कृमिभक्षक होकर रहता है। शङ्ख, यन्त्र, शालिग्राम शिला के जल, पुष्प तथा तुलसीपत्रों को जो भूमि पर रखता है, वह निश्चित नरक में रहता है। जपमाला, पुष्पमाला, कर्पूर तथा गोरोचन को जो मूढ़ धरती पर चढ़ाता है या रखता है, वह निश्चित ही नरक को जाता है। जो व्यक्ति भूमि पर चन्दन, काष्ठ, रुद्राक्ष, कुश की जड़ स्थापित करता है, वह एक मन्वन्तर-पर्यन्त नरक में वास करता है। जो पुस्तक तथा जनेऊ को धरती पर रखता है, वह अनेकों जन्मों तक ब्राह्मण की योनि में जन्म नहीं लेता है।

गायत्रीपुरश्चरणप्रयोगः

अथो वक्ष्यामि गायत्रीं तत्त्वरूपां त्रयीमयीम्। यथा प्रकाश्यते ब्रह्म सच्चिदानन्दलक्षमम्॥

तत्र चन्द्रतारादिबलान्विते पूर्वोक्ते सुमुहूर्ते शिवालयादिपवित्रस्थले जपस्थानं प्रकल्प्य गोमयोपलेपनादिभिः संशोध्य तत्रासनभूमौ कूर्मशोधनं दीपस्थानशोधनं च कृत्वा अनुष्ठानारम्भं कुर्यात्।

तद्यथा—कर्ता प्रारम्भात्पूर्वदिने ब्राह्मे मुहूर्ते चोत्थाय नद्यादौ स्नात्वा प्रातःसन्ध्यादिनित्यकर्म समाप्य आचार्यमाहूय सम्पूज्य तदनुज्ञया स्वासने प्राङ्मुख उपविश्य सपवित्रकरः आचम्य प्राणानायम्य सामान्यतो गणपत्यादिस्मरणं कृत्वा देहशुद्ध्यर्थं प्रायश्चित्तं कुर्यात्। देशकालौ सङ्कीर्त्य 'करिष्यमाणगायत्रीपुरश्चरणेऽधिकारसिद्ध्यर्थे कृच्छ्रत्रयममुक-प्रत्याम्नायेनाहमाचरिष्ये' इति सङ्कल्प्य धेनुदानतिलहोमसुवर्णादिप्रत्याम्नायद्वारा कृच्छ्राणि सम्पाद्य कृताञ्जलिः अमुकशर्मणो मम गायत्रीपुरश्चरणे अनेन कृच्छ्रत्रयानुष्ठानेनाधिकारसिद्धिरस्त्विति विप्रान् वदेत्। विप्रा अधिकारसिद्धिरस्त्विति ब्रूयुः। पुनर्देशकालौ सङ्कीर्त्य 'करिष्यमाणपुरश्चरणाङ्गत्वेन मन्त्रसिद्ध्यर्थं गायत्र्या अयुतजपं करिष्ये' इति सङ्कल्प्य स्वयं विप्रद्वारा वा कुर्यात्। एवं सप्रणवव्याहृतिगायत्र्ययुतं जप्त्वा तर्पणं कुयात्। तद्यथा—ॐ तत्सवितुरित्यस्याऽऽचार्यं ऋषिं विश्वामित्रं तर्पयामि॥ १॥ ॐ गायत्रीछन्दसं तर्पयामि॥ २॥ ॐ सवितारं देवं तर्पयामि॥ ३॥ इति तर्पणं कृत्वा रुद्रं नमस्कृत्य कद्रुदायेत्यादीनि रुद्रसूक्तानि सकृज्जपेत्। इति पूर्वदिनकृत्यम्।

गायत्रीपुरश्चरण प्रयोग—अब मैं तत्त्वरूपा त्रयीमयी गायत्री को कहता हूँ, जिसके द्वारा सच्चिदानन्द परब्रह्म के दर्शन होते हैं। इसका अनुष्ठान शुभ मुहूर्त में चन्द्र-ताराबलान्वित सुमुहूर्त में शिवालय इत्यादि पवित्र स्थान में करना चाहिये। स्थान को गोबर आदि से लीप कर, आसन भूमि के कूर्म का शोधन कर दीपस्थान का शोधन करके ही अनुष्ठान करना चाहिये।

पूर्वदिन का कृत्य—कर्त्ता साधक अथवा यजमान अनुष्ठानमुहूर्त के प्रारम्भ दिन से एक दिन पूर्व ब्राह्म मुहूर्त में उठकर नदी आदि में स्नान करके प्रातः के सन्ध्यादि नित्य कर्मों को सम्पन्न कर आचार्य को बुलाकर पूज कर उसकी अनुज्ञा से अपने आसन पर पूर्व की ओर मुख करके बैठे तथा पवित्री धारण कर आचमन एवं प्राणायाम करके सामान्य रूप से गणेशजी का स्मरण कर देहशुद्धि के लिये प्रायश्चित्त करे।

प्रायश्चित्त-विधि—देश काल का स्मरण करके 'करिष्यमाणगायत्रीपुरश्चरणे अधिकारसिद्ध्यर्थं कृच्छ्रत्रयममुक-प्रत्याम्नायेनाहमाचरिष्ये' ऐसा सङ्कल्प करके गोदान, तिलहोम, सुवर्ण आदि प्रत्याम्नाय द्वारा तीनों कृच्छ्रों को सम्पादित करके हाथ जोड़कर 'अमुकनाम शर्मा (वर्मा इत्यादि की) अपने गायत्री पुरश्चरण में इस कृच्छ्रत्रय के अनुष्ठान से अधिकार सिद्ध हों' ऐसा ब्राह्मणों से कहे। तब ब्राह्मण लोग 'अधिकारसिद्धिः अस्तु' ऐसा कहें। पुनः देश-काल का उच्चारण करके 'करिष्यमाणपुरश्चरणाङ्गत्वेन मन्त्रसिद्ध्यर्थं गायत्र्या अयुतजपं करिष्ये' ऐसा सङ्कल्प साधक स्वयं अथवा ब्राह्मण द्वारा (आचार्य द्वारा) करे। फिर सप्रणव व्याहृतियों सहित अयुत संख्या में गायत्री जपकर तर्पण करना चाहिये।

गायत्री-तर्पणविधि—'ॐ तत्सवितुरित्यस्याऽऽचार्यऋषिं विश्वामित्रं तर्पयामि, ॐ गायत्री छन्दसं तर्पयामि, ॐ सवितारं देवं तर्पयामि' इस प्रकार तर्पण करके रुद्र को नमस्कार कर 'कद्रुदाय' इत्यादि रुद्रसूक्तों का एक बार जप करे। यह पूर्व दिन का कृत्य होता है।

ततो जपप्रारम्भदिने सुमुहूर्ते सपत्नीको यजमानः सुगन्धतैलाभ्यङ्गपूर्वकमुष्णोदकेन मङ्गलस्नानं कृत्वा शुक्लधौतवासांसि परिधाय यथायोग्यालङ्कृतो धृतकुङ्कुमादित्रिपुण्ड्रतिलकः सपवित्रोपग्रहः स्वासने प्राङ्मुख उपविश्य आचम्य देशकालौ सङ्कीर्त्य 'मम इह जन्मनि जन्मान्तरेषु च कृतकायिकवाचिकमानसिकसांसर्गिकसमस्तपापक्षयार्थं

पुत्रपौत्रधनधान्याभिवृद्ध्यर्थं चतुर्विधपुरुषार्थसिद्ध्यर्थं श्रीपरमेश्वरप्रीत्यर्थं सप्रणवव्याहृतिपूर्वकचतुर्विंशतिलक्ष-जपात्मकगायत्रीपुरश्चरणं (स्वयं) विप्रद्वारा वा करिष्ये, तदङ्गत्वेन गणेशपूजनं स्वस्तिपुण्याहवाचनं मातृकापूजनं नान्दीश्राद्धमाचार्यजपकर्तृवरणं च करिष्ये' इति सङ्कल्प्य गणेशपूजनादिनान्दीश्राद्धान्तं पूर्ववत् कृत्वा नान्दीश्राद्धान्ते सविता प्रीयतामिति पठित्वा आचार्यजपकर्तृवरणं कुर्यात्।

जपप्रारम्भ के दिन का कृत्य—जप-प्रारम्भ के दिन यजमान सपत्नीक सुगन्धित तैल लगाकर उष्णोदक से स्नान करे। फिर श्वेत वस्त्र धारण कर अपने आसन पर पूर्वाभिमुख बैठकर आचमन कर देश-काल का उच्चारण करके 'मम इह जन्मनि जन्मान्तरेषु च कृतकायिकवाचिकमानसिकसांसर्गिकसमस्तपापक्षयार्थं पुत्रपौत्र-धनधान्याभिवृद्ध्यर्थं चतुर्विधपुरुषार्थसिद्ध्यर्थं श्रीपरमेश्वरप्रीत्यर्थं सप्रणवव्याहृतिपूर्वकचतुर्विंशलक्षजपात्मक-गायत्रीपुरश्चरणं (स्वयं) विप्रद्वारा वा करिष्ये, तदङ्गत्वेन गणेशपूजनं स्वस्तिपुण्याहवाचनं मातृकापूजनं नान्दीश्राद्धमाचार्यजपकर्तृवरणं च करिष्ये' कहकर सङ्कल्प करे। फिर गणेशपूजनादि नान्दीश्राद्धान्त सभी कर्म पूर्ववत् करके नान्दीश्राद्ध के अन्त में 'सविता प्रीयताम्' कहकर आचार्य तथा जपकर्ताओं का वरण करे।

तद्यथा—आचार्यं जपकर्तॄंश्चोदङ्मुखानासनेषूपवेश्य स्वयं प्राङ्मुख उपविश्य सर्वेषां पादप्रक्षालनं कृत्वा दक्षिणहस्ते वरणद्रव्याणि गृहीत्वा देशकालौ सङ्कीर्त्य 'मम सकलपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं करिष्यमाणगायत्रीजपपुरश्चरण-कर्मणि अमुकगोत्रोत्पन्नममुकवेदशाखाध्यायिनममुकशर्माणं ब्राह्मणमेभिर्गन्धाक्षतताम्बूलस्वर्णाङ्गुलीयकासनमाला-कमण्डलुयुग्मवासोभिर्जपकरणार्थमाचार्यत्वेन त्वामहं वृणे' इत्याचार्यं वृत्वा 'ॐ वृतोऽस्मीति' प्रतिवचनानन्तरं हस्ते यज्ञकङ्कणं बद्ध्वा गन्धपुष्पादिभिः पूजां कुर्यात्। ततो जापकवरणं देशकालौ सङ्कीर्त्य 'मम सकलपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं करिष्यमाणगायत्रीपुरश्चरणकर्मणि नानागोत्रोत्पन्नानमुकाऽमुकशर्मणो विप्रानेभिर्गन्धाक्षतताम्बूल-स्वर्णाङ्गुलीयकासनमालाकमण्डलुवासोभिर्विहितजपकरणार्थं जापकत्वेन युष्मानहं वृणे'—'ॐ वृताः स्म' इति प्रति-वचनानन्तरं पृथक्पृथक् हस्ते यज्ञकङ्कणं बद्ध्वा गन्धादिभिः सम्पूज्य प्रार्थयेत्—

ॐ अस्य यागस्य निष्पत्तौ भवन्तोऽभ्यर्थिता मया। सुप्रसन्नैः प्रकर्त्तव्यो मद्यागो विधिपूर्वकम्॥
अङ्गीकुर्वन्तु कर्मैतत्कल्पद्रुमसमाशिषः। यथोक्तनियमैर्युक्ता जपार्थे स्थिरबुद्धयः॥
अस्मिन्यज्ञे मया पूज्याः सन्तु मे नियमान्विताः। अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः॥
जपध्यानरता नित्यं प्रसन्नमनसः सदा। अदुष्टभाषणाः सन्तु मा सन्तु परनिन्दकाः॥
ममापि नियमा ह्येते भवन्तु भवतामपि॥

इति प्रार्थ्य मधुपर्कपूजां कृत्वा प्रत्येकं वस्त्रद्वयमासनमर्घ्यपात्रमाचमनपात्रं जलपात्रं सुवर्णाङ्गुलीयकं मालां च दद्यात्। (अत्र जापकास्त्वेकविंशतिः न्यूनाधिका वा कार्याः)। ततः सर्वे जापका आचम्य प्राणानायम्य,

ॐ सूर्यः सोमो यमः कालः सन्ध्ये भूतान्यहः क्षपा। पवमानो दिक्पतिर्भूराकाशं खेचरामराः॥
ब्रह्मशासनमास्थायकल्पध्वमिह सन्निधिम्।

इति प्रार्थयेयुः। ततो देशकालौ सङ्कीर्त्य 'ममामुकशर्मणो यजमानस्य वा सकलपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थम् (यजमानानुज्ञया) गायत्रीपुरश्चरणान्तर्गतामुकसहस्रसंख्यापरिमितिविहितगायत्रीजपं करिष्ये, तदङ्गत्वेन भूतशुद्धिं प्राण-प्रतिष्ठामन्तर्मातृकाबहिर्मातृकान्यासं च करिष्ये' इति सङ्कल्प्य पूर्वोक्तपद्धतिकाण्डमार्गेण भूतशुद्ध्यादिबहिर्मातृकान्यासान्तं कृत्वा गायत्रीन्यासं कुर्यात्। तद्यथा—ॐ प्रणवस्य ब्रह्मा ऋषिः। गायत्री छन्दः। परमात्मा देवता। शरीरशुद्ध्यर्थे जपे विनियोगः। ॐ ब्रह्मऋषये नमः शिरसि॥ १॥ ॐ गायत्रीछन्दसे नमः मुखे॥ २॥ ॐ परमात्मदेवतायै नमः हृदये॥ ३॥ इति प्रणवन्यासः। सप्तव्याहृतीनां जमदग्निभारद्वाजात्रिगौतमकश्यपविश्वामित्रवसिष्ठाः ऋषयः। गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्ति-

त्रिष्टुब्जगत्यश्छन्दांसि। अग्निवायुसूर्यबृहस्पतिवरुणेन्द्रविश्वेदेवा देवताः। न्यासे जपे च विनियोगः। ॐ जमदग्नि-भारद्वाजात्रिगौतमकश्यपविश्वामित्रवसिष्ठऋषिभ्यो नमः शिरसि॥ १॥ ॐ गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगती-छन्दोभ्यो नमः मुखे॥ २॥ ॐ अग्निवायूसूर्यबृहस्पतिवरुणेन्द्रविश्वेदेवदेवताभ्यो नमः हृदये॥ ३॥ इति व्याहृति-ऋष्यादिन्यासः। ॐ गायत्र्या विश्वामित्रऋषिः। गायत्री छन्दः। सविता देवता। न्यासे जपे च विनियोगः। ॐ विश्वामित्रऋषये नमः शिरसि॥ १॥ ॐ गायत्री छन्दसे नमो मुखे॥ २॥ ॐ सवितृदेवतायै नमः हृदये॥ ३॥ इति गायत्र्या ऋष्यादिन्यासः। ॐ शिरसः प्रजापतिः ऋषिः ब्रह्माग्निवायुसूर्या देवताः। यजुश्छन्दः। प्राणायामे विनियोगः। ॐ प्रजापतिऋषये नमः शिरसि॥ १॥ ॐ यजुश्छन्दसे नमः मुखे॥ २॥ ॐ ब्रह्माग्निवायुसूर्यदेवताभ्यो नमः हृदये॥ १॥ इति शिरस ऋष्यादिन्यासः। ॐ भूः अङ्गुष्ठाभ्यां नमः॥ १॥ ॐ भुवः तर्जनीभ्यां नमः॥ २॥ ॐ स्वः मध्यमाभ्यां नमः॥ ३॥ ॐ तत्सवितुर्वरेण्यम् अनामिकाभ्यां नमः॥ ४॥ ॐ भर्गोदेवस्य धीमहि कनिष्ठिकाभ्यां नमः॥ ५॥ ॐ धियो यो नः प्रचोदयात् करतलकरपृष्ठाभ्यां नमः॥ ६॥ इति करन्यासः। एवमेव हृदयादिन्यासं कुर्यात्। ततः ॐ भूः नमः हृदये॥ १॥ ॐ भुवः नमो मुखे॥ २॥ ॐ स्वः नमो दक्षांसे॥ ३॥ ॐ महः नमो वासांसे॥ ४॥ ॐ जनः नमो दक्षिणोरौ॥ ५॥ ॐ तपः नमो वामोरौ॥ ६॥ ॐ सत्यं नमः जठरे॥ ७॥ इति व्याहृतिन्यासः।

आचार्यादि वरण-विधि—आचार्य तथा जपकर्ता अपने आसनों पर उत्तराभिमुख होकर बैठें तथा यजमान (साधक) स्वयं पूर्वाभिमुख होकर बैठकर आचार्यादि सब ब्राह्मणों के पैर धोकर दाहिने हाथ में वरणद्रव्यों को लेकर देश-काल का उच्चारण कर 'मम सकलपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं करिष्यमाणगायत्रीजपपुरश्चरणकर्मणि अमुकगोत्रोत्पन्नममुकवेदशाखाध्यायिनममुकशर्माणं ब्राह्मणमेभिर्गन्धाक्षतताम्बूलस्वर्णाङ्गुलीयकासनमालाकमण्डलु-युग्मवासोभिर्जपकरणार्थमाचार्यत्वेन त्वामहं वृणे' ऐसा कहकर आचार्य-वरण करे। आचार्य 'ॐ वृतोऽस्मि' ऐसा प्रतिवचन कहे। फिर यजमान आचार्य के हाथ में यज्ञकङ्कण बाँधकर गन्धादि के द्वारा उसकी पूजा करे। फिर जापकों के वरण के लिये देश-काल का उच्चारण करके 'मम सकलपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं करिष्यमाणगायत्रीपुरश्चरणकर्मणि नानागोत्रोत्पन्नानमुकाऽमुकशर्मणो विप्रानेभिर्गन्धाक्षतपुष्पताम्बूलस्वर्णाङ्गुलीय-कासनमालाकमण्डलुवासोभिर्विहितजपकरणार्थं जापकत्वेन युष्मानहं वृणे' कहकर जापकों का वरण करे। जापक 'ॐ वृताः स्मः' कहकर प्रतिवचन दें। फिर यजमान उन जापकों के हाथ में पृथक्-पृथक् कङ्कण बाँधे तथा गन्धादि से उनकी पूजा कर मूलोक्त 'अस्य यागस्य०' इत्यादि पाँच श्लोकों को कहकर जापकों से प्रार्थना करे, जिसका भावार्थ इस प्रकार है—ॐ इस यज्ञ की सम्पूर्णताहेतु मैं आप सबसे प्रार्थना करता हूँ। आप प्रसन्न होकर विधिपूर्वक मेरे इस याग को सम्पन्न करें। मेरे इस कार्य को अङ्गीकार कर आप मुझे कल्पवृक्ष के समान आशीर्वाद प्रदान करें। आप यथोक्त नियमों का पालन करते हुए स्थिर बुद्धि होकर रहें। इस यज्ञ में आप मेरे द्वारा पूजित होकर अक्रोधन, शौच-परायण, सतत ब्रह्मचारी, जप-ध्यानपरायण, नित्य प्रसन्न मानस, अदुष्ट भाषण होकर रहें। पराई निन्दा न करें। मेरे लिये भी यही नियम पालनीय रहेंगे, आपके लिये भी यही पालनीय होंगे।

ऐसी प्रार्थना करके मधुपर्क से उनकी पूजा करके प्रत्येक जापक को दो वस्त्र, आसन, अर्घ्यपात्र, आचमनपात्र, जलपात्र, सोने की अङ्गूठी तथा माला दे (यहाँ जापकों की संख्या इक्कीस अथवा आवश्यकतानुसार न्यूनाधिक रखनी चाहिये)। फिर सभी जापक आचमन तथा प्राणायाम करके 'ॐ सूर्यः सोमो यमः कालः सन्ध्ये भूतान्यहः क्षपा। पवमानो दिक्पतिर्भूराकाशं खेचरामराः। ब्रह्मशासनमास्थाय कल्पध्वमिह सन्निधिम्।' ऐसा कहकर प्रार्थना करे। फिर प्रत्येक जापक देश-काल का उच्चारण करके 'ममामुकशर्मणो०' इत्यादि वाक्य के द्वारा सङ्कल्प करे।

फिर पूर्वोक्त पद्धतिकाण्ड में बताई रीति से भूतशुद्धि इत्यादि बलिर्मातृका न्यासान्त कर्मों को करके गायत्रीन्यास करे। फिर मूलोक्त 'ॐ प्रणवस्य ब्रह्मात्रृषिः' इत्यादि मन्त्र से विनियोग करके 'ॐ ब्रह्मऋषये नमः शिरसि' इत्यादि तीन मन्त्र से प्रणवन्यास करे। फिर मूलोक्त 'सप्त व्याहृतीनां जमदग्नि०' इत्यादि कहकर व्याहृति-विनियोग करे। फिर 'ॐ जमदग्नि भारद्वाज०' इत्यादि तीन मन्त्रों से व्याहृतियों के लिये ऋष्यादि न्यास करे।

गायत्री न्यासार्थ विनियोग—फिर 'ॐ गायत्र्या विश्वामित्र: ऋषिः' इत्यादि से गायत्री का विनियोग कर 'ॐ विश्वामित्रऋषये नमः शिरसि' इत्यादि तीन मन्त्रों से गायत्री का ऋष्यादि न्यास करे। फिर 'ॐ शिरसः प्रजापतिः' इत्यादि से प्राणायाम का विनियोग करे। फिर 'ॐ प्रजापतये नमः शिरसि' इत्यादि तीन मन्त्रों से ऋष्यादि न्यास करे। पुनः 'ॐ भूः अङ्गुष्ठाभ्यां नमः' इत्यादि छः मन्त्रों से करन्यास करे। फिर 'ॐ भूः हृदयाय नमः, ॐ भुवः शिरसि स्वाहा, ॐ स्वः शिखायै वषट्, ॐ तत्सवितुर्वरेण्यं कवचाय हुम्, ॐ भर्गो देवस्य धीमहि नेत्रत्रयाय वौषट् तथा ॐ धियो योनः प्रचोदयात् अस्त्राय फट्' इन छः मन्त्रों से हृदयादि षडङ्ग न्यास करे। फिर 'ॐ भूः नमः हृदये' इत्यादि सात मन्त्रों से मूल में निर्दिष्ट अङ्गों में सप्त व्याहृतियों का न्यास करना चाहिये।

अथ गायत्रीवर्णन्यासः—ॐ तत् नमः पादद्वयाङ्गुलिमूलयोः ॥ १ ॥ ॐ सं नमः गुल्फयोः ॥ २ ॥ ॐ विं नमः जानुनोः ॥ ३ ॥ ॐ तुं नमः पादमूलयोः ॥ ४ ॥ ॐ वं नमः लिङ्गे ॥ ५ ॥ ॐ रें नमः नाभौ ॥ ६ ॥ ॐ णिं नमः हृदये ॥ ७ ॥ ॐ यं नमः कण्ठे ॥ ८ ॥ ॐ भं नमः हस्तद्वयाङ्गुलीमूलयोः ॥ ९ ॥ ॐ र्गो नमः मणिबन्धयोः ॥ १० ॥ ॐ दे नमः कूर्परयोः ॥ ११ ॥ ॐ वं नमः बाहुमूलयोः ॥ १२ ॥ ॐ स्यं नमः आस्ये ॥ १३ ॥ ॐ धीं नमः नासापुटयोः ॥ १४ ॥ ॐ मं नमः कपोलयोः ॥ १५ ॥ ॐ हिं नमः नेत्रयोः ॥ १६ ॥ ॐ धिं नमः कर्णयोः ॥ १७ ॥ ॐ यों नमः भ्रूमध्ये ॥ १८ ॥ ॐ यों नमः मस्तके ॥ १९ ॥ ॐ नं नमः पश्चिमवक्त्रे ॥ २० ॥ ॐ प्रं नमः उत्तरवक्त्रे ॥ २१ ॥ ॐ चों नमः दक्षिणवक्त्रे ॥ २२ ॥ ॐ दं नमः पूर्ववक्त्रे ॥ २३ ॥ ॐ यात् नमः उर्ध्ववक्त्रे ॥ २४ ॥ इति गायत्र्यक्षरन्यासः। ॐ तत् नमः शिरसि ॥ १ ॥ ॐ सवितुर्नमः भ्रुवोर्मध्ये ॥ २ ॥ ॐ वरेण्यं नमः नेत्रयोः ॥ ३ ॥ ॐ भर्गो नमः मुखे ॥ ४ ॥ ॐ देवस्य नमः कण्ठे ॥ ५ ॥ ॐ धीमहि नमः हृदये ॥ ६ ॥ ॐ धियो नमः नाभौ ॥ ७ ॥ ॐ यो नमः गुह्ये ॥ ८ ॥ ॐ नः नमः जानुनोः ॥ ९ ॥ ॐ प्रचोदयात् नमः पादयोः ॥ १० ॥ ॐ आपोज्योतीरसोमृतं ब्रह्मभूर्भुवः स्वरोमिति शिरसि ॥ ११ ॥ इति पदन्यासः। ततः ॐ तत्सवितुर्वरेण्यं नमः नाभ्यादिपादाङ्गुलीपर्यन्तम् ॥ १ ॥ ॐ भर्गोदेवस्य धीमहि नमः हृदयादि नाभ्यन्तम् ॥ २ ॥ ॐ धियो यो नः प्रचोदयात् नमः मूर्द्धादिहृदयान्तम् ॥ ३ ॥ इति विन्यस्य षडङ्गन्यासं कुर्यात्। ॐ तत्सवितुर्ब्रह्मणे हृदयाय नमः ॥ १ ॥ ॐ वरेण्यं विष्णवे शिरसे स्वाहा ॥ २ ॥ ॐ भर्गोदेवस्य रुद्राय शिखायै वषट् ॥ ३ ॥ ॐ धीमहि ईश्वराय कवचाय हुं ॥ ४ ॥ ॐ धियो यो नः सदाशिवाय नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ प्रचोदयात् सर्वात्मने अस्त्राय फट् ॥ ६ ॥ इति षडङ्गन्यासं कृत्वा ध्यायेत्।

अथ ध्यानम्—

**मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिन्दुनिबद्धरत्नमुकुटां तत्त्वार्थवर्णात्मिकाम्।
सावित्रीं वरदाभयाङ्कुशकशां पाशं कपालं गुणं शङ्खं चक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे ॥**

इति ध्यात्वा ॐ लं पृथिव्यात्मकं गन्धं समर्पयामि ॥ १ ॥ ॐ हं आकाशात्मकं पुष्पं समर्पयामि ॥ २ ॥ ॐ यं वाय्वात्मकं धूपं समर्पयामि ॥ ३ ॥ ॐ रं तेजआत्मकं दीपं समर्पयामि ॥ ४ ॥ ॐ वं अमृतात्मकं नैवेद्यं समर्पयामि ॥ ५ ॥ ॐ सं सर्वात्मकं मन्त्रपुष्पं समर्पयामि ॥ ६ ॥ इति मानसोपचारैः सम्पूज्य (भेदपक्षे) त्रिकोणपीठपूजां कुर्य्यात्।

तद्यथा—पूर्वादिचतुर्दिक्षु मध्ये च ॐ प्रभूताय नमः ॥ १ ॥ ॐ विमलाय नमः ॥ २ ॥ ॐ साराय नमः ॥ ३ ॥ ॐ समाराध्याय नमः ॥ ४ ॥ (मध्ये) ॐ परमसुखाय नमः ॥ ५ ॥ इति सम्पूज्य तद्बहिः ॐ अं अनन्ताय नमः ॥ १ ॥ ॐ पृं पृथिव्यै नमः ॥ २ ॥ ॐ अं अमृतसागराय नमः ॥ ३ ॥ ॐ रं रत्नद्वीपाय नमः ॥ ४ ॥ ॐ हें हेमगिरये नमः ॥ ५ ॥ ॐ नं

नन्दनोद्यानाय नमः ॥ ६ ॥ ॐ कं कल्पवृक्षेभ्यो नमः ॥ ७ ॥ ॐ मं मणिभूषितभूतलाय नमः ॥ ८ ॥ ॐ सं सोममण्डलाय नमः ॥ ९ ॥ ॐ अं अग्निमण्डलाय नमः ॥ १० ॥ ॐ सूं सूर्यमण्डलाय नमः ॥ ११ ॥ इति पीठदेवताः सम्पूजयेत्। ततः (पूज्यपूजकयोर्मध्ये प्राचीं प्रकल्प्य) पूर्वादिक्रमेण ॐ रां दीप्तायै नमः ॥ १ ॥ ॐ रीं सूक्ष्मायै नमः ॥ २ ॥ ॐ रूं जयायै नमः ॥ ३ ॥ ॐ रें भद्रायै नमः ॥ ४ ॥ ॐ रैं विभूत्यै नमः ॥ ५ ॥ ॐ रों विमलायै नमः ॥ ६ ॥ ॐ रौं अमोघायै नमः ॥ ७ ॥ ॐ रं विद्युतायै नमः ॥ ८ ॥ (मध्ये) ॐ रः सर्वतोमुख्यै नमः ॥ ९ ॥ इति पीठशक्तीः गन्धपुष्पैः पूजयेत्। तन्मध्ये 'ॐ ब्रह्मविष्णुशिवात्मकाय सौराय योगपीठात्मने नमः' इति पुष्पाञ्जलिना आसनं दत्त्वा तत्र सर्वतोभद्रमध्ये गायत्रीयन्त्रं विलिख्य तदुपरि 'ॐ महीद्यौः' इत्यादिमन्त्रः पूर्णपात्रान्तं पूर्ववत्ताम्रकलशं संस्थाप्य 'तत्त्वायामि' इति वरुणमावाह्य सम्पूज्य कलशस्य मुखे विष्णु इत्याद्यभिमन्त्र्य देवदानवसंवादे इत्यादि प्रार्थयेत्। ततः तदुपरि पट्टवस्त्रे शक्तिगन्धाष्टकेन यन्त्रं विलिख्य तन्मध्ये मूलमन्त्रेण पलस्वर्णमयीं पूर्वोक्तध्यानप्रतिपादितां भगवत्या गायत्र्याः प्रतिमां सावयवां वा त्रिकोणाकारामग्न्युत्तारणपूर्विकां संस्थाप्य प्राणप्रतिष्ठां कृत्वा मूलेन तस्यां भगवतीं वेदमातरं श्रीगायत्रीमावाह्य पुरुषसूक्तेन श्रीसूक्तेन पाद्यादिपुष्पान्तैरुपचारैः सम्पूज्य आवरणार्चनं कुर्य्यात्।

गायत्री वर्णन्यास—फिर 'ॐ तत्सवितुवरिण्यम् नमः' कहकर नाभि से पैर की अङ्गुलियों तक; 'ॐ भर्गो देवस्य धीमहि नमः' से हृदय से लेकर नाभि तक न्यास करे। फिर 'ॐ धियो योनः प्रचोदयात्' इससे शिर से लेकर हृदय-पर्यन्त न्यास करना चाहिये। फिर मूलोक्त 'ॐ तत्सवितुर्वरेण्यं हृदयाय नमः' इत्यादि छः मन्त्रों से षडङ्ग न्यास करके गायत्री का ध्यान मूलोक्त 'मुक्ताविद्रुमहेमनील०' इत्यादि श्लोक से करना चाहिये। ध्यान का भावार्थ इस प्रकार है—'मोती, मूंगा, स्वर्ण, नीलमणि के समान धवल छायायुक्त मुख वाली, तीन नेत्रों वाली, चन्द्रमा के सहित रत्नों के मुकुट को धारण किये चौबीस अक्षरों वाली सावित्री, जो कि वरदमुद्रा, अभयमुद्रा, अङ्कुश, पाश, कपाल, रस्सी (सूत्र), शङ्ख, चक्र तथा कमल को धारण करने वाली है, उसे भजें।' फिर मूल में लिखित 'ॐ लं पृथिव्यात्मकं गन्धं समर्पयामि' इत्यादि छः मन्त्रों से क्रमशः गन्ध, पुष्प, धूप, दीप, नैवेद्य तथा मन्त्रपुष्प समर्पित कर मानसपूजा करे। तदनन्तर मूल में लिखे 'ॐ प्रभूताय नमः' इत्यादि पाँच मन्त्रों पूर्वादि चारो दिशाओं तथा मध्य में पूजा करके फिर बाहर 'ॐ अं अनन्ताय नमः' इत्यादि ग्यारह मन्त्रों से पीठदेवताओं की पूजा करे। फिर पूज्य-पूजक के मध्य में प्राची की कल्पना करके पूर्वादि क्रम से मूलोक्त 'ॐ रां दीप्तायै नमः' इत्यादि नौ मन्त्रों से पीठशक्तियों की पूजा पूर्वादि आठ दिशाओं तथा मध्य में करे। फिर पीठ के मध्य में 'ॐ ब्रह्मविष्णुशिवात्मकाय सौराय योगपीठात्मने नमः' कहकर पुष्पाञ्जलि से आसन देकर फिर सर्वतोभद्र के मध्य में गायत्री यन्त्र लिखकर उसके ऊपर 'ॐ महीद्यौ०' इत्यादि मन्त्र-लिखित ताम्रकलश पूर्णपात्र-सहित स्थापित करके 'तत्त्वायामि०' इत्यादि वैदिक मन्त्र से वरुण का आवाहन कर पूजकर 'कलशस्य मुखे विष्णुः' इत्यादि मन्त्रों से अभिमन्त्रित कर 'देवदानवसंवादे०' इत्यादि मन्त्रों से प्रार्थना करे।

यन्त्र-लेखन—फिर उस कलश के ऊपर पट्टवस्त्र पर गन्धाष्टक से यन्त्र लिखकर उस यन्त्र के मध्य में एक पल भार की स्वर्णमयी गायत्री-प्रतिमा पूर्व में कथित ध्यान के अनुसार स्वरूप वाली बनवाकर अथवा भगवती गायत्री की प्रतिमा त्रिकोणाकार बनवाकर अग्नि उत्तारणपूर्वक संस्थापित करके प्राणप्रतिष्ठा करके मूल मन्त्र से उन वेदमाता का आवाहन करके पुरुषसूक्त तथा श्रीसूक्त से पाद्यादि पुष्पान्त उपचारों से पूजकर फिर यन्त्र के आवरण की पूजा करे।

तद्यथा—तत्र त्रिकोणस्य पूर्वकोणे ॐ गायत्र्यै नमः ॥ १ ॥ (निर्ऋतिकोणे) ॐ सावित्र्यै नमः ॥ २ ॥ (वायुकोणे) ॐ सरस्वत्यै नमः ॥ २ ॥ (त्रिकोणान्तरालेषु) ॐ ब्रह्मणे नमः ॥ १ ॥ ॐ विष्णवे नमः ॥ २ ॥ ॐ रुद्राय नमः ॥ ३ ॥ इति

पूजयेत्। ततो मूलेन पुष्पाञ्जलिं गृहीत्वा 'अभीष्टसिद्धिं मे देहि शरणागतवत्सले। भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्' इति पुष्पाञ्जलिं दत्त्वा विशेषार्घाद्बिन्दुं निक्षिप्य 'पूजितास्तर्पिताः सन्तु' इति वदेत्। इति प्रथमावरणम्॥ १॥

ततोऽष्टदले पूर्वादिचतुर्दिक्षु ॐ आदित्याय नमः॥ १॥ ॐ भानवे नमः॥ २॥ ॐ भास्कराय नमः॥ ३॥ ॐ रवये नमः॥ ४॥ (आग्नेयादिकेसरेषु) ॐ उषायै नमः॥ १॥ ॐ प्रज्ञायै नमः॥ २॥ ॐ प्रभायै नमः॥ ३॥ ॐ सन्ध्यायै नमः॥ ४॥ इति पूजयेत्। ततो मूलमुच्चरन् 'अभीष्टसिद्धिं मे देहि०' इत्यादिना पुष्पाञ्जलिं दद्यात्। इति द्वितीयावरणम्॥ २॥

ततः षट्कोणे आग्नेयादिकोणकेसरेषु मध्ये दिक्षु च ॐ ब्रह्मणे हृदयाय नमः॥ १॥ ॐ विष्णवे शिरसे स्वाहा॥ २॥ ॐ रुद्राय शिखायै वषट्॥ ३॥ ॐ ईश्वराय कवचाय हुं॥ ४॥ ॐ सदाशिवाय नेत्रत्रयाय वौषट्॥ ५॥ ॐ सर्वात्मने नमः अस्त्राय फट्॥ ६॥ इति षडङ्गानि पूजयेत्। ततः पुष्पाञ्जलिं गृहीत्वा मूलमुच्चार्य 'अभीष्टसिद्धिं मे देहि०' इति पुष्पाञ्जलिं दत्त्वा 'पूजितास्तर्पिताः सन्तु' इति वदेत्। इति तृतीयावरणम्॥ ३॥

ततो वर्तुले प्राचीक्रमेण ॐ प्रह्लादिन्यै नमः॥ १॥ ॐ प्रभायै नमः॥ २॥ ॐ नित्यायै नमः॥ ३॥ ॐ विश्वम्भरायै नमः॥ ४॥ ॐ विशालिन्यै नमः॥ ५॥ ॐ प्रभावत्यै नमः॥ ६॥ ॐ जयायै नमः॥ ७॥ ॐ शान्त्यै नमः॥ ८॥ इति पूजयेत्। ततः पुष्पाञ्जलिं गृहीत्वा मूलमुच्चार्य 'अभीष्टसिद्धिं मे देहि०' इति पुष्पाञ्जलिं दत्त्वा 'पूजतास्तर्पिताः सन्तु' इति वदेत्। इति चतुर्थावरणम्॥ ४॥

तद्बाह्ये वर्तुले प्राचीक्रमेण ॐ कान्त्यै नमः॥ १॥ ॐ दुर्गायै नमः॥ २॥ ॐ सरस्वत्यै नमः॥ ३॥ ॐ विश्वरूपाय नमः॥ ४॥ ॐ विशालायै नमः॥ ५॥ ॐ ईशायै नमः॥ ६॥ ॐ चापिन्यै नमः॥ ७॥ ॐ विमलायै नमः॥ ८॥ इति पूजयेत्। ततः पुष्पाञ्जलिं गृहीत्वा मूलमुच्चार्य 'अभीष्टसिद्धिं मे देहि०' इति पुष्पाञ्जलिं दत्त्वा 'पूजितास्तर्पिताः सन्तु' इति वदेत्। इति पञ्चमावरणम्॥ ५॥

तद्बाह्येऽष्टदलमूले पूर्वादिक्रमेण ॐ अपहारिण्यै नमः॥ १॥ ॐ सूक्ष्मायै नमः॥ २॥ ॐ विश्वयोन्यै नमः॥ ३॥ ॐ जयावहायै नमः॥ ४॥ ॐ पद्मालयायै नमः॥ ५॥ ॐ परायै नमः॥ ६॥ ॐ शोभायै नमः॥ ७॥ ॐ पद्मरूपायै नमः॥ ८॥ इति पूजयेत्। पुष्पाञ्जलिं गृहीत्वा मूलमुच्चार्य 'अभीष्टसिद्धिं मे देहि०' इति पुष्पाञ्जलिं दत्त्वा 'पूजितास्तर्पिताः सन्तु' इति वदेत्। इति षष्ठावरणम्॥ ६॥

ततोऽष्टदलमध्ये पूर्वादिक्रमेण ॐ आं ब्राह्म्यै नमः॥ १॥ ॐ ईं माहेश्वर्य्यै नमः॥ २॥ ॐ ऊं कौमार्यै नमः॥ ३॥ ॐ ॠं वैष्णव्यै नमः॥ ४॥ ॐ लृं वाराह्यै नमः॥ ५॥ ॐ ऐं इन्द्राण्यै नमः॥ ६॥ ॐ ओं चामुण्डायै नमः॥ ७॥ ॐ अः महालक्ष्म्यै नमः॥ ८॥ इति पूजयेत्। ततः पुष्पाञ्जलिं गृहीत्वा मूलमुच्चार्य 'अभीष्टसिद्धिं मे देहि०' इति पुष्पाञ्जलिं दत्त्वा 'पूजितास्तर्पिताः सन्तु' इति वदेत्। इति सप्तमावरणम्॥ ७॥

ततो दलाग्रेषु ॐ सों सोमाय नमः॥ १॥ ॐ भौं भौमाय नमः॥ २॥ ॐ बुं बुधाय नमः॥ ३॥ ॐ बृं बृहस्पतये नमः॥ ४॥ ॐ शुं शुक्राय नमः॥ ५॥ ॐ शं शनैश्चराय नमः॥ ६॥ ॐ रां राहवे नमः॥ ७॥ ॐ कें केतवे नमः॥ ८॥ इति पूजयेत्। ततो पुष्पाञ्जलिं गृहीत्वा मूलमुच्चार्य 'अभीष्टसिद्धिं मे देहि०' इति पुष्पाञ्जलिं दत्त्वा 'पूजितास्तर्पिताः सन्तु' इति वदेत्। इत्यष्टमावरणम्॥ ८॥

ततो भूपुरे पूर्वादिदशदिक्षु ॐ लं इन्द्राय नमः॥ १॥ ॐ रं अग्नये नमः॥ २॥ ॐ मं यमाय नमः॥ ३॥ ॐ क्षं निर्ऋतये नमः॥ ४॥ ॐ वं वरुणाय नमः॥ ५॥ ॐ यं वायवे नमः॥ ६॥ ॐ सं सोमाय नमः॥ ७॥ ॐ ईं ईशानाय नमः॥ ८॥ (ईशानपूर्वयोर्मध्ये) ॐ आं ब्रह्मणे नमः॥ ९॥ (निर्ऋतिपश्चिमयोर्मध्ये) ॐ अं अनन्ताय नमः॥ १०॥ इति पूजयेत्। ततः पुष्पाञ्जलिं गृहीत्वा मूलमुच्चार्य 'अभीष्टसिद्धिं मे देहि०' इति पुष्पाञ्जलिं दत्त्वा 'पूजितास्तर्पिताः सन्तु' इति वदेत्। इति नवमावरणम्॥ ९॥

तद्बहिस्तत्तत्समीपे—ॐ वं वज्राय नमः ॥ १ ॥ ॐ शं शक्तये नमः ॥ २ ॥ ॐ दं दण्डाय नमः ॥ ३ ॥ ॐ खं खड्गाय नमः ॥ ४ ॥ ॐ पं पाशाय नमः ॥ ५ ॥ ॐ अं अङ्कुशाय नमः ॥ ६ ॥ ॐ गं गदायै नमः ॥ ७ ॥ ॐ त्रिं त्रिशूलाय नमः ॥ ८ ॥ ॐ पं पद्माय नमः ॥ ९ ॥ ॐ चं चक्राय नमः ॥ १० ॥ इति पूजयेत्। ततः पुष्पाञ्जलिं गृहीत्वा मूलमुच्चार्य 'अभीष्टसिद्धिं मे देहि०' इति पुष्पाञ्जलिं दत्त्वा 'पूजितास्तर्पिताः सन्तु' इति वदेत्। इति दशमावरणम् ॥ १० ॥

इत्थमावरणैर्देवी दशभिः परिपूजयेत्। धम्मार्थकाममोक्षाणां भोक्ता स्याद्द्विजसत्तमः ॥

इत्यावरणपूजां कृत्वा धूपादिनीराजनान्तं सम्पूज्य स्तवेन स्तुत्वा शापविमोचनं पठित्वा यथाविधि जपं कुर्यात्।

आवरण-पूजा—त्रिकोण के पूर्वादि कोणों में मूलोक्त 'ॐ गायत्र्यै नमः' इत्यादि तीन मन्त्रों से पूजा कर उन तीनों के अन्तरालों (तीनों भुजाओं) में 'ॐ ब्रह्मणे नमः' इत्यादि तीन मन्त्रों से क्रमशः ब्रह्मा-विष्णु-रुद्र की पूजा करे। फिर मूल गायत्री मन्त्र पढ़कर 'अभीष्टसिद्धिं मे देहि शरणागतवत्सले। भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्' कहकर पुष्पाञ्जलि देकर विशेष अर्घ्य से विन्दु का निक्षेप कर 'पूजितास्तर्पिताः सन्तु' ऐसा कहे। द्वितीयावरण की पूजा यन्त्र में बने अष्टदल पर पूर्वादि चार दिशाओं में 'ॐ आदित्याय नमः' इत्यादि चार मन्त्रों से पूजन कर उसके आग्नेयादि केसरों तथा मध्य में 'ॐ उषायै नमः' इत्यादि पाँच मन्त्रों से पूजा करे; गायत्री मन्त्र का उच्चारण करके 'अभीष्टसिद्धिं मे देहि शरणागतवत्सले। भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम् ॥' श्लोक बोलकर पुष्पाञ्जलि दे। तृतीयावरण की पूजा षट्कोण में आग्नेयादि केसरों तथा मध्य के साथ दिशाओं में मूलोक्त 'ॐ ब्रह्मणे हृदयाय नमः' इत्यादि छः मन्त्रों से करने के उपरान्त 'अभीष्टसिद्धिं मे देहि शरणागतवत्सले। भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनम्' कहकर 'पूजितास्तर्पिताः सन्तु' ऐसा कहे। पुष्पाञ्जलि दे। सन्तर्पण करे।

चतुर्थावरण की पूजा वर्तुल में प्राचीक्रम से 'ॐ प्रह्लादिन्यै नमः' इत्यादि आठ मन्त्रों से करने के उपरान्त 'अभीष्टसिद्धिं मे देहि शरणागतवत्सले। भक्त्या समर्पये तुभ्यं चतुर्थावरणार्चनम्' कहकर पुष्पाञ्जलि देकर 'पूजितास्तर्पिताः सन्तु' ऐसा कहे। यह चतुर्थावरण का पूजन हुआ। पञ्चमावरण की पूजा उस वर्तुल के बाहरी वर्तुल में प्राचीक्रम से 'ॐ कान्त्यै नमः' इत्यादि आठ मन्त्रों से करके पुष्पाञ्जलि लेकर गायत्री मन्त्र का उच्चारण कर 'अभीष्टसिद्धिं मे देहि शरणागतवत्सले। भक्त्या समर्पये तुभ्यं पञ्चमावरणार्चनम्' कहें तथा पीछे से 'पूजितास्तर्पिताः सन्तु' भी कहे। षष्ठावरण की पूजा उसके बाहर अष्टदल में प्राचीक्रम से 'अपहारिण्यै नमः' इत्यादि आठ मन्त्रों से करने के उपरान्त पुष्पाञ्जलि लेकर 'अभीष्टसिद्धिं मे देहि शरणागतवत्सले। भक्त्या समर्पये तुभ्यं षष्ठावरणार्चनम्' 'पूजितास्तर्पिताः सन्तु' कहकर अर्घ्य के छींटों से तर्पण करे। सप्तमावरण की पूजा में अष्टदलों के मध्य में प्राची आदि क्रम से 'ॐ आं ब्राह्म्यै नमः' आदि मूलोक्त आठ मन्त्रों से पूजा करे तथा 'अभीष्टसिद्धिं मे देहि शरणागतवत्सले। भक्त्या समर्पये तुभ्यं सप्तमावरणार्चनम्' कहकर पुष्पाञ्जलि दे। फिर 'पूजितास्तर्पिताः सन्तु' कहकर अर्घ्यविन्दु से आवरण देवताओं का तर्पण करना चाहिये। अष्टमावरण की पूजा में दलाग्रों में 'ॐ सों सोमाय नमः' इत्यादि आठ मन्त्रों से पूजा कर 'अभीष्टसिद्धिं मे देहि शरणागतवत्सले। भक्त्या समर्पये तुभ्यं अष्टमावरणार्चनम्' कहकर पुष्पाञ्जलि देकर फिर अर्घ्यविन्दु से 'पूजितास्तर्पिताः सन्तु' कहकर तर्पण करे। नवाँ आवरण भूपुर है; अतः भूपुर में पूर्वादि दिशाओं में कोणों सहित मूलोक्त 'ॐ लं इन्द्राय नमः' इत्यादि मन्त्रों से प्रदक्षिणक्रम से पूजा करके फिर ईशान एवं पूर्व के मध्य में 'ॐ आं ब्रह्मणे नमः' तथा नैर्ऋत्य एवं पश्चिम के मध्य में 'ॐ अं अनन्ताय नमः' कहकर दश दिक्पालों की पूजा करे। फिर पुष्पाञ्जलि लेकर 'अभीष्टसिद्धिं मे देहि शरणागतवत्सले। भक्त्या समर्पये तुभ्यं नवमावरणार्चनम्' कहकर 'पूजितास्तर्पिताः सन्तु' कहकर अर्घ्यविन्दु से तर्पण करे। फिर नवमावरण

के बाहर उन्हीं पूर्वादि दश दिशाओं में 'ॐ वं वज्राय नमः' इत्यादि मूलोक्त दश मन्त्रों से दिक्पालों के शस्त्रों का पूजन करने के बाद पुष्पाञ्जलि लेकर 'अभीष्टसिद्धिं मे देहि शरणागतवत्सले। भक्त्या समर्पये तुभ्यं दशमावरणार्चनम्॥' कहे। फिर अर्घ्यविन्दु से 'पूजितास्तर्पिताः सन्तु' कहकर तर्पण करे। इस प्रकार दशों आवरणों की पूजा करनी चाहिये तथा हे द्विजश्रेष्ठ! इससे धर्मार्थकाममोक्ष चारो पुरुषार्थ मिलते हैं। फिर धूपादि नीराजनान्त पूजा करके गायत्री स्तोत्र से स्तवन कर शापविमोचन कर यथाविधि जप करना चाहिये।

तत्र मन्त्रः—'ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्' इति वैदिको मन्त्रः। सर्वेषां समान एव जपो न तु न्यूनाधिकः। (उत्तमजपो द्विसाहस्रः मध्यमः सार्द्धद्विसाहस्रः अधमस्त्रिसाहस्रो ज्ञेयः। अस्य पुरश्चरणं चतुर्विंशतिलक्षजपः)। ततो जपान्ते पूर्वोक्तऋष्यादिन्यासं हृदयादिषडङ्गन्यासं च कृत्वा कवचं पठेयुः। ततो देवीं पुनः पञ्चोपचारैः सम्पूज्य नीराजनं कृत्वा पुष्पाञ्जलिं च दत्त्वा देव्या दक्षिणकरे जपसमर्पणं कुर्युः। ततः सर्वे जापकाः भूमौ शयानाः हविष्यान्नमश्नन्तो ब्रह्मचर्यास्पृश्यास्पर्शादिनियमांश्चरेयुः प्रत्यहम् 'ॐ यज्जाग्रतो' इति शिवसङ्कल्पं त्रिः पठेयुः। ततः पुरश्चरणजपसमाप्तौ होमः।

गायत्री मन्त्र—'ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो योनः प्रचोदयात्' यह वैदिक मन्त्र है। इसका चौबीस लाख जप करने से पुरश्चरण सम्पन्न होता है। सभी जापकों को प्रतिदिन समान संख्या में जप करना चाहिये। न्यूनाधिक जप नहीं करना चाहिये। प्रत्येक ब्राह्मण प्रतिदिन दो सहस्र जप करे तो उत्तम है। ढाई सहस्र जप मध्यम है तथा तीन सहस्र जप अधम होता है। इससे अधिक जप प्रतिदिन प्रतिजापक को नहीं करना चाहिये। प्रतिदिन जपसमाप्ति पर पूर्वोक्त ऋष्यादि न्यास तथा हृदयादि षडङ्ग न्यास करके गायत्री कवच का पाठ करना चाहिये। पुनः पञ्चोपचार से गायत्री देवी की पूजा करके नीराजन तथा पुष्पाञ्जलि देकर देवी के दक्षिण कर में जप का समर्पण करना चाहिये। फिर सभी जापकों को भूमि पर शयन करते हुए, हविष्यान्न भोजन करते हुए, ब्रह्मचर्य तथा स्पृश्य-अस्पृश्य के नियमों का पालन करते हुए प्रतिदिन तीनों सन्ध्याओं में 'शिवसङ्कल्प सूक्त' पढ़ना चाहिये। पुरश्चरण जप की समाप्ति पर होम करना चाहिये।

तद्यथा—देशकालौ सङ्कीर्त्य 'अद्य पुरश्चरणसाङ्गतासिद्ध्यर्थं होमविधिं करिष्ये' इति सङ्कल्प्य गणपति-पूजनादिनान्दीश्राद्धान्तं पूर्ववत् कुर्यात्। ततः कुण्डे स्थण्डिले वा स्वगृह्योक्तविधिना पञ्चभूसंस्कारपूर्वकमग्निं प्रतिष्ठाप्य ग्रहपीठे सूर्यादिनवग्रहमण्डलदेवानावाह्य सम्पूज्य तदीशान्यां रुद्रकलशं स्थापयेत्। ततो मध्यपीठे सर्वतोभद्रमण्डले ताम्रकलशोपरि स्वर्णप्रतिमायां भगवन्तं सवितारं गायत्रीं च षोडशोपचारैः सम्पूज्य पूर्वोक्तावरणदेवतापूजां विधाय गीतवादिभिः सह महानीराजनं कृत्वा सप्त प्रदक्षिणाश्च कृत्वा साष्टाङ्गं प्रणमेत्। ततः कुशकण्डिकां सम्पाद्य आघारावाज्य-भागौ हुत्वा 'ॐ इदं हवनीयद्रव्यमन्वाधानोक्तदेवताभ्योऽस्तु न मम' इति यजमानो द्रव्यत्यागं कुर्य्यात्। ततः सूर्यादिग्रहेभ्यः अर्कादिसमिच्चर्वाज्यतिलाहुतिभिः प्रत्येकमष्टाविंशतिरष्टौ वा हुत्वा तैरेव द्रव्यैरधिप्रत्यधिदेवताभ्यश्चतुश्चतुः सङ्ख्याकाभिः पञ्चलोकपालदशदिक्पालेभ्यश्च द्विद्विसङ्ख्याकाभिश्च जुहुयात्। ततो बहुजपकर्तृकपक्षे जपदशांशेन पायसादि होमः कार्यः। तथा च देवीभागवते—

जुहुयात्तद्दशांशेन सघृतेन पयोऽन्धसा। तिलैः पत्रैः प्रसूनैश्च यवैश्च मधुरान्वितैः॥

एकजपकर्तृकपक्षे तु शतांशहोमः कार्यः। तथा च शारदातिलके—

तत्त्वसङ्ख्यासहस्राणि मन्त्रविज्जुहुयात्तिलैः। सर्वपापविनिर्मुक्तो दीर्घमायुः स विन्दति॥

श्रीगायत्रीपूजायन्त्रम्



होम विधि—देश-कालोच्चारण करके 'अद्य पुरश्चरणसाङ्गतासिद्ध्यर्थं होमविधिं करिष्ये' कहकर सङ्कल्प करे तथा पूर्व में वर्णित विधि से गणपति-पूजनादि नान्दीश्राद्धान्त कर्म करना चाहिये। फिर कुण्ड में अथवा स्थण्डिल पर अपने गृह्यसूत्र की विधि से पञ्चभूसंस्कारपूर्वक अग्नि को प्रतिष्ठित करके नवग्रह पीठ पर सूर्यादि नवग्रह मण्डल के देवों (अधिदेव तथा प्रत्यधिदेवों सहित) आवाहन करके उनकी पूजा करे। फिर उनके ईशान में रुद्रकलश स्थापित करे। फिर मध्य में रखे सर्वतोभद्र पीठ पर ताम्रकलश के ऊपर भगवान् सविता की स्वर्णप्रतिमा तथा गायत्री का षोडशोपचारों से पूज कर गायत्री पीठ के पूर्वोक्त आवरणदेवताओं की पूजा करे। गीत-वादित्र के साथ महानीराजन करके सात प्रदक्षिणाएँ करके साष्टाङ्ग प्रणाम करे। फिर कुशकण्डिका को सम्पादित कर आघाराहुति आज्यभागाहुति करके 'ॐ इदं हवनीयद्रव्यमन्वाधानोक्तदेवताभ्योऽस्तु न मम' ऐसा कहकर यजमान (साधक) द्रव्यत्याग करे। फिर सूर्यादि नवग्रहों के लिये अर्कादि समिधाओं, चरु, आज्य, तिल की आहुतियाँ प्रत्येक के लिये एक सौ आठ होम करके अथवा उन्हीं द्रव्यों से अधिदेवता, प्रत्यधिदेवताओं के लिये चार-चार आहुतियाँ, पञ्चलोकपालों, दशदिक्पालों के लिये दो-दो आहुतियाँ (प्रत्येक के लिये) समर्पित करे। फिर बहुत जापक होने पर जपसंख्या का दशांश (दो लाख चौबीस सहस्र) पायसादि होम भी करना चाहिये। यह होम गायत्री मन्त्र से होता है।

देवीभागवत में कहा है कि जप के दशांश में सघृत पायस, हविष्यान्न, तिल, पत्र, प्रसून तथा मधुरान्वित यवों से हवन करना चाहिये। एक जापककर्तृपक्ष में जपसंख्या का शतांश (चौबीस सहस्र) हवन करना चाहिये।

शारदातिलक के अनुसार मन्त्रवेत्ता को चौबीस सहस्र होम तिलाहुति से देनी चाहिये । ऐसा करने से वह सभी पापों से मुक्त होकर दीर्घायु को प्राप्त करता है।

शतांशहोमप्रकारः

प्रधानदेवसवित्रे चतुर्विंशतिसहस्रतिलाहुतिभिस्त्रिसहस्रपायसाहुतिभिस्तावतीभिर्घृताहुतिभिर्दूर्वाहुतिभिस्तावतीभिः क्षीरद्रुमसमिधाहुतिभिश्च हुत्वा पूर्वोक्तावरणदेवताभ्यश्चर्वादिद्रव्यैरेकैकाहुतीर्दत्वा शेषेण स्विष्टकृद्धोमं च कृत्वा समापयेत्। होमकाले 'इदं सवित्रे न मम' इति त्यागः। (होमे सप्रणवा व्याहृतिरहिता स्वाहान्ता गायत्रीं दूर्वात्रयस्यैकाहुतिः। दूर्वासमिधां दधिमध्वाज्याक्तानां होमः)। ततो होमान्ते बलिदानम्। यजमानस्याभिषेकश्च कार्य्यः। अभिषेकान्ते तत्समये एव दक्षिणां दद्यात्। अदाने प्रत्यवायी भवति। क्षणे-क्षणे पापभागी भवति। दक्षिणा च प्रतिलक्षं सुवर्णनिष्कत्रयं तदर्धं वा शक्त्या देया। ततो जले सवितारं रक्तचन्दनादिभिः सम्पूज्य होमदशांशेन मूल मन्त्रान्ते 'सवितारं तर्पयामि' इत्युक्त्वा दुग्धमिश्रजलेन तर्पणं कार्य्यम्। ततस्तर्पणदशांशेन गायत्र्यन्ते 'आत्मानमभिषिञ्चामि न मम' इति यजमानमूर्ध्न्यभिषेकः कार्यः। ततः अभिषेक-दशांशसङ्ख्ययाधिकं वा ब्राह्मणभोजनम्। (होमतर्पणाभिषेकानां मध्ये यदेवं न सम्भवति तत्स्थाने तद्द्विगुणो जपः कार्य्यः। ततो भूयसी दक्षिणां विप्राशीर्वादश्च। ततः कृताञ्जलिपुटः। 'ॐ चतुर्विंशति लक्षात्मकगायत्रीपुरश्चरणं सम्पूर्णमस्त्विति भवन्तो ब्रुवन्त्विति' विप्रान् प्रार्थ्य ते च— ॐ गायत्रीपुरश्चरणं सम्पूर्णमस्त्विति ब्रूयुः। इति प्रतिवचनानन्तरं कर्म्मपूर्तिकामो विष्णुं स्मरेत्। एवं कृते सर्वपापक्षयो भवति दीर्घायुश्च विन्दति)।

शतांश होमप्रकार कथन—(यहाँ पर गायत्री-पुरश्चरण के लिये शारदातिलकोक्त शतांश होम = चौबीस सहस्र आहुति होम कैसे करे—यह बताया जा रहा है) प्रधानदेव सविता के लिये चौबीस सहस्र आहुतियाँ तिल से तथा तीन सहस्र पायस से, तीन सहस्र घृताहुति, तीन सहस्र दूर्वा की आहुतियों का होम क्षीरीवृक्षों की समिधाओं से करके पूर्वोक्त आवरणदेवताओं के लिये चरु आदि द्रव्यों से एक-एक आहुति देकर शेष से स्विष्टकृद् होम करके होम पूरा करे। होमकाल में 'इति सवित्रे न मम' कहकर त्याग करे (होम में प्रणवसहित, व्याहृतिरहित स्वाहान्त गायत्री की तीन दूर्वा से, एक आहुति दूर्वा की समिधा को दधि, मधु, घृत से आप्लुत करके दे)। फिर होमान्त में बलिदान करे। यजमान का अभिषेक भी करना चाहिये। अभिषेक के अन्त में तत्काल दक्षिणा भी देनी चाहिये। यदि यजमान होम की समाप्ति पर आचार्यादि को तत्काल दक्षिणा नहीं देता है तो प्रत्यवाय (विपरीत परिणाम) होता है। क्षण-क्षण पर वह पापभागी होता है। प्रति एक लाख जप पर तीन निष्क अथवा डेढ़ निष्क अथवा शक्ति के अनुसार दक्षिणा देनी चाहिये। फिर सविता का रक्तचन्दन आदि से पूजन कर होम का दशांश गायत्री मन्त्र के अन्त में 'सवितारं तर्पयामि' जोड़कर दुग्धमिश्रित जल से तर्पण करना चाहिये। फिर उस तर्पण का दशमांश गायत्री मन्त्र के अन्त में 'आत्मानमभिषिञ्चामि न मम' कहकर यजमान के शिर पर (मूर्धाभिषेक) अभिषेक करना चाहिये। अभिषेक की दशांश संख्या में ब्राह्मणभोजन कराना चाहिये। (होम, तर्पण तथा अभिषेक में जो कर्म सम्भव न हो, उसके स्थान पर उस संख्या से द्विगुण जप करना चाहिये। फिर भूयसी दक्षिणा दे तथा ब्राह्मणों का आशीर्वाद प्राप्त करे। फिर हाथ जोड़कर 'चौबीस लाख गायत्री पुरश्चरण पूर्ण हो' ऐसा आप लोग कहें—यह वचन ब्राह्मणों से कहे तब ब्राह्मण 'गायत्रीपुरश्चरणं सम्पूर्णमस्तु' ऐसा प्रतिवचन कहें। इस प्रतिवचन के उपरान्त कर्म-पूर्तिहेतु विष्णु का स्मरण करे। ऐसा करने से सभी पापों का नाश हो जाता है)।

गायत्रीपुरश्चरणफलम्

शारदातिलके—

व्याहृतित्रयसंयुक्तां गायत्रीं दीक्षितो यजेत्। तत्त्वलक्षविधानेन भिक्षाशी विजितेन्द्रियः॥

क्षीरौदनतिलान् दूर्वाक्षीरद्रुमसमिद्वरान्। पृथक्सहस्त्रत्रितयं जुहुयान्मन्त्रसिद्धये॥
तत्त्वसङ्ख्यासहस्राणि मन्त्रविज्जुहुयात्तिलैः। सर्वपापविनिर्मुक्तो दीर्घमायुः स विन्दति॥
आयुषे साज्यहविषा केवलेनापि सर्पिषा। दूर्वात्रिकैस्तिलैर्मन्त्री जुहुयात्त्रिसहस्त्रकम्॥
अरुणाब्जैस्त्रिमध्वक्तैर्जुहुयादयुतं ततः। महालक्ष्मीर्भवेत्तस्य षण्मासान्नात्र संशयः॥
ब्रह्मश्रिये प्रजुहुयात्प्रसूनैर्ब्रह्मवृक्षजैः। बहुना किमिहोक्तेन यथावत्साधु साधिता॥
द्विजन्मनामियं विद्या सिद्धा कामदुघा मता॥

गायत्रीपुरश्चरण का फल—शारदातिलक में कहा गया है कि तीन व्याहृतियों से युक्त गायत्री मन्त्र की दीक्षा लेकर चौबीस लाख मन्त्रों का जप विधानपूर्वक करे। जितेन्द्रिय होकर क्षीरौदन, तिल, दूर्वा तथा क्षीरीवृक्षों की श्रेष्ठ समिधाएँ लेकर अलग-अलग तीन-तीन सहस्र आज्यसहित हवि से मन्त्रसिद्धि के लिये होम करना चाहिये। ऐसा करने से वह सर्वपाप-विनिर्मुक्त होकर दीर्घायु को प्राप्त होता है। आयुष्य-प्राप्तिहेतु घृत एवं हविष से अथवा केवल घृत से तीन दूर्वा तथा तिलों से तीन सहस्र हवन करना चाहिये। लाल कमलों को मधु में आप्लुत कर दस लाख की संख्या में हवन करे तो उसको छः मास में महालक्ष्मी की प्राप्ति हो जाती है। ब्रह्मश्री की प्राप्ति के लिये पलाशवृक्ष के फूलों की आहुति देनी चाहिये। अधिक क्या कहा जाय, विधिपूर्वक ब्राह्मण के द्वारा इसकी साधना होने पर यह विद्या साधक के लिये कामधेनु के समान फलप्रद होती है।

गायत्रीपटले—

आदित्यस्योदये स्नात्वा सहस्त्रं प्रत्यहं जपेत्। आयुरारोग्यमैश्वर्यं धनं च लभते ध्रुवम्॥
त्रिरात्रोपोषितः सम्यग्घृतं हुत्वा सहस्त्रशः। सहस्त्रं लाभमाप्नोति हुत्वाग्नौ खादिरेन्धनम्॥
पालाशीभिः समिद्भिश्च घृताक्ताभिर्हुताशने। सहस्त्रं लाभमाप्नोति राहुसूर्यसमागमे॥
हुत्वा तु खदिरं वह्नौ घृताक्तं रक्तचन्दनम्। हेम्ना सहस्त्रमाप्नोति राहुचन्द्रसमागमे॥
रक्तचन्दनमिश्रं तु सघृतं हव्यवाहने। हुत्वा गोमयमाप्नोति सहस्त्रं गोमयं द्विजः॥
जातीचम्पकराजार्ककुसुमानां सहस्त्रशः। हुत्वा वस्त्रमवाप्नोति घृताक्तानां हुताशने॥
सूर्यमण्डलबिम्बे च हुत्वा तोयं सहस्त्रशः। सहस्त्रं प्राप्नुयाद्धेम रौप्यमिन्दुमये हुते॥
अलक्ष्मीपापसंयुक्ते मलव्याधिविनाशने। जाप्यैः सहस्त्रैर्मुच्येत स्नायाद्यस्तु जलेन वै॥
गोघृतेन सहस्त्रेण लोध्रेण जुहुयाद्यदि। चौराग्निमारुतोत्थान्यभव्यानि न भवन्ति वै॥
क्षीराहारो जपेल्लक्षमपमृत्युमपोहति। घृताशी प्राप्नुयान्मेधां बहुविज्ञानसञ्चयाम्॥
हुत्वा वेतसपत्राणि घृताक्तानि हुताशने। लक्षाधिपस्य पदवीं सार्वभौमत्वमाप्नुयात्॥

गायत्री पटल के अनुसार हवनविधि—सूर्योदय के समय स्नान करके प्रतिदिन एक सहस्र जप करना चाहिये। इससे आयु-आरोग्य-ऐश्वर्य तथा धन की प्राप्ति निश्चित ही होती है। तीन अहोरात्र उपवास करके सम्यक् रीति से एक सहस्र घृताहुति देकर खदिर की समिधा से होम करने पर साधक सहस्र लाभ प्राप्त करता है। पलाश की घृताक्त समिधाओं का अग्नि में हवन सूर्यग्रहण के समय करने से सहस्र लाभ प्राप्त होता है। रक्तचन्दन तथा घृत को खदिर की समिधाओं की अग्नि में हवन करने से सहस्रों गोधन की प्राप्ति द्विज को होती है। चमेली, चम्पा, राजार्क के फूलों से प्रत्येक की एक सहस्र आहुति घृताक्त कर अग्नि में देने से वस्त्र की प्राप्ति होती है। अञ्जलि से जल की आहुतियाँ सूर्यबिम्ब में एक सहस्र की संख्या में देने से सहस्रों होम प्राप्त होता है। यदि गायत्री

मन्त्र से पूर्ण चन्द्रविम्ब में जल की प्रतिदिन आहुति देना प्रारम्भ कर दे तो सहस्र रौप्य की प्राप्ति होती है। यदि जल में स्नान कर उसी में स्थित रहकर एक सहस्र गायत्री मन्त्र का जप करे तो दरिद्रा, पाप तथा व्याधि का नाश होता है। यदि एक सहस्र आहुति गायत्री मन्त्र द्वारा लोध्र वृक्ष की समिधा से दी जाय तो चौरभय, अग्निभय, वायुभय आदि अभव्य उत्पात नहीं होते हैं। केवल दूध के आहार पर गायत्री मन्त्र का एक लाख जप करने से साधक अपमृत्यु को नष्ट करता है। घृताहार पर निर्भर रहकर एक लाख गायत्री जप करने वाला बहुत ज्ञान-विज्ञान से युक्त मेधा को प्राप्त करता है। यदि सिद्ध किये गये गायत्री मन्त्र से वेतसपत्रों को घृताक्त करके अग्नि में होम किया जाय तो साधक लक्षाधीश की पदवी को प्राप्त होकर सार्वभौमत्व को प्राप्त होता है।

लक्षेण भस्महोमस्य हुत्वा ह्युत्तिष्ठते जलात्। आदित्याभिमुखं स्थित्वा नाभिमात्रजले शुचौ॥
गर्भपातादिप्रदराश्चान्ये स्त्रीणां महारुजः। नाशमेष्यन्ति ते सर्वे मृतवत्सादिदुःखदाः॥
तिलानां लक्षहोमेन घृताक्तानां हुताशने। सर्वकामसमृद्धात्मा परं स्थानमवाप्नुयात्॥
यवानां लक्षहोमेन घृताक्तानां हुताशने। सर्वकामसमृद्धात्मा परां सिद्धिमवाप्नुयात्॥
घृतस्याहुतिलक्षेण सर्वान्कामानवाप्नुयात्। पञ्चगव्याशनो लक्षं जपेज्जातिस्मृतिर्भवेत्॥
तदेव ह्यनले हुत्वा प्राप्नोति बहुशो धनम्। अन्नादिहवनान्नित्यमन्नाद्यं च भवेत्सदा॥
जुहुयात्सर्वसाध्यानामाहुत्याऽयुतसङ्ख्यया। रक्तसिद्धार्थकान् हुत्वा सर्वान् साधयते रिपून्॥
लवणं मधुसंयुक्तं हुत्वा सर्ववशी भवेत्। हुत्वा तु करवीराणि रक्तानि ज्वालयेज्ज्वलम्॥
हुत्वा भल्लातकं तैलं देशादेव प्रचालयेत्। हुत्वा तु निम्बपत्राणि विद्वेषशान्तये नृणाम्॥
रक्तानां तण्डुलानां च घृताक्तानां हुताशने। हुत्वा बलमवाप्नोति शत्रुभिर्न स जीयते॥
ब्रह्मचारी जिताहारो यः सहस्रत्रयं जपेत्। संवत्सरेण लभते धनैश्वर्यं न संशयः॥

भस्म (वायबिडङ्ग) का होम करके जल में एक लाख जप करने के पश्चात् यह हवन यदि सूर्याभिमुख होकर किया जाय तो स्त्रियों के गर्भपात, प्रदर आदि महारोग नष्ट होते हैं (हवन के पास रोगपीड़िता को बिठाना चाहिये)। यदि अग्नि में घृताक्त तिलों से एक लाख होम किया जाय तो साधक की सभी कामनाएँ पूरी होती हैं तथा समृद्धि प्राप्त होती है, उसे ऊँचा पद प्राप्त होता है। यदि यवों को घृताक्त करके एक लाख आहुतियाँ अग्नि में दी जायँ तो उसके सभी मनोरथ पूर्ण होते हैं तथा उसे समस्त सम्पत्ति प्राप्त होती है। एक लाख आहुति घी से देने पर सभी कामनाएँ पूर्ण होती हैं। जो केवल पञ्चगव्य का भोजन करते हुए एक लाख जप करता है, उसे अपने पूर्वजन्म की स्मृति हो जाती है। यदि पञ्चगव्य से ही अग्नि में होम किया जाय तो उसे बहुत धन प्राप्त होता है। नित्य ही गायत्री मन्त्र से अन्नादि का हवन करने से नित्य अन्न की प्राप्ति होती है। जितने साध्य शत्रु हों, उनमें से प्रत्येक के लिये सिद्ध मन्त्र की अयुत संख्या (दस सहस्र) में आहुति लाल सरसों की देने से वे सभी शत्रु वश में हो जाते हैं। यदि लवण एवं मधु की आहुति दी जाय तो सर्ववशीकरण होता है। यदि लाल कनेर के पुष्पों से हवन किया जाय तो शत्रुओं का रक्त जल जाता है। यदि भिलावे के तेल से आहुति दी जाय तो शत्रु को देश से निकलना पड़ता है। नीम के पत्तों से गायत्री मन्त्र से हवन करने से मनुष्यों में परस्पर विद्वेष शान्त हो जाता है। घृताक्त लाल चावलों से अग्नि में हवन करने पर साधक को बल की प्राप्ति होती है तथा शत्रु का भय नहीं रहता है। जो ब्रह्मचारी, जिताहारी रहकर तीन सहस्र गायत्री मन्त्र का जप करता है, उसे एक वर्ष के भीतर धन की प्राप्ति होती है।

शमीबिल्वपलाशानामर्कस्य तु विशेषतः। पुष्पाणां समिधश्चैव हुत्वा हेम ह्यवाप्नुयात्॥
आब्रह्मत्र्यम्बकादीनां यस्यायतनमाश्रितः। जपेल्लक्षं निराहारो स तस्य वरदो भवेत्॥

बिल्वानां लक्षहोमेन घृताक्तानां हुताशने। परां श्रियमवाप्नोति यदि न भ्रूणहा भवेत्॥
पद्मानां लक्षहोमेन घृताक्तानां हुताशने। प्राप्नोति राज्यमखिलं सुसम्पन्नमकण्टकम्॥
पञ्चविंशतिलक्षेण दधि क्षीरं हुताशने। स्वदेहे सिद्ध्यते जन्तुः कौशिकस्य मतं तथा॥
एकाहं पञ्चगव्याशी एकाहं मारुताशनः। एकाहं च द्विजोन्नाशी गायत्रीजप उच्यते॥
महारोगा विनश्यन्ति लक्षजप्यानुभावतः। स्नात्वा शतेन गायत्र्याः शतमन्तर्जले जपेत्।
शतेन यस्त्वपः पीत्वा सर्वपापैः प्रमुच्यते॥
गोघ्नः पितृघ्नमातृघ्नौ ब्रह्महा गुरुतल्पगः। स्वर्णहारी तैलहारी यस्तु विप्रः सुरां पिबेत्॥
चन्दनद्वयसंयुक्तं कर्पूरं तण्डुलं यवम्। लवङ्गं सुफलं चाज्यं सिता चाम्रस्य दारुकैः॥
अयं न्यूनविधिः प्रोक्तो गायत्र्याः प्रीतिकारकः। एवं कृते महासौख्यं प्राप्नोति साधको ध्रुवम्॥
अन्नाज्यभोजनं हुत्वा कृत्वा वा कर्म गर्हितम्। न सीदेत्प्रतिगृह्णानो महीमपि ससागराम्॥
ये चास्य उत्थिता लोके ग्रहाः सूर्यादयो भुवि। ते यान्ति सौम्यतां सर्वे शिवे इति न संशयः॥

इति गायत्रीपुरश्चरणं समाप्तम्।

शमीवृक्ष (छेंकुर), पलाश (टेसू) अथवा विशेषकर आक के पुष्पों तथा समिधाओं से हवन करने पर स्वर्ण की प्राप्ति होती है। ब्रह्मा, विष्णु या रुद्र में से जिसके भी मन्दिर में बैठकर गायत्री का एक लाख जप निराहार रहकर किया जाय, वह उसके लिये वरदान देने वाला देव बन जाता है। गायत्री मन्त्र से अग्नि में घृताक्त बेलफलों से एक लाख होम किया जाय, तो यदि वह भ्रूणहा (सन्ततिहीन) न हो तो उसे परासम्पत्ति प्राप्त होती है। कमलों से एक लाख गायत्री होम घृताक्त करके करने पर सुसम्पन्न एवं अकण्टक पूर्णाधिकारयुक्त राज्य (अधिकार) प्राप्त होता है। यदि सिद्ध गायत्री मन्त्र से पच्चीस लाख हवन दधि एवं क्षीर के द्वारा किया जाय तो उस साधक को देहसिद्धि प्राप्त हो जाती है, यह कौशिक का मत है। एक दिन पञ्चगव्य का आहार करके तथा एक दिन केवल वायु का आहार करे, एक दिन ब्राह्मण का अन्न खाये तथा गायत्री मन्त्र का जप करे तो ऐसे एक लाख जप से साधक के बड़े-बड़े कठिन रोग नष्ट हो जाते हैं। एक सौ बार गायत्री मन्त्र से जल में स्नान कर फिर जल में ही स्थित होकर तथा एक सौ बार मन्त्रोच्चार के साथ जलमात्र पीकर जो गायत्री का जप करता है, वह सभी पापों से मुक्त हो जाता है। गोहत्यारा, पितृहत्यारा, मातृहत्यारा, ब्रह्महत्यारा, गुरुपत्नीगमन करने वाला, स्वर्णहारी, तैलहारी व्यक्ति तथा सुरापायी ब्राह्मण—ये सब पूर्वोक्त विधि से जल में गायत्री जप करके फिर श्वेत चन्दन, लाल चन्दन, कर्पूर, चावल, यव, लौंग, अनार, घृत, शर्करा का हवन आम्र की समिधा के साथ करने से पापयुक्त हो जाते हैं। यह संक्षिप्त विधि बताई गई है, जो गायत्री के लिये प्रीतिकारक है। ऐसा करने से साधक को निश्चित ही महासौख्य प्राप्त होता है। अन्नाज्य का भोजन बनाकर उसका होम करने से तथा गर्हित कर्म करने से, प्रतिग्रहग्रहण करने से भी ब्राह्मण दुःख को प्राप्त नहीं होता है। जो भी सूर्यादि ग्रह हैं, वे भी उस (गायत्री जपकर्ता) विप्र के लिये सौम्य तथा शिव हो जाते हैं।

गायत्रीकवचम्

अस्य श्रीगायत्रीकवचस्य ब्रह्मविष्णुरुद्रा ऋषयः। ऋग्यजुःसामाथर्वाणि छन्दांसि। परब्रह्मस्वरूपिणी गायत्री देवता। भूः बीजम्। भुवः शक्तिः। स्वः कीलकम्। श्रीगायत्रीप्रीत्यर्थे जपे विनियोगः।

वर्णास्त्रां कुण्डिकाहस्तां शुद्धनिर्मलज्योतिषीम्। सर्वतत्त्वमयीं वन्दे गायत्रीं वेदमातरम्॥ १॥

अथ ध्यानम्—

मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिन्दुनिबद्धरत्नमुकुटां तत्त्वार्थवर्णात्मिकाम्।
गायत्रीं वरदाभयाङ्कुशकशां शूलं कपालं गुणं शङ्खं चक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे॥ १॥

गायत्रीकवच—इस गायत्रीकवचस्तोत्र का पाठ जप के पूर्व करना चाहिये। सर्वप्रथम मूल में लिखित 'अस्य श्रीगायत्रीकवचस्य०' इत्यादि मन्त्र से विनियोग कर 'वर्णास्त्रां कुण्डिकाहस्तां०' इत्यादि श्लोक से गायत्री की वन्दना करनी चाहिये। फिर 'मुक्ताविद्रुम०' इत्यादि से ध्यान करने के उपरान्त 'ॐ गायत्री पूर्वतः पातु०' इत्यादि श्लोक से आरम्भ कर पच्चीस श्लोकों वाले गायत्री कवच का पाठ करना चाहिये।

ॐ गायत्री पूर्वतः पातु सावित्री पातु दक्षिणे। ब्रह्मविद्या च मे पश्चादुत्तरे मां सरस्वती॥ १॥
पावकीं मे दिशं रक्षेत्पावकोज्ज्वलशालिनी। यातुधानीं दिशं रक्षेद्यातुधानगणार्दिनी॥ २॥
पावमानीं दिशं रक्षेत्पवमानविलासिनी। दिशं रौद्रीमवतु मे रुद्राणी रुद्ररूपिणी॥ ३॥
ऊर्ध्वं ब्रह्माणी मे रक्षेदधस्ताद्वैष्णवी तथा। एवं दशदिशो रक्षेत्सर्वतो भुवनेश्वरी॥ ४॥
ब्रह्मास्त्रस्मरणादेव वाचां सिद्धिः प्रजायते। ब्रह्मदण्डश्च मे पातु सर्वशस्त्रास्त्रभक्षकः॥ ५॥
ब्रह्मशीर्षस्तथा पातु शत्रूणां वधकारकः। सप्त व्याहृतयः पान्तु स सदाबिन्दुसंयुताः॥ ६॥
वेदमाता च मां पातु सरहस्या सदैवता। देवीसूक्तं सदा पातु सहस्राक्षरदेवता॥ ७॥
चतुःषष्टिकला विद्या दिव्याद्या पातु देवता। बीजशक्तिश्च मे पातु पातु विक्रमदेवता॥ ८॥

ॐ गायत्री पूर्व की ओर से रक्षा करें। सावित्री दक्षिण में रक्षा करें। ब्रह्मविद्या पश्चिम में मेरी रक्षा करें तथा सरस्वती उत्तर में मुझे रक्षित करे। पावक उज्ज्वलशालिनी पावकी दिशा (अग्निकोण) में मेरी रक्षा करें। यातुधानी दिशा (नैर्ऋत्य कोण) में यातुधानगणार्दिनी मेरी रक्षा करें। वायव्य दिशा में पवमान विलासिनी मेरी रक्षा करें। ईशान दिशा में रुद्ररूपिणी रुद्राणी मेरी रक्षा करें। ऊर्ध्व दिशा की रक्षा ब्रह्माणी करे। अधोदिशा की रक्षा वैष्णवी करे। इस प्रकार भुवनेश्वरी मेरी रक्षा दशों दिशाओं से करे। ब्रह्मास्त्र के स्मरण से ही वाचासिद्धि उत्पन्न हो जाती है। सर्वशस्त्रार्थ का भक्षक ब्रह्मदण्ड मेरी रक्षा करें। शत्रुओं का वधकारक ब्रह्मशीर्ष मेरी रक्षा करें। विन्दुसंयुक्त सप्त व्याहृतियाँ मेरी रक्षा करें। सरहस्य, सदेवता वेदमाता मेरी रक्षा करें। सहस्राक्षर देवता देवीसूक्त सदैव मेरी रक्षा करें। चौंसठ कला, दिव्यादि विद्या-विद्याओं के देवता मेरी रक्षा करें। बीजशक्ति तथा विक्रम देवता मेरी रक्षा करें॥ १-८॥

तत्पदं पातु मे पादौ जङ्घे मे सवितुः पदम्। वरेण्यं कटिदेशं तु नाभिं भर्गस्तथैव च॥ ९॥
देवस्य मे तु हृदयं धीमहीति गलं तथा। धियो मे पातु जिह्वायां यः पदं पातु लोचने॥ १०॥
ललाटे नः पदं पातु मूर्द्धानं मे प्रचोदयात्। तद्वर्णः पातु मूर्द्धानं सकारः पातु भालकम्॥ ११॥
चक्षुषी मे विकारस्तु श्रोत्रं रक्षेत्तु कारकः। नासापुटे वकारो मे रेकारस्तु कपोलयोः॥ १२॥
णिकारस्तूर्ध्व ओष्ठे च यकारस्त्वधरोष्ठके। आस्यमध्ये भकारस्तु गौङ्कारस्तु कपोलयोः॥ १३॥
देकारः कण्ठदेशे च वकारः स्कन्धदेशयोः। स्यकारो दक्षिणं हस्तं धीकारो वामहस्तकम्॥ १४॥
मकारो हृदयं रक्षेद्धिकारो जठरं तथा। धिकारो नाभिदेशं तु योकारस्तु कटिद्वयम्॥ १५॥
गुह्यं रक्षतु योकार ऊरू मे नः पदाक्षरम्। प्रकारो जानुनी रक्षेच्चोकारो जङ्घदेशयोः॥ १६॥
दकारो गुल्फदेशं तु यात्कारः पादयुग्मकम्। जातवेदेति गायत्री त्र्यम्बकेति दशाक्षरा॥ १७॥
सर्वतः सर्वदा पातु आपोज्योतीतिषोडशी।

तत्पद मेरे पैरों की रक्षा करें तथा सवितु: पद मेरी जङ्घाओं की रक्षा करें। वरेण्यं पद कटिप्रदेश की रक्षा करें। भर्ग: पद नाभि की रक्षा करें। देवस्य पद मेरे हृदय की तथा धीमहि पद गले की रक्षा करें। धियो: पद मेरी जीभ की रक्षा करें तथा य: पद मेरे नेत्रों की रक्षा करें। ललाट की रक्षा न: पद करे तथा 'वि' अक्षर नेत्रों की एवं 'तु' अक्षर कानों की रक्षा करें। 'व'कार मेरे नासापुटों की रक्षा करें। 'रे'कार कपोलों की रक्षा करें॥ १२॥ 'णि'कार ऊपरी ओंठ की तथा 'य'कार निचले ओंठ की रक्षा करें। मुख के मध्य में 'भ'कार रक्षा करें तथा 'गो:' अक्षर कपोलों की रक्षा करें। 'दे'कार कण्ठदेश की तथा 'व'कार स्कन्धों की रक्षा करें 'स्य'कार दाहिने हाथ की तथा 'धी'कार वाम हस्त की रक्षा करें। मकार हृदय की, 'हि'कार जठर की, 'धि'कार नाभि देश की तथा योकार दोनों कटियों की रक्षा करें। योकार गुह्य की रक्षा करें तथा न: अक्षर ऊरुओं की रक्षा करें। 'प्र' अक्षर घुटनों की तथा 'चो' अक्षर जङ्घाओं की रक्षा करें। दकार गुल्फ (टखनों) की तथा याकार दोनों चरणों की रक्षा करें। जातवेदा गायत्री तथा त्र्यम्बक इत्यादि दशाक्षरा तथा एवं ओर से सब समय 'आपोज्योति०' इत्यादि षोडशी मन्त्र मेरी रक्षा करे॥ ९-१७॥

इदं तु कवचं दिव्यं बाधाशतविनाशनम्॥ १८॥

चतु:षष्टिकलाविद्यासकलैश्वर्य्यसिद्धिदम्। जपारम्भे च हृदयं जपान्ते कवचं पठेत्॥ १९॥

स्त्रीगोब्राह्मणमित्रादिद्रोहाद्यखिलपातकै:। मुच्यते सर्वपापेभ्य: परं ब्रह्माधिगच्छति॥ २०॥

पुष्पाञ्जलिं च गायत्र्या मूलेनैव पठेत्सदा। शतसाहस्त्रवर्षाणां पूजाया: फलमाप्नुयात्॥ २१॥

भूर्जपत्रे लिखित्वैतत्स्वकण्ठे धारयेद्यदि। शिखायां दक्षिणे बाहौ कण्ठे वा धारयेद्बुध:॥ २२॥

त्रैलोक्यं क्षोभयेत्सर्वं त्रैलोक्यं दहति क्षणात्। पुत्रवाञ्धनवाञ्छ्रीमान्नानाविद्यानिधिर्भवेत्॥ २३॥

ब्रह्मादीनि च सर्वाणि तदङ्गस्पर्शनात्तत:। भवन्ति पुष्पतुल्यानि किमन्यत्कथयामि ते॥ २४॥

अभिमन्त्रितगायत्रीकवचं मानसं पठेत्। तज्जलं पिबतो नित्यं पुरश्चर्य्याफलं भवेत्॥ २५॥

इति गायत्रीकवचं सम्पूर्णम्।

इति श्रीबीकानेरराज्यान्तर्गतश्रीरत्नगढ़नगरनिवासिना गौडवंशोद्भवश्रीवसिष्ठगोत्रश्रीरामकृष्णपौत्रेण श्रीकस्तूरीचन्द्रसूनुना श्रीमहादेवभक्तशुक्लयजुर्वेदीयमाध्यन्दिनवाजसनेयीशाखानुयायिना वैद्यपण्डितश्रीचतुर्थीलालशर्मणा विरचिते अनुष्ठानप्रकाशे महानिबन्धे पुरश्चरण(प्रयोग)काण्डे देवीमन्त्रानुष्ठानप्रकरणं तृतीयं समाप्तम्।

यह सैकड़ों बाधाओं का विनाशक दिव्य कवच है। चौंसठ कलाएँ तथा विद्याएँ एवं सम्पूर्ण प्रकार के ऐश्वर्य को देने वाला है। गायत्री मन्त्रजप के आरम्भ में हृदय का पाठ तथा जप के अन्त में गायत्रीकवच का पाठ करने वाला स्त्रीवध, गोवध, ब्राह्मणवध, मित्रादिद्रोह आदि सभी पातकों से मुक्त होकर परंब्रह्म को प्राप्त होता है। पुष्पाञ्जलि को सदैव गायत्री के मूल मन्त्र से देना चाहिये। इससे सैकड़ों, सहस्रों वर्षों की पूजा का फल प्राप्त हो जाता है। जो इस कवच को भोजपत्र पर लिखकर अपने कण्ठ में धारण करता है अथवा शिखा में बाँधता है अथवा दाहिनी भुजा में बाँधता है या कण्ठ में पहिनता है वह तीनों लोकों को क्षोभित करता है तथा तीनों लोकों के दहन का सामर्थ्य रखता है। वह पुत्रवान्, धनवान्, श्रीमान् तथा अनेक विद्याओं से सम्पन्न होता है। ब्रह्मादि देव उसके अङ्ग के स्पर्श से पुष्प के तुल्य हो जाते हैं; इससे अधिक क्या कहा जाय। गायत्री-कवच के मानसिक जप से जल को अभिमन्त्रित करके उस जल का साधक पान करे तो उसका पुरश्चरण सफल हो जाता है॥ १८-२५॥

इस प्रकार पं० चतुर्थीलाल-विरचित अनुष्ठानप्रकाश-महानिबन्ध के तृतीय काण्ड पुरश्चरणकाण्ड के तृतीय प्रकरण देवीमन्त्रानुष्ठान प्रकरण की महर्षि अभय कात्यायन-विरचित हिन्दी टीका पूर्ण हुई॥ ३॥

पुरश्चरण(प्रयोग)काण्डे विष्णुमन्त्रानुष्ठानप्रकरणं चतुर्थम्॥ ४॥

मङ्गलाचरणम्

उद्यत्कोटिदिवाकराभमनिशं शङ्खं गदां पङ्कजं चक्रं बिभ्रतमिन्दिरावसुमतीसंशोभि पार्श्वद्वयम्।
कोटीराङ्गदहारकुण्डलधरं पीताम्बरं कौस्तुभोद्दीप्तं विश्वधरं स्ववक्षसि लसच्छ्रीवत्सचिह्नं भजे॥
अथ वक्ष्ये महामन्त्रान् विष्णोः सर्वार्थसाधकान्। येषां संस्मरणात्सन्तो भवाब्धेः पारमाश्रिताः॥

मङ्गलाचरण—जो निरन्तर कोटि सूर्य के समान देदीप्यमान शंख, गदा, कमल एवं चक्र को धारण किये हैं, जिनके दोनों पार्श्वों में लक्ष्मी तथा पृथिवी सुशोभित हैं, जो पीताम्बर एवं कौस्तुभ मणि से दीप्त हैं, जो विश्व को धारण करने वाले हैं, जिनका वक्षःस्थल श्रीवत्सचिह्न से शोभायमान है, उन श्री विष्णु का मैं भजन करता हूँ।

अब मैं विष्णु के समस्त अर्थों को सिद्ध करने वाले महामन्त्रों को कहता हूँ; जिनके स्मरणमात्र से सन्तजन भवसागर के पार कर जाते हैं॥ १-३॥

सर्वविष्णुमन्त्रोपयोगिप्रयोगः

तत्र तावद्विष्णोः सर्वमन्त्रोपयोगिप्रयोगः; पूर्वदिने प्रायश्चित्तमयुतगात्रीजपं च कृत्वा उपवासादि विधाय प्रारम्भदिने उषसि नद्यादौ स्नात्वा प्रातर्नित्याह्निकं समाप्य मङ्गलस्नानान्ते धौतशुक्लवाससी परिधाय यथायोग्यालङ्कृतो द्वादशाङ्गेषु घृतचन्दनकेशरकुङ्कुमान्यतमतिलकः सपवित्रकुशः स्वासने प्राङ्मुख उपविश्य मूलेनाचम्य प्राणानायम्य शान्तिपाठं गणपत्यादिदेवतास्मरणं च कुर्य्यात्। ततो देशकालौ सङ्कीर्त्य 'ममात्मनः श्रुतिस्मृतिपुराणोक्तफलावाप्तये इह जन्मनि जन्मान्तरे वा कृतकायिकवाचिकमानसिकसांसर्गिकमहापातकोपपातकादिसमस्तपातकनिवृत्तिद्वारा धर्मार्थकाममोक्ष-सिद्ध्यर्थं श्रीपरमेश्वरप्रीत्यर्थं श्रीविष्णोरमुकमन्त्रपुरश्चरणं स्वयं ब्राह्मणद्वारा वा करिष्ये; तदङ्गत्वेन श्रीगणपतिपूजनं पुण्याहवाचनं मातृकापूजनं नान्दीश्राद्धमाचार्यजापकवरणं च करिष्ये' इति सङ्कल्प्य पूर्वोक्तपद्धतिकाण्डमार्गेण दिग्रक्षणान्तं सर्वं विधाय 'ॐ भद्रं कर्णेभिः' इत्यादिवेदघोषेण जपस्थानसमीपमागत्य पूर्ववत् द्वारपूजां कृत्वा प्रविश्य कूर्म्मसंशोधिते स्वासने प्राङ्मुख उदङ्मुखो वा उपविश्य स्ववामे कर्म्मपात्रं यथाविधि संस्थापयेत्। ततः 'ॐ अपवित्र०' इत्यादिप्रोक्षणं विधाय 'पृथ्वि त्वया०' इत्यादिना भूमिं प्रार्थ्य मूलेनाचम्य प्राणानायम्य देशकालौ स्मृत्वा 'मम (यजमानस्य वा) सर्वविधपातकनिवृत्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थं श्रीविष्णोरमुकमन्त्रस्य अमुकसङ्ख्यया जपं करिष्ये; तदङ्गत्वेन भूतशुद्धिं प्राणप्रतिष्ठामन्तर्मातृकाबहिर्मातृकान्यासं केशवादिकलान्यासं च करिष्ये' इति सङ्कल्प्य पद्धतिमार्गोक्तविधिना बहिर्न्यासान्तं कृत्वा केशवादिकलामातृकान्यासं कुर्य्यात्।

विष्णु के समस्त मन्त्रों में उपयोगी प्रयोग—अनुष्ठानारम्भ के एक दिन पूर्व प्रायश्चित्त करके एक अयुत गायत्रीजप करके उपवासादि करे। फिर अनुष्ठान प्रारम्भ के दिन प्रातःकाल नदी आदि में स्नान कर प्रातः के नित्य आह्निक कर्म को समाप्त कर मङ्गलस्नान करने के पश्चात् धुले हुए श्वेत वस्त्र (धोती-उपरना) पहिनकर यथायोग्य अलंकृत होकर शरीर के द्वादश अङ्गों में चन्दन, केसर, कुङ्कुम का तिलक लगाकर हाथ में पवित्री पहिनकर अपने आसन पर पूर्वाभिमुख होकर बैठे तथा मूल मन्त्र से प्राणायाम कर शान्तिपाठ, गणपति इत्यादि देवता का स्मरण करे। फिर देश-कालादि का स्मरण कर 'ममात्मनः इह जन्मनि जन्मान्तरे वा कृतकायिक-वाचिक-मानसिक-सांसर्गिक-महापातकोपपातकादि-समस्त-पातक-निवृत्तिद्वारा धर्मार्थकाममोक्षसिद्ध्यर्थं श्रीपरमेश्वरप्रीत्यर्थं

श्रीविष्णोरमुकमन्त्रपुरश्चरणं स्वयं वा ब्राह्मणद्वारा करिष्ये; तदङ्गत्वेन श्रीगणपतिपूजनं, पुण्याहवाचनं मातृकापूजनं नान्दीश्राद्धमाचार्यजापकवरणं च करिष्ये' ऐसा सङ्कल्प करे। फिर पूर्वोक्त पद्धतिकाण्ड में बताई गई विधि से दिग्-रक्षण-पर्यन्त सभी पूर्वकर्मों को करके 'ॐ भद्रं कर्णेभिः' इत्यादि वैदिक मन्त्रों (भद्रसूक्त) का पाठ करते हुए जपस्थान के समीप आकर पूर्व की भाँति द्वारपूजा करके भीतर प्रविष्ट होकर कूर्म-संशोधित स्वासन पर पूर्वमुख अथवा उत्तरमुख बैठकर अपने वाम भाग में कर्मपात्र को स्थापित कर 'ॐ अपवित्रः पवित्रो वा०' इत्यादि मन्त्र से प्रोक्षण करके 'ॐ पृथ्वि त्वया धृता लोका०' इत्यादि मन्त्र से भूमि की प्रार्थना कर मूल मन्त्र (जो भी हो) से आचमन तथा प्राणायाम कर देश-काल का स्मरण करके 'मम (यजमानस्य वा) सर्वपातकनिवृत्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थं श्रीविष्णोरमुकमन्त्रस्य अमुकसंख्यया जपं करिष्ये; तदङ्गत्वेन भूतशुद्धिप्राणप्रतिष्ठामन्तर्मातृका-बहिर्मातृकान्यासं केशवकलान्यासञ्च करिष्ये' ऐसा सङ्कल्प करके पद्धतिकाण्ड में वर्णित विधि से बहिर्न्यास करके केशवकलामातृकान्यास करे।

केशवादिकलान्यासः

ॐ केशवादिमातृकान्यासस्य साध्यनारायण ऋषिः। गायत्री छन्दः। लक्ष्मीनारायणो देवता। हलो बीजानि। स्वराः शक्तयः। विष्णोरमुकमन्त्रजपाङ्गत्वेन न्यासे विनियोगः।' ॐ साध्यनारायणऋषये नमः शिरसि॥ १॥ गायत्रीछन्दसे नमः मुखे॥ २॥ लक्ष्मीनारायणदेवतायै नमः हृदये॥ ३॥ ॐ हल्बीजेभ्यो नमः गुह्ये॥ ४॥ ॐ स्वरशक्तिभ्यो नमः पादयोः॥ ५॥ इति ऋष्यादिन्यासः॥ ॐ ह्रीं हृदयाय नमः॥ १॥ ॐ श्रीं शिरसे स्वाहा॥ २॥ ॐ क्लीं शिखायै वषट्॥ ३॥ ॐ ह्रीं कवचाय हुं॥ ४॥ ॐ श्रीं नेत्रत्रयाय वौषट्॥ ५॥ ॐ क्रीं अस्त्राय फट्॥ ६॥ इति षडङ्गन्यासं कृत्वा ध्यायेत्—

शङ्खचक्रगदापद्मकुम्भाऽऽदर्शाब्जपुस्तकम्। बिभ्रतं मेघचपलावर्णं लक्ष्मीहरिं भजे॥

अथवा—

विद्यारविन्दमुकुरामृतकुम्भपद्मकौमोदकीदरसुदर्शनशोभिहस्तम्।
सौदामिनीमकरकान्ति विभाति लक्ष्मीनारायणात्मकमखण्डितमादिमूर्ति॥

इति ध्यात्वा न्यासं कुर्यात्। तद्यथा—ॐ ह्रींश्रींक्लीं अंक्लींश्रींह्रीं ॐ केशवकीर्तिभ्यां नमः शिरसि॥ १॥ ॐ ह्रींश्रींक्लीं आँक्लींश्रींह्रीं ॐ नारायणकान्तिभ्यां नमः मुखवृत्ते॥ २॥ ॐ ह्रींश्रींक्लींइंश्रींह्रींक्लीं ॐ माधवतुष्टिभ्यां नमः दक्षनेत्रे॥ ३॥ ॐ ह्रींश्रींक्लींईंक्लींश्रींह्रीं ॐ गोविन्दपुष्टिभ्यां नमः वामनेत्रे॥ ४॥ ॐ ह्रींश्रींक्लीं उं क्लींश्रींह्रीं ॐ विष्णुधृतिभ्यां नमः दक्षकर्णे॥ ५॥ ॐ ह्रींश्रींक्लीं ॐ क्लींश्रींह्रीं ॐ मधुसूदनशान्तिभ्यां नमः वामकर्णे॥ ६॥ ॐ ह्रींश्रींक्लींऋंक्लींश्रींह्रीं ॐ त्रिविक्रमक्रियाभ्यां नमः दक्षनासापुटे॥ ७॥ ॐ ह्रींश्रींक्लींॠंक्लींश्रींह्रीं ॐ वामनदयाभ्यां नमः वामनासापुटे॥ ८॥ ॐ ह्रींश्रींक्लींलृंक्लींश्रींह्रीं ॐ श्रीधरमेधाभ्यां नमः दक्षगण्डे॥ ९॥ ॐ ह्रींश्रींक्लींलॄंक्लींश्रींह्रीं ॐ हृषीकेशहर्षाभ्यां नमः वामगण्डे॥ १०॥ ॐ ह्रींश्रींक्लींएंक्लींश्रींह्रीं ॐ पद्मनाभश्रद्धाभ्यां नमः ऊर्ध्वोष्ठे॥ ११॥ ॐ ह्रींश्रींक्लींऐंक्लींश्रींह्रीं ॐ दामोदरलज्जाभ्यां नमः अधरोष्ठे॥ १२॥ ॐ ह्रींश्रींक्लींओंक्लींश्रींह्रीं ॐ वासुदेवलक्ष्मीभ्यां नमः ऊर्ध्वदन्तपङ्क्तौ॥ १३॥ ॐ ह्रींश्रींक्लींऔंक्लींश्रींह्रीं ॐ सङ्कर्षणसरस्वतीभ्यां नमः अधोदन्तपङ्क्तौ॥ १४॥ ॐ ह्रींश्रींक्लींअंक्लींश्रींह्रीं ॐ प्रद्युम्नप्रीतिभ्यां नमः मूर्ध्नि॥ १५॥ ॐ ह्रींश्रींक्लींअःक्लींश्रींह्रीं ॐ अनिरुद्धरतिभ्यां नमः मुखे॥ १६॥ ॐ ह्रींश्रींक्लींकंक्लींश्रींह्रीं ॐ चक्रिजयाभ्यां नमः दक्षबाहुमूले॥ १७॥ ॐ ह्रींश्रींक्लींखंक्लींश्रींह्रीं ॐ गदिदुर्गाभ्यां नमः दक्षकूर्परे॥ १८॥ ॐ ह्रींश्रींक्लींगंक्लींश्रींह्रीं ॐ शार्ङ्गिप्रभाभ्यां नमः दक्षमणिबन्धे॥ १९॥ ॐ ह्रींश्रींक्लींघंक्लींश्रींह्रीं ॐ खड्गिसत्याभ्यां नमः दक्षहस्ताङ्गुलिमूले॥ २०॥ ॐ ह्रींश्रींक्लींङंक्लींश्रींह्रीं

पश्चिमे—ॐ मदनप्रियायै नमः ॥ १ ॥ ॐ समाराध्यै नमः ॥ २ ॥ ॐ नन्दिन्यै नमः ॥ ३ ॥ ॐ रिपुमर्दिन्यै नमः ॥ ४ ॥ ॐ षष्ठ्यै नमः ॥ ५ ॥ ॐ दण्डिन्यै नमः ॥ ६ ॥ ॐ तिग्मायै नमः ॥ ७ ॥ ॐ दुर्गायै नमः ॥ ८ ॥ ॐ गायत्र्यै नमः ॥ ९ ॥ ॐ निरवद्यायै नमः ॥ १० ॥ ॐ विशालाक्ष्यै नमः ॥ ११ ॥ इति पूजयेत्।

उत्तरे—ॐ श्वासोद्वाहायै नमः ॥ १ ॥ ॐ वनादिन्यै नमः ॥ २ ॥ ॐ वेदनायै नमः ॥ ३ ॥ ॐ वह्निगर्भायै नमः ॥ ४ ॥ ॐ सिंहवाहायै नमः ॥ ५ ॥ ॐ धुर्यायै नमः ॥ ६ ॥ ॐ दुर्विषहायै नमः ॥ ७ ॥ ॐ गिरंसायै नमः ॥ ८ ॥ ॐ तापहारिण्यै नमः ॥ ९ ॥ ॐ त्यक्तदोषायै नमः ॥ १० ॥ ॐ निस्सपत्नायै नमः ॥ ११ ॥ इति पूजयेत्।

ततो भूपुरे पूर्वादिक्रमेण इन्द्रादीन् दशदिक्पालान् तद्बाह्ये वज्राद्यायुधानि च पूजयेत्। एवमावरणपूजां कृत्वा धूपादिनमस्कारान्तं सम्पूज्य यथाविधि जपं कुर्यात्।

पीठपूजा—(सर्वतोभद्रमण्डल में षट्कोणाङ्कित कर्णिका में वक्ष्यमाण पीठ देवी का पूजन करे।) 'मण्डूकादिपरतत्त्वान्तपीठदेवताभ्यो नमः' कहकर पीठ का पूजन कर मूलोक्त 'ॐ जयायै नमः' इत्यादि ९ मन्त्रों से

नौ पीठशक्तियों की पूजा करे। फिर 'ॐ वज्रनखदंष्ट्रायुधाय महासिंहाय हुं फट् नमः' इस मन्त्र से आसन देकर मूलमन्त्र से मूर्ति की कल्पना कर उसमें देवताओं का आवाहन कर पाद्यादि पुष्पान्त उपचारों से पूजा कर आवरण-पूजा करनी चाहिये।

आवरणपूजा—षट्कोण में आग्नेयादि कोणकेसरों में, मध्य में तथा दिशाओं में पूर्वोक्त हृदयादि छः अङ्गों का पूजन कर उसके बाहर अष्टदल कमल में प्राचीक्रम से 'ॐ जातवेदसे नमः' इत्यादि आठ मन्त्रों से पूजा करे। फिर पूर्वादि दिशाओं में प्रदक्षिणक्रम से 'ॐ पृथिव्यै नमः' इत्यादि चार मन्त्रों से पूजा करे। फिर कोणों के दलाग्रों में 'ॐ निवृत्त्यै नमः' इत्यादि शेष मन्त्रों से पूजा करे। फिर पूर्वादि दिशाओं में प्रदक्षिणक्रम से प्रत्येक दिशा की ग्यारह-ग्यारह शक्तियों की पूजा पूर्व में 'ॐ जागृतायै नमः' इत्यादि ग्यारह मन्त्रों से एक साथ एक स्थान पर पूजा करे। फिर दक्षिण में 'ॐ मरुद्वेगायै नमः' इत्यादि ग्यारह मन्त्रों से पूजा करे। फिर पश्चिम में 'ॐ मदनप्रियायै नमः' इत्यादि ग्यारह मन्त्रों से पूजा करके उत्तर में 'ॐ श्वासोद्वाहायै नमः' इत्यादि ग्यारह मन्त्रों से पूजा करे। फिर भूपुर में पूर्वादिक्रम से इन्द्रादि दश दिक्पालों को उनके नाममन्त्रों से इस प्रकार पूजे—'ॐ इन्द्राय नमः, ॐ अग्नये नमः, ॐ यमाय नमः, ॐ निर्ऋतये नमः, ॐ वरुणाय नमः, ॐ वायवे नमः, ॐ सोमाय नमः, ॐ ईशानाय नमः, ॐ ब्रह्मणे नमः तथा ॐ अनन्ताय नमः' यह दश दिक्पालों का पूजन होता है। पुनः उनके समीप उनके आयुधों का इस प्रकार पूजन करना चाहिये—'ॐ वज्राय नमः, ॐ शक्तये नमः, ॐ दण्डाय नमः, ॐ खड्गाय नमः, ॐ पाशाय नमः, ॐ ध्वजाय नमः, ॐ गदायै नमः, ॐ त्रिशूलाय नमः, ॐ पद्माय नमः तथा ॐ चक्राय नमः'। इस प्रकार आवरण-पूजा करके धूपादि नमस्कारान्त पूजा सम्पन्न कर यथाविधि जप प्रारम्भ करे।

अस्य पुरश्चरणं चतुश्चत्वारिंशत्सहस्र ४४००० जपः। तथा च शारदायाम्—

मन्त्रवर्णसहस्राणि जपेन्मन्त्रं विशालधीः। तदन्ते तिलसिद्धार्थचित्रमूलैः समिद्वरैः॥
क्षीरद्रुमाणामाज्येन हविषान्नैर्घृतान्वितैः। चतुश्चत्वारिंशदाढ्यं चतुःशतसमन्वितम्॥
चतुःसहस्रं जुहुयादर्चिते हव्यवाहने। इत्थं जपादिभिः सिद्धे मन्त्रेऽस्मिन्साधकोत्तमः॥

इति शारदातिलकोक्तं जातवेदोमन्त्रपुरश्चरणं समाप्तम्।

पुरश्चरण—इसका पुरश्चरण चौवालीस सहस्र मन्त्रों से होता है; जैसा कि शारदातिलक नामक तन्त्रग्रन्थ में वर्णित है—जितने मन्त्र के अक्षर हैं, उतने सहस्र जप को विशाल बुद्धि साधक को जपना चाहिये। उसके अन्त में काले तिल, सफेद सरसों, चित्रक की जड़, क्षीरीवृक्षों (वट, पीपल, पाकर, गूलर, जामुन, आम आदि) की समिधाओं से होम करना चाहिये। होम की संख्या चौवालीस सौ होनी चाहिये। घृत तथा हविष्यान्न का प्रयोग भी हवन में करना चाहिये। (इसके साथ तर्पण, मार्जन तथा ब्राह्मणभोजन भी दशांश के अनुपात में कराना आवश्यक है)। ऐसा करने से मन्त्र सिद्ध हो जाता है।

ज्वरहरणाऽपामार्जनस्तोत्रम्

महादेव उवाच—

अथातः सम्प्रवक्ष्यामि अपामार्जनमुत्तमम्। पुलस्त्येन यथोक्तं तु दालभ्याय महात्मने॥ १॥
सर्वेषां रोगदोषाणां नाशनं मङ्गलप्रदम्। तत्तेऽहं तु प्रवक्ष्यामि शृणु त्वं नगनन्दिनि॥ २॥

ज्वर अपामार्जनस्तोत्र—श्रीमहादेव जी बोले—अब मैं उत्तम अपामार्जन कहता हूँ, जिसे पुलस्त्य ऋषि ने महात्मा दाल्भ्य को बताया था। यह सभी रोगदोषों को दूर कर मङ्गल करने वाला है। हे पार्वति! उसे तुम सुनो॥ १-२॥

श्रीदाल्भ्य उवाच—

भगवान्प्राणिनः सर्वे विषरोगाद्युपद्रवैः। कुष्ठग्रहाभिभूताश्च सर्वकाले ह्युपद्रुताः॥ ३॥
अभिचारिककृत्याद्या बहुरोगाश्च दारुणाः। न भवन्ति मुनिश्रेष्ठ तन्मे त्वं वक्तुमर्हसि॥ ४॥

श्री दाल्भ्य बोले—हे भगवन्! सभी प्राणी सर्वकाल में विष, रोग, कुष्ठ तथा ग्रह (भूत-प्रेतादि) के उपद्रवों से पीड़ित रहते हैं। कृत्या आदि अभिचार कृत्यों, बहुत से दारुण रोगों से पीड़ित होते हैं; उन्हें ये पीड़ाएँ न हों, ऐसा उपाय आप बताइये॥ ३-४॥

पुलस्त्य उवाच—

व्रतोपवासनियमैर्विष्णुर्वै तोषितस्तु यैः। ते नरा नैव रोगार्ता जायन्ते मुनिसत्तम॥ ५॥
यैर्न कृतं व्रतं पुण्यं न दानं न तपस्तदा। न तीर्थं देवपूजां च नान्नं दत्तं तु भूरिशः॥ ६॥
ते वै लोकास्तदा ज्ञेया रोगदोषैः प्रपीडिताः। आरोग्यं परमामृद्धिं मनसा यद्यदिच्छति॥ ७॥
तत्तदाप्नोत्यसन्दिग्धं विष्णोः सेवी विशेषतः। नाधिं प्राप्नोति न व्याधिं न विषग्रहबन्धनम्॥ ८॥
कृत्यास्पर्शभयं नापि तोषिते मधुसूदने। समस्तदोषनाशश्च सर्वदा च शुभा ग्रहाः॥ ९॥
देवानामप्यधृष्योऽसौ तोषिते च जनार्दने। यः सर्वेषु च भूतेषु यथात्मनि तथा परे॥ १०॥
उपवासादिना तेन तोषितो मधुसूदनः। तोषिते तत्र जायन्ते नराः पूर्णमनोरथाः॥ ११॥
अरोगाः सुखिनो भोगभोक्तारो मुनिसत्तम। तेषां च शत्रवो नैव न च रोगाभिचारिकम्॥ १२॥
ग्रहरोगादिकं चैव पापकार्यं न जायते। अव्याहतानि कृष्णस्य चक्रादीन्यायुधानि वै॥ १३॥
रक्षन्ति सकलापद्भ्यो येन विष्णुरुपासितः।

पुलस्त्य जी बोले—जो लोग व्रत-उपवास-नियम आदि से विष्णु को तुष्ट करते हैं, हे मुनिसत्तम! वे लोग रोगों से पीड़ित नहीं होते हैं। जिसके द्वारा व्रत-दान-पुण्य-तप-तीर्थाटन-पूजा तथा अन्नदान आदि में से कुछ नहीं किया गया होता है, वे ही लोग रोग-दोषों से पीड़ित होते हैं; परन्तु जो लोग भगवान् की आराधना तथा व्रतादि करते हैं, उन्हें व्याधि, विष, ग्रह, बन्धन आदि का कष्ट नहीं होता है। उनको आरोग्य, समृद्धि आदि जिस-जिस पदार्थ की कामना मन से होती है, वे-वे सब उन्हें प्राप्त होते हैं। विष्णुसेवी को आधि-व्याधि, कृत्या आदि का कोई भय नहीं होता है। उन मधुसूदन को तुष्ट करने वालों के समस्त दोषों का नाश हो जाता है तथा ग्रह सदैव शुभ रहते हैं। जनार्दन के तुष्ट होने पर वह देवताओं से भी पराभूत नहीं होता है। जो उपवासादि से मधुसूदन को तुष्ट करता है, उससे उसके मनोरथ पूर्ण हो जाते हैं। वे लोग निरोगी, सुखी, भोग भोगने वाले हो जाते हैं। हे मुनिश्रेष्ठ! उनको न तो शत्रुभय होता है, न ही अभिचार कर्म का भय होता है। वह न पाप कर्म करते हैं और न उन्हें ग्रह तथा रोगों से पीड़ा होती है। उनकी रक्षा कृष्ण के चक्र आदि आयुध अव्याहत रूप से करते रहते हैं। जिसके द्वारा विष्णु की उपासना होती है, उसकी सम्पूर्ण आपदाओं से रक्षा होती है॥ ५-१३॥

श्रीदाल्भ्य उवाच—

अनाराधितगोविन्दा ये नरा दुःखभागिनः। तेषां दुखाभिभूतानां यत्कर्तव्यं दयालुभिः॥ १४॥
पश्यद्भिः सर्वभूतस्थं वासुदेवं सनातनम्। समदृष्टिभिरप्यत्र तन्मे ब्रूहि विशेषतः॥ १५॥

दाल्भ्य बोले—जो लोग गोविन्द की आराधना नहीं करते हैं, वे दुःख के भागी होते हैं। उनके दुःखपीड़ित होने पर दयालु महापुरुषों ने सभी प्राणियों के लिये वासुदेव सनातन को देखते हुए समदृष्टि होकर जो उपाय बताये हैं, उनको मुझसे कहो॥ १४-१५॥

श्रीपुलस्त्य उवाच—

तद्वक्ष्यामि मुनिश्रेष्ठ समाहितमनाः शृणु। रोगदोषाशुभहरं विज्वरादिविनाशनम्॥ १६॥
शिखायां श्रीधरं न्यस्य शिखाधः श्रीकरं तथा। हृषीकेशं तु केशेषु मूर्ध्नि नारायणं परम्॥ १७॥
ऊर्ध्वश्रोत्रे न्यसेद्विष्णुं ललाटे जलशायिनम्। विभुं वै भ्रूयुगे न्यस्य भ्रूमध्ये हरिमेव च॥ १८॥
नरसिंहं नासिकाग्रे कर्णयोरर्णवेशयम्। चक्षुषोः पुण्डरीकाक्षं तदधो भूधरं न्यसेत्॥ १९॥
कपोलयोः कल्किनाथं वामनं कर्णमूलयोः। शङ्खिनं शङ्खयोर्न्यस्य गोविन्दं वदने तथा॥ २०॥
मुकुन्दं दन्तपंक्तौ तु जिह्वायां वाक्पतिं तथा। रामं हनौ तु विन्यस्य कण्ठे वैकुण्ठमेव च॥ २१॥
बलघ्नं बाहुमूलाधश्चांसयोः कंसघातिनम्। अजं भुजद्वये न्यस्य शार्ङ्गपाणिं करद्वये॥ २२॥
सङ्कर्षणं कराङ्गुष्ठे गोपमङ्गुलिपङ्क्तिषु। वक्षस्यधोक्षजं न्यस्य श्रीवत्सं तस्य मध्यतः॥ २३॥
स्तनयोस्त्वनिरुद्धं च दामोदरमथोदरे। पद्मनाभं तथा नाभौ नाभ्यधश्चापि केशवम्॥ २४॥
मेढ्रे धराधरं देवं गुदे चैव गदाग्रजम्। पीताम्बरधरं कट्यामूरुयुग्मे मधोर्द्विषम्॥ २५॥
मुरद्विषं पिण्डिकयोर्जानुयुग्मे जनार्दनम्। फणीशं गुल्फयोर्न्यस्य पादयोश्च त्रिविक्रमम्॥ २६॥
पादाङ्गुष्ठे श्रीपतिं च पादाधो धरणीधरम्। रोमकूपेषु सर्वेषु विष्वक्सेनं न्यसेद्बुधः॥ २७॥
मत्स्यं मांसे तु विन्यस्य कूर्मं मेदसि विन्यसेत्। वाराहं तु वसामध्ये सर्वास्थिषु तथाच्युतम्॥ २८॥
द्विजप्रियं तु मज्जायां शुक्रे श्वेतपतिं तथा। सर्वाङ्गे यज्ञपुरुषं परमात्मानमात्मनि॥ २९॥

पुलस्त्य बोले—हे मुनिश्रेष्ठ! समाहित मन से सुनो। जो रोग-दोष का उपशमन, ज्वर आदि का विनाशन है, उसे सुनो। शिखा में श्रीधर का न्यास कर शिखा के नीचे श्रीकर का न्यास करे। केशों में हृषीकेश का तथा शिर में नारायण का, कानों से ऊपर विष्णु का, ललाट में जलशायी का, भौंहों में विभु का, भ्रूमध्य में हरि का न्यास करना चाहिये। नरसिंह को नासिका के अग्रभाग में, कर्णों में अर्णवशायी (बालमुकुन्द) का, नेत्रों में पुण्डरीकाक्ष का और उनके नीचे भूधर का न्यास करे। कपोलों में कल्किनाथ, कर्णमूलों में वामन, शङ्खप्रदेशों में शङ्खी तथा मुख में गोविन्द का न्यास करे। दन्तपङ्क्ति में मुकुन्द, जिह्वा में वाक्पति, हनु में राम का न्यास करे तथा कण्ठ में वैकुण्ठ का, बाहुमूल के नीचे बलघ्न का, कन्धों में कंसघाती का, दोनों भुजाओं में अज का न्यास करे। दोनों हाथों में शार्ङ्गपाणि का, कराङ्गुष्ठ में सङ्कर्षण का, अंगुलियों की पङ्क्ति में गोप का, वक्ष में अधोक्षज का तथा उसके मध्य में श्रीवत्स का न्यास करना चाहिये। दोनों स्तनों में अनिरुद्ध का, उदर में दामोदर का, नाभि में पद्मनाभ का, नाभि के नीचे केशव का, मेढ्र में धराधर का, गुदा में गदाग्रज का, कटि में पीताम्बरधर का, दोनों ऊरुओं में मधुद्वेषी का, दोनों पिण्डलियों में मुरद्वेषी का, दोनों घुटनों में जनार्दन का, दोनों गुल्फों में फणीश का तथा दोनों पैरों में त्रिविक्रम का न्यास करना चाहिये। पैरों के अङ्गूठों में पैरों के नीचे धरणीधर का, सभी रोमकूपों में बुद्धिमान् विष्वक्सेन का

न्यास करना चाहिये। मत्स्य को मांस में विन्यस्त कर कूर्म को मेद धातु में न्यास करना चाहिये। वसा में वराह का तथा सभी अस्थियों में अच्युत का न्यास करना चाहिये। द्विजप्रिय का मज्जा में, शुक्र में श्वेतपति का तथा अपने शरीर के सर्वाङ्ग में परमात्मा यज्ञपुरुष का न्यास करना चाहिये॥ १६-२९॥

एवं न्यासविधिं कृत्वा साक्षान्नारायणो भवेत्। यावन्न व्याहरेत्किञ्चित्तावद्विष्णुमयः स्थितः॥ ३०॥
गृहीत्वा तु समूलाग्रान्कुशाञ्शुद्धान्समाहितः। मार्जयेत्सर्वगात्राणि कुशाग्रैरिह शान्तिकृत्॥ ३१॥
विष्णुभक्तो विशेषेण रोगग्रहविषार्दिते। विषार्तानां रोगिणां च कुर्याच्छान्तिमिमां शुभाम्॥ ३२॥
जायते तेन भो विप्र सर्वरोगप्रणाशनम्। नमः श्रीपरमार्थाय पुरुषाय महात्मने॥ ३३॥
अरूपबहुरूपाय व्यापिने परमात्मने। वाराहं नारसिंहं च वामनं च सुखप्रदम्॥ ३४॥
ध्यात्वा कृत्वा नमो विष्णोर्नामान्यङ्गेषु विन्यसेत्। निष्कल्मषाय शुद्धाय व्याधिपापहराय वै॥ ३५॥
गोविन्दपद्मनाभाय वासुदेवाय भूभृते। नमस्कृत्वा प्रवक्ष्यामि यत्तत्सिध्यतु मे वचः॥ ३६॥
त्रिविक्रमाय रामाय वैकुण्ठाय नराय च। श्रीवाराहनृसिंहाय वामनाय महात्मने॥ ३७॥
हयग्रीवाय शुभ्राय हृषीकेशं हराशुभम्। परोपतापमहितं प्रयुक्तं चाभिचारिकम्॥ ३८॥
गरस्पर्शमहारोगप्रयोगं जरया जर। नमोऽस्तु वासुदेवाय नमः कृष्णाय खड्गिने॥ ३९॥
नमः पुष्करनेत्राय केशवायादिचक्रिणे। नमः किञ्जल्कवर्णाग्र्यपीतनिर्मलवाससे॥ ४०॥
महादेववपुष्कन्धधृतचक्राय चक्रिणे। दंष्ट्रोद्धृतक्षितितलत्रिमूर्तिपतये नमः॥ ४१॥
महायज्ञवराहाय श्रीवल्लभ नमोऽस्तु ते। तप्तहाटककेशान्तज्वलत्पावकलोचन॥ ४२॥
वज्राधिकनखस्पर्शदिव्यसिंह नमोऽस्तु ते। कश्यपायातिह्रस्वाय ऋग्यजुःसामलक्षण॥ ४३॥
तुभ्यं वामनरूपाय क्रमते गां नमोनमः। वाराहाशेषदुःखानि सर्वपापफलानि च॥ ४४॥
मर्दमर्द महादंष्ट्र मर्दमर्द च तत्फलम्। नृसिंह कुलिशस्पर्शदन्तप्रान्तनखोज्ज्वल॥ ४५॥
भञ्जभञ्ज निनादेन दुःखान्यस्यार्त्तिनाशन। ऋग्यजुःसामभिर्वाग्भिः कामरूपधराद्रिधृक्॥ ४६॥

इस प्रकार से न्यास करके साधक साक्षात् नारायण हो जाता है। जब तक वह आसन से उठता नहीं है, तब तक उसे विष्णुमय होकर ही स्थित रहना चाहिये। शुद्ध चित्त से समूलाग्र कुशाओं को हाथ में लेकर अपने सम्पूर्ण शरीर का मार्जन कुशाग्र से करके शान्तिलाभ प्राप्त करना चाहिये। विशेष रूप से जो विष्णुभक्त है, उसे रोग-ग्रह-विष आदि से पीड़ित होने पर उनके लिये इस शुभ-शान्ति कर्म को करना चाहिये, जिससे हे विप्र! सर्वरोगों का प्रशमन हो जाय। श्री परमार्थपुरुष महात्मा को नमस्कार है। अरुण होकर भी बहुरूप तथा व्यापी परमात्मा का, वाराह का, नृसिंह का तथा सुखप्रद वामन का ध्यान करके नमस्कार करके उनके नामों का अपने शरीराङ्गों में विन्यास करना चाहिये, जो कि निष्पाप, शुद्ध, व्याधिहर तथा पापहर हैं। गोविन्द, पद्मनाभ, भूभृत् वासुदेव को नमस्कार करके मैं कह रहा हूँ, जिससे मेरी वाणी सिद्ध हो। त्रिविक्रम को, राम को, नर को, वाराह को, नृसिंह को, महात्मा वामन को, हयग्रीव को, शुभ्र को, हृषीकेश को, जो कि अशुभ को हरने वाले, परोपताप, अहितकर अभिचार आदि से मुक्त करने वाले हैं; गर विष का स्पर्श, महारोग का प्रयोग—इनसे तथा जरा से अजर करने वाले वासुदेव कृष्ण खड्गधारी को नमस्कार है। पुष्करनेत्र को नमस्कार है, चक्रधारी केशव को नमस्कार है। किञ्जल्क वर्ण वाले को नमस्कार है, पीतवर्ण निर्मल वस्त्रधारी को नमस्कार है। महादेव शरीर वाले, स्कन्ध पर चक्र धारण करने वाले, दंष्ट्राओं से पृथ्वी का उद्धार करने वाले त्रिमूर्तिपति को नमस्कार है। हे महायज्ञ वराह, श्री वल्लभ! तुम्हें नमस्कार है, हे तप्त स्वर्ण के समान केशान्त वाले, ज्वलिताग्नि के समान नेत्रों वाले, वज्र से भी अधिक कराल नखों

के स्पर्श वाले दिव्य सिंह! आपको नमस्कार है। कश्यप, अतिह्रस्व ऋग्यजुःसाम के लक्षणों वाले वामनरूप होकर भी पृथ्वी को मापने वाले को नमस्कार है, नमस्कार है। हे वराह! आप मेरे अशेष दुःखों का तथा सभी पापफलों का मर्दन करो, मर्दन करो। हे महादंष्ट्र! उन पापों के फलों को मर्दित कर दो, मर्दित कर दो। हे नृसिंह! वज्र के समान स्पर्श वाले, दाँत, नख, दन्तधार तथा उज्ज्वल नखों वाले! अपनी गर्जना से दुःखों एवं पीड़ाओं भञ्जित कर दो, भञ्जित कर दो। आप ऋग्यजुःसाम की वाणी के द्वारा इच्छानुसार रूपधारी तथा गोवर्धनधारी हैं॥ ३०-४६॥

प्रशमं सर्वदुःखानि नय त्वस्य जनार्दन। ऐकाहिकं द्व्याहिकं च तथा त्रिदिवसज्वरम्॥ ४७॥
चातुर्थिकं तथात्युग्रं तथा वै सततज्वरम्। दोषोत्थं सन्निपातोत्थ तथैवागन्तुकज्वरम्॥ ४८॥
शमं नयतु गोविन्दो भित्त्वा छित्त्वास्य वेदिनाम्। नेत्रदुःखं शिरोदुःखं दुःखं तूदरसम्भवम्॥ ४९॥
अनुच्छ्वासं महाश्वासं परितापं सवेपथुम्। गुदघ्राणांघ्रिरोगांश्च कुष्ठरोगं तथा क्षयम्॥ ५०॥
कमलादींस्तथा रोगान् प्रमेहादींश्च दारुणान्। ये वातप्रभवा रोगा लूताविस्फोटकादयः॥ ५१॥
ते सर्वे विलयं यान्तु वासुदेवापमार्जिताः। विलयं यान्ति ते सर्वे विष्णोरुच्चारणेन वा॥ ५२॥
क्षयं गच्छन्तु चाशेषास्ते चक्राभिहता हरेः। अच्युतानन्तगोविन्दनामोच्चारणभेषजात्॥ ५३॥
नश्यन्ति सकला रोगाः सत्यं सत्यं वदाम्यहम्। स्थावरं जङ्गमं यच्च कृत्रिमं चापि यद्विषम्॥ ५४॥
दन्तोद्भवं नखोद्भूतमाकाशाप्रभवं च यत्। भूतादिप्रभवं यच्च विषमत्यन्तदुःसहम्॥ ५५॥
शमं नयतु तत्सर्वं कीर्तितोऽस्य जनार्दनः।

हे जनार्दन! समस्त दुःखों का हरण का उनका शमन कर दो। एकाहिक ज्वर, द्व्याहिक ज्वर, त्र्याहिक ज्वर, अत्युग्र चातुर्थिक ज्वर, सन्तत ज्वर, एकदोषज, द्विदोषज, त्रिदोषज तथा आगन्तुक ज्वर को हे गोविन्द! शान्त कर दो तथा इसकी वेदना का छेदन-भेदन कर दो। नेत्रदुःख, शिरोदुःख, उदरशूल, अनुच्छ्वास, महाश्वास, परिताप (जलन), वेपथु (कँपकँपी), गुदरोग, नासारोग, पैरों के रोग, कुष्ठरोग, क्षयरोग, कामला आदि रोगों; दारुण प्रमेहों, वातरोगों, लूता (मकड़ी), स्फोट (फोटे) आदि सभी रोग वासुदेव के द्वारा अपमार्जित होकर विलीन हो जायँ। वे सब विष्णु के उच्चारण से विलीन हो जायँ। शेष जितने भी रोग हैं, वे श्रीहरि के चक्र से नष्ट हो जायँ। अच्युत, अनन्त तथा गोविन्द के नामोच्चारणरूपी भेषज से सभी रोग नष्ट हो जाते हैं, यह मैं सत्य कहता हूँ। स्थावर विष, जङ्गम विष तथा कृत्रिम विष, दाँतों का विष, नाखूनों का विष, आकाश से वर्षा हुआ विष, भूतादि द्वारा प्रेषित विष, जो भी अत्यन्त विषम तथा दुःस्सह विष हैं, वह सब जनार्दन के नाम-गुणकीर्तन से शान्त हो जायँ॥ ४७-५५॥

ग्रहान् प्रेतग्रहांश्चैव तथान्याच्छाकिनीग्रहान्॥ ५६॥
मुखमण्डलिकान् क्रूरान् रेवतीं वृद्धिरेवतीम्। वृद्धिकाख्यान्ग्रहांश्चोग्रांस्तथा मातृग्रहानपि॥ ५७॥
बालस्य विष्णोश्चरितं हेतुं बालग्रहानपि। वृद्धानां ये ग्रहा केचिद्बालानां चापि ये ग्रहाः॥ ५८॥
नृसिंहदर्शनादेव नश्यन्ते तत्क्षणादपि। दंष्ट्राकरालवदनो नृसिंहो दैत्यभीषणः॥ ५९॥
तं दृष्ट्वा ते ग्रहाः सर्वे दूरं यान्ति विशेषतः। श्रीनृसिंह महासिंह ज्वालामालोज्ज्वलानन॥ ६०॥
ग्रहानशेषान्सर्वेश नुद स्वास्यविलोचन। ये रोगा ये महोत्पाता ये द्विषो ये महाग्रहाः॥ ६१॥
यानि च क्रूरभूतानि ग्रहपीडाश्च दारुणाः। शस्त्रक्षतेषु ये रोगा ज्वालगर्दभिकादयः॥ ६२॥
विस्फोटकादयो ये च ग्रहा गात्रेषु संस्थिताः। त्रैलोक्यरक्षाकर्त्तस्त्वं दुष्टदानववारण॥ ६३॥
सुदर्शनमहातेजश्छिन्धि छिन्धि महाज्वरम्। छिन्धि वातं च लूतां च छिन्धि घोरं महाविषम्॥ ६४॥
उद्दण्डामरशूलं च विषज्वालासगर्दभम्। ॐ ह्रांह्रांहूंहूं प्रधारेण कुठारेण हन द्विषः॥ ६५॥

ग्रह, प्रेतग्रह, अन्य शाकिनी आदि ग्रह, मुखमण्डलिका ग्रह, क्रूर रेवती आदि जो बालकों को पीड़ित करने वाले ग्रह हैं, वे सब नृसिंह के दर्शनमात्र से ही उसी क्षण नष्ट हो जाते हैं। भीषण दैत्य भी दंष्ट्रा कराल मुख वाले नृसिंह को देखकर तथा वे ग्रह भी उनको देखकर दूर से ही पलायन कर जाते हैं। बूढ़ों के ग्रह, मातृगृह, वृद्धिकाख्य ग्रह—ये सभी भाग जाते हैं। श्री नृसिंह महासिंह ज्वालाओं की माला से उज्ज्वल आनन वाले हे सर्वेश! अपनी दृष्टि से इन सभी ग्रहों को भस्म कीजिये। जो रोग हैं, महान् उत्पात हैं; जो शत्रु हैं, जो महाग्रह हैं, जो क्रूर भूत-प्रेतों की दारुण पीड़ा हैं, शस्त्र के घाव से जो रोग उत्पन्न होते हैं, ज़ालगर्दभिका आदि रोग, विस्फोट आदि, जो ग्रह शरीर में स्थित हैं, आप तीनों लोकों के रक्षक तथा दुष्ट दानवों का निवारण करने वाले हैं। हे सुदर्शन महातेजस्वी! आप महाज्वर को काट दो, काट दो, वातरोग को काट दो, लूता (मकड़ी के विष) को काट दो, घोर महाविष को काट दो, उद्दण्डामरशूल, विषज्वाला, ज्वालागर्दभ, ॐ ह्रां ह्रां हूं हूं तेज धार के कुठार से वैरियों को मार दो॥ ५६-६५॥

ॐ नमो भगवते सुदर्शनाय दुःखदारणविग्रह। यानि चान्यानि दुष्टानि प्राणिपीडाकराणि वै॥ ६६॥
तानि सर्वाणि सर्वात्मा परमात्मा जनार्द्दनः। किञ्चिद्रूपं समास्थाय वासुदेव नमोऽस्तु ते॥ ६७॥
क्षिप्त्वा सुदर्शनं चक्रं ज्वालामालाविभीषणम्। सर्वदुष्टोपशमनं कुरु देववराच्युत॥ ६८॥
सुदर्शन महाचक्र गोविन्दस्य वरायुध। तीक्ष्णधार महावेग सूर्यकोटिसमद्युते॥ ६९॥
सुदर्शन महाज्वाल छिन्धि छिन्धि महारव। सर्वदुःखानि रक्षांसि पापानि च विभीषण॥ ७०॥
दुरितं हन चारोग्यं कुरु त्वं भो सुदर्शन। प्राच्यां चैव प्रतीच्यां च दक्षिणोत्तरतस्तथा॥ ७१॥
रक्षां करोतु विश्वात्मा नरसिंहः स्वगर्जितैः। भूम्यन्तरिक्षे च तथा पृष्ठतः पार्श्वतोग्रतः।
रक्षां करोतु भगवान् बहुरूपी जनार्दनः॥ ७२॥
यथा विष्णुमयं सर्वं सदेवासुरमानुषम्। तेन सत्येन सकलं दुःखमस्य प्रणश्यतु॥ ७३॥
यथा योगेश्वरो विष्णुः सर्ववेदेषु गीयते। तेन सत्येन सकलं दुःखमस्य प्रणश्यतु॥ ७४॥
परमात्मा यथा विष्णुर्वेदाङ्गेषु च गीयते। तेन सत्येन विश्वात्मा सुखदोऽस्त्वस्य केशवः॥ ७५॥
शान्तिरस्तु शिवं चास्तु प्रणाशं यातु चासुखम्। वासुदेवशरीरोत्थैः कुशैः सम्मार्जितं मया॥ ७६॥
अपामार्जित गोविन्द नमो नारायणस्तथा। तथापि सर्वदुःखानां प्रशमो वचनाद्धरेः॥ ७७॥
शान्ताः समस्तदोषास्ते ग्रहाः सर्वे विषाणि च। भूतानि च प्रशाम्यन्ति संस्मृते मधुसूदने॥ ७८॥

एते कुशा विष्णुशरीरसम्भवा जनार्दनोऽहं स्वयमेव जाग्रतः।
हतं मया दुःखमशेषमस्य वै स्वस्थो भवत्वेष वचो यथा हरेः॥ ७९॥

शान्तिरस्तु शिवं चास्तु दुःखं च यत् प्रणश्यतु। यदस्य दुरितं किञ्चित्क्षिप्तं तल्लवणाम्भसि॥ ८०॥
स्वास्थ्यमस्य सदैवास्तु हृषीकेशस्य कीर्त्तनात्। यद्योतोत्रागतं पापं तत्तु तत्र प्रगच्छतु॥ ८१॥

हे भगवन् सुदर्शन! जो दुःख के दारण करने वाले हैं, जो अन्य पीड़ाकारक दुष्ट प्राणी हैं, उन सबको हे परमात्मा जनार्दन! आप किसी भी रूप में स्थित होकर नष्ट कर दो। हे वासुदेव! आपको नमस्कार है। ज्वालामाल-विभूषण सुदर्शन चक्र को फेंककर हे देवश्रेष्ठ अच्युत! सभी दुष्टों का प्रशमन कर दो। हे महाचक्र, गोविन्द के श्रेष्ठ आयुध, तीक्ष्ण धार, महावेग तथा करोड़ों सूर्य के समान आभा वाले सुदर्शन, महाज्वाला तथा महारव करने वाले!

सभी भयदायक महापापों, राक्षसों को काट दो-काट दो। दुरितों को समाप्त करो तथा आरोग्य को प्राप्त कराओ। हे सुदर्शन! आप पूर्व से, पश्चिम से, दक्षिण से तथा उत्तर से पापों को नष्ट करो। हे विश्वात्मा नृसिंह! आप अपनी गर्जना से रक्षा करो। भूमि में, अन्तरिक्ष में, पीछे से, आगे से, बहुरूपी जनार्दन भगवान् रक्षा करो। जिस प्रकार से देव, असुर, मानव सबमें विष्णु का निवास है, इसी सत्य से इस रोगी के भी दुःख नष्ट हों। जिस प्रकार योगेश्वर विष्णु की महिमा का गान सभी देवों द्वारा किया जाता है, उस सत्य के द्वारा हे विश्वात्मा केशव! आप इस (पीड़ित) के लिये सुखदायी हों। शान्ति हो, कल्याण हो तथा असुख का नाश हो। मेरे द्वारा वासुदेव के शरीर से उत्पन्न कुशों के द्वारा मार्जन करने से हे अपमार्जित गोविन्द नमोनारायण मेरे वचन से हे हरि सर्वदुःखों का प्रशमन हो जाय। जितने भी दोष हैं, पीड़ाकारक ग्रह हैं, जितने भी विष हैं, हानिकर प्राणी हैं; वे सभी मधुसूदन के स्मरण से शान्त हो जाते हैं। ये कुश विष्णु के शरीर से उत्पन्न हैं तथा मैं स्वयमेव जनार्दन आगे स्थित हूँ। अतः इस रोगी के सभी दुःख शान्त हो जायँ, यह वाणी भगवान् के सत्य होने की भाँति ही सत्य हो। शान्ति हो, कल्याण हो, जो भी दुःख हो, वह नष्ट हो। इस रोगी के जो कुछ भी दुःख हों, वे सब समुद्र में गिर जायँ भगवान् के कीर्तन से सदैव इसका स्वास्थ्य बना रहे और जहाँ-जहाँ से पाप आया हो, वहाँ-वहाँ चला जाय॥ ६६-८१ ॥

एतद्रोगेषु पीडासु जन्तूनां हितमिच्छुभिः। विष्णुभक्तैश्च कर्तव्यमपामार्जनकं परम्॥ ८२॥
अनेके सर्वदुःखानि विलयं यान्त्यशेषतः। सर्वपापविशुद्ध्यर्थं विष्णोश्चैवापमार्जनम्॥ ८३॥
आर्द्रं शुष्कं लघु स्थूलं ब्रह्महत्यादिकं तु यत्। तत्सर्वं नश्यते तूर्णं तमोवद्रविदर्शनात्॥ ८४॥
नश्यन्ति रोगदोषाश्च सिंहात्क्षुद्रमृगा यथा। ग्रहभूतपिशाचादिः श्रवणादेव नश्यतु॥ ८५॥
द्रव्यार्थं लोभपरमैर्न कर्तव्यं कदाचन। कृतेऽपामार्जने किञ्चिन्न ग्राह्यं हितकाम्यया॥ ८६॥
निरपेक्षैः प्रकर्तव्यमादिमध्यान्तबोधकैः। विष्णुभक्तैः सदाशान्तैरन्यथा सिद्धिदं भवेत्॥ ८७॥
अतुलेयं नृणां सिद्धिरियं रक्षा परा नृणाम्। भेषजं परमं ह्येतद्विष्णोर्यदपमार्जनम्॥ ८८॥
उक्तं हि ब्रह्मणा पूर्वं पुलस्त्याय सुताय वै। एतत्पुलस्त्यो हि मुनिर्दालभ्यायोक्तवान्स्वयम्॥ ८९॥
सर्वभूतहितार्थाय दालभ्येन प्रकाशितम्। त्रैलोक्ये तदिदं विष्णोः समाप्तं चापमार्जनम्॥ ९०॥
तवाग्रे कथितं देवि यतो भक्तासि मे सदा। श्रुत्वा तु सर्वं भक्त्या च रोगान्दोषान्व्यपोहति॥ ९१॥

इस अपामार्जन प्रयोग को रोगपीड़ित व्यक्तियों के हित के लिये विष्णुभक्तों को प्रयोग करना चाहिये, इससे सभी दुःख समूल नष्ट हो जाते हैं। यह विष्णु का अपमार्जन सभी पापों की विशुद्धि के लिये है। आर्द्र या शुष्क, लघु या स्थूल जो भी ब्रह्महत्यादिक पाप हैं, वे सब शीघ्र ही इसके प्रयोग से उसी प्रकार नष्ट हो जाते हैं, जैसे सूर्य से अन्धकार नष्ट होता है। जिस प्रकार से सिंह से क्षुद्र मृग भाग जाते हैं, उसी प्रकार इस अपमार्जन स्तोत्र के श्रवणमात्र से ग्रह-भूत-पिशाच आदि नष्ट हो जाते हैं। विष्णुभक्तों को इसका जप (पाठ) निष्काम भाव से भी करते रहना चाहिये। धन के लोभ के लिये इसका प्रयोग किसी रोगी पर नहीं करना चाहिये। यदि किसी का अपमार्जन करे तो बदले में कुछ भी नहीं लेना चाहिये। यदि विष्णुभक्त निष्काम भाव से इसका पाठ करते हैं तो उनको सदैव शान्ति रहती है। यह मनुष्यों का अमोघ रक्षक है, विष्णु का यह अपमार्जन परम भेषज है। इसे पूर्वकाल में ब्रह्माजी ने अपने पुत्र पुलस्त्य को कहा था। पुलस्त्य ने इसे दालभ्य मुनि से कहा। यह सभी प्राणियों के हित के लिये दालभ्य ने प्रकट किया है, इससे तीनों लोकों का हित है। अब यह अपमार्जन समाप्त होता है। तुम मेरी भक्त हो, अतः मैंने तुम्हें इसे बता दिया है। जो इसे भक्तिपूर्वक सुनेगा, उसके सभी रोग तथा दोष नष्ट होंगे॥ ८२-९१ ॥

महादेव उवाच—
अपामार्जनकं दिव्यं परमाद्भुतमेव च। पठितव्यं विशेषेण पुत्रकामार्थसिद्धये॥ ९२॥
एतत्स्तोत्रं पठेत्प्राज्ञः सर्वकामार्थसिद्धये। एककालं द्विकालं वा ये पठन्ति द्विजातयः॥ ९३॥
आयुश्च श्रीर्बलं तस्य वर्द्धयन्ति दिने दिने। ब्राह्मणो लभते विद्यां क्षत्रियो राज्यमेव वा॥ ९४॥
वैश्यो धनसमृद्धिं च शूद्रो भक्तिं च विन्दति। अन्यैश्च लभ्यते भक्तिः पठनाच्छ्रवणाज्जपात्॥ ९५॥
सामवेदफलं तस्य जायते नगनन्दिनि। अखिलं पापसङ्घातं तत्क्षणादेव नश्यति॥ ९६॥
इति ज्ञात्वा तु भो देवि पठितव्यं समाहितैः। पुत्राश्चैव तथा लक्ष्मीः सम्पूर्णा भवति ध्रुवम्॥ ९७॥
लिखित्वा भूर्जपत्रे तु यो धारयति वैष्णवः। इहलोके सुखं भुक्त्वा याति विष्णोः परं पदम्॥ ९८॥
पठित्वा श्लोकमेकं तु तुलसीं यः समर्पयेत्। सर्वं तीर्थं कृतं तेन तुलस्या पूजने कृते॥ ९९॥
एतत्स्तोत्रं तु परमं वैष्णवं मुक्तिदायकम्। पृथ्वीदानसमं पाठाद्विष्णुलोकं तु गच्छति॥ १००॥
जपेत्स्तोत्रं विशेषेण विष्णुलोकस्य वाञ्छया। बालानां जीवनार्थाय पठितव्यं समाहितैः॥ १०१॥
रोगग्रहाभिभूतानां बालानां शान्तिकारकम्। भूतग्रहविषं चैव पठनादेव नश्यति॥ १०२॥
कण्ठे तुलसिजां मालां धृत्वा विप्रो हि यः पठेत्। स च वैष्णवो ज्ञेयो विष्णुलोकं स गच्छति॥ १०३॥
कण्ठे माला धृता येन शङ्खचक्रादिचिह्नितः। वैष्णवः प्रोच्यते विप्रः स्तोत्रं चैतत्पठन्सदा॥ १०४॥
इमं लोकं परित्यज्य विष्णुलोकं स गच्छति। मोहमायापरित्यक्तो दम्भतृष्णाविवर्जितः॥ १०५॥
एतत्स्तोत्रं पठेद्दिव्यं परं निर्वाणमाप्नुयात्। ते धन्याः सन्ति भूर्लोके ये विप्रा वैष्णवाः स्मृताः॥ १०६॥
स्वात्मा वै तारितस्तैस्तु सकुलो नात्र संशयः। ते वै धन्यतमा लोके नारायणपरायणाः॥
तैर्भक्तिश्च सदा कार्या ते वै भागवता नरा॥ १०७॥

इति श्रीपाद्मे महापुराणे उत्तरखण्डे शिवपार्वतीसंवादे अपामार्जनस्तोत्रं सम्पूर्णम्।

श्री महादेव जी बोले—यह परम अद्भुत अपमार्जन है, इसे पुत्र की कामना वालों को अपनी सिद्धि के लिये पढ़ना चाहिये। प्राज्ञ पुरुष को यह स्तोत्र समस्त कामनाओं की सिद्धि के लिये पढ़ना चाहिये। एक समय या दो समय इसे जो द्विजाति पढ़ते हैं, उनके आयु, लक्ष्मी, बल दिन-प्रतिदिन बढ़ते हैं। ब्राह्मण को विद्या प्राप्त होती है। क्षत्रिय को राज्य मिलता है। वैश्य को धन-समृद्धि प्राप्त होती है। शूद्र को भगवान् की भक्ति प्राप्त होती है। अन्यों को भी इसके पठन, श्रवण तथा जप से भक्ति मिलती है। पढ़ने वाले को हे पार्वति! सामवेद का फल मिलता है, उसके सभी पापसमूह तुरन्त ही नष्ट हो जाते हैं। ऐसा जानकर हे देवि! इसे एकाग्रचित्त से पढ़ना चाहिये। पाठक को पुत्र तथा लक्ष्मी सम्पूर्ण रूप में निश्चित ही प्राप्त होती है। जो वैष्णव इस स्तोत्र को भोजपत्र पर लिखकर धारण करता है, वह इस लोक में सुख भोगकर विष्णु के परमपद को प्राप्त होता है। जो इसके एक श्लोक को पढ़कर भगवान् विष्णु को तुलसीपत्र अर्पित करता है, उसे सभी तीर्थों की पूजा का फल मिल जाता है। यह परम स्तोत्र वैष्णव को मुक्ति देने वाला है। इसके पाठ का फल पृथ्वीदान के समान है, इसके पाठ से विष्णुलोक की प्राप्ति होती है। विष्णुलोक की कामना से इस श्लोक का विशेष रूप से जप करना चाहिये। बच्चों के जीवन के लिये इसका पाठ एकाग्र मन से करना चाहिये। यह रोगग्रस्त तथा भूतादि से पीड़ित बालकों के लिये शान्तिदायक है। भूत-ग्रह तथा विष इसको पढ़ने मात्र से नष्ट होते हैं। जो ब्राह्मण कण्ठ में तुलसी की माला पहिन कर इसे पढ़ता है, वह वैष्णव होता है तथा विष्णुलोक को जाता है। जिसने अपने कण्ठ में शङ्ख-चक्र आदि चिह्नों से युक्त माला

पहिनी हो, वह विप्र वैष्णव है, वह इस स्तोत्र को सदैव पढ़े। वह इस लोक को त्याग कर विष्णुलोक को जाता है तथा मोह, माया, दम्भ, तृष्णा से रहित हो जाता है। इस दिव्य स्तोत्र को पढ़ने से परम निर्वाण प्राप्त होता है। वे ब्राह्मण धन्य हैं, जो इस पृथ्वी पर वैष्णव कहे जाते हैं। वे स्वयं को तथा अपने कुल को भी तार लेते हैं; इसमें संशय नहीं है। वे लोग धन्य हैं, जो नारायण-परायण हैं। जो भागवत व्यक्ति हैं, उनको विष्णु की भक्ति सदैव करनी चाहिये॥ ९२-१०८॥

सर्वरोगहरं श्रीमाहेश्वरकवचम्

राजोवाच—

अङ्गन्यासो यदुक्तो भो महेशाक्षरसंयुतः। विधानं कीदृशं तस्य कर्तव्यः केन हेतुना॥ १॥
तद्वदस्व महाभाग विस्तरेण ममाग्रतः।

माहेश्वर कवच—राजा ने पूछा—हे महाभाग! आपने माहेश्वर कवच का जो अङ्गन्यास महेशाक्षर से युक्त बताया है, उसका विधान क्या है और उसे किस हेतु करना चाहिये? उसे विस्तार से मुझे बतायें॥ १॥

भृगुरुवाच—

कवचं माहेश्वरं राजन्देवैरपि सुदुर्लभम्। यः करोति स्वगात्रेषु पूतात्मा स भवेन्नरः॥ २॥
कृत्वा न्यासमिमं यस्तु सङ्ग्रामं प्रविशेन्नरः। न शरास्तोमरास्तस्य खड्गशक्तिपरश्वधाः॥ ३॥
प्रभवन्ति रिपोः क्वापि भवेच्छिवपराक्रमः। व्याधिग्रस्तस्तु यः कश्चित्कारयेच्चैव मार्जनम्॥ ४॥
एकादशकुशैः साग्रैर्मुक्तो भवति नान्यथा। न भूता न पिशाचाश्च कूष्माण्डा न विनायकाः॥ ५॥
शिवस्मरणमात्रेण न विशन्ति कलेवरम्।

ॐ नमः पञ्चवक्त्राय शशिसोमार्कनेत्राय भयार्तानामभयाय मम सर्वगात्ररक्षार्थे विनियोगः।'ॐ हौं हां हं' मन्त्रेणानेन वृषगोमयभस्मनाम्। आमन्त्र्य ललाटे तिलकमादाय पठेत्।

श्री भृगु बोले—हे राजन्! यह माहेश्वर कवच देवों को भी दुर्लभ है। जो इसका न्यास अपने शरीराङ्गों में करता है, वह पवित्रात्मा हो जाता है। जो इस न्यास को करके संग्राम में प्रवेश करता है, उसके शरीर पर बाण, तलवार, तोमर, शक्ति तथा परशु प्रभाव नहीं करते हैं। वह शिव के समान पराक्रमी हो जाता है, उसके शत्रु उसका कुछ भी नहीं बिगाड़ पाते हैं। जो व्याधिग्रस्त व्यक्ति शिवमार्जन ग्यारह कुशों से करता है, उसका भूत-प्रेत, पिशाच, कूष्माण्ड तथा विनायक-जन्य कष्ट दूर हो जाता है। शिव के प्रभाव से वे उसके शरीर में प्रवेश नहीं करते हैं।

'ॐ नमः पञ्चवक्त्राय, शशिसोमार्कनेत्राय, भयार्त्तानामभयाय मम सर्वगात्ररक्षार्थे विनियोगः' इस मन्त्र से कवच का विनियोग करना चाहिये। तिलक 'ॐ हौं हां हं' इस मन्त्र से बैल के गोबर के भस्म का तिलक (त्रिपुण्ड्र) ललाट पर लगाकर कवच का पाठ करना प्रारम्भ करना चाहिये।

त्राहि मां देव दुष्प्रेक्ष शत्रूणां भयवर्द्धन। ॐ स्वच्छन्दभैरवः प्राच्यामाग्नेय्यां शिखिलोचनः॥ १॥
भूतेशो दक्षिणे भागे नैर्ऋत्यां भीमदर्शनः। वारुण्यां वृषकेतुश्च वायौ रक्षतु शङ्करः॥ २॥
दिग्वासाः सौम्यतो नित्यमैशान्यां मदनान्तकः। वामदेवोर्ध्वतो रक्षेदधो रक्षेत्त्रिलोचनः॥ ३॥
पुरारिः पुरतः पातु कपर्दी पातु पृष्ठतः। विश्वेश्वो दक्षिणे भागे वामे कालीपतिः सदा॥ ४॥
महेश्वरः शिरोभागे भवो भाले सदैव तु। भ्रुवोर्मध्ये महातेजास्त्रिनेत्रो नेत्रयोर्द्वयोः॥ ५॥
पिनाकी नासिकादेशे कर्णयोर्गिरिजापतिः। उग्रः कपोलयो रक्षेन्मुखदेशे महाभुजः॥ ६॥

जिह्वायामन्धकध्वंसी दन्तान्रक्षतु मृत्युजित्। नीलकण्ठः सदा कण्ठे पृष्ठे कामाङ्गनाशनः॥ ७॥
त्रिपुरारिः स्कन्धदेशे बाह्वोश्च चन्द्रशेखरः। हस्तिचर्मधरो हस्ते नखाङ्गुलिषु शूलभृत्॥ ८॥
भवानीशः पातु हृदि पातूदरकटी मृडः। गुदे लिङ्गे च मेढ्रे च नाभौ च प्रमथाधिपः॥ ९॥
जङ्घोरुचरणे भीमः सर्वाङ्गे केशवप्रियः। रोमकूपे विरूपाक्षः शब्दस्पर्शे च योगवित्॥ १०॥
रक्तमज्जावसामांसशुक्रे वसुगणार्चितः। प्राणापानसमानेषूदानव्यानेषु धूर्जटिः॥ ११॥
रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन यत्। तत्सर्वं रक्ष मे देव व्याधिदुर्गज्वरादितः॥ १२॥

हे शत्रुओं का भय बढ़ाने वाले, दुष्प्रेक्ष्य देव! मेरी रक्षा करो। स्वच्छन्दभैरव पूर्व में, अग्निकोण में शिखिलोचन, भूतेश दक्षिण भाग में, भीमदर्शन नैर्ऋत्य में, वृषकेतु पश्चिम में एवं वायव्य में मेरी रक्षा शङ्कर करें। दिग्वासा उत्तर से मेरी नित्य रक्षा करें तथा ईशान में मदनान्तक, वामदेव ऊर्ध्व में तथा त्रिलोचन अधोभाग में रक्षा करें। पुरारी सामने से रक्षा करें, कपर्दी पीछे से रक्षा करें। विश्वेश दाहिनी ओर से तथा कालीपति बाँईं ओर से सदैव मेरी रक्षा करें। महेश्वर शिरोभाग में, भव भाल में, भौंहों के मध्य में महातेजा एवं त्रिनेत्र दोनों नेत्रों की रक्षा करें। पिनाकी नाक की, गिरिजापति कर्ण की, उग्र कपोलों की तथा महाभुज मुख की रक्षा करें। अन्धकध्वंसी जीभ की एवं मृत्युजित् दाँतों की रक्षा करें। नीलकण्ठ सदैव कण्ठ की रक्षा करें तथा पीठ की कामाङ्गनाशन रक्षा करें। त्रिपुरारी स्कन्ध देश की, चन्द्रशेखर बाहुओं की, हस्तिचर्मधर हाथ की एवं शूलभृत् नख तथा अङ्गुलियों की रक्षा करें। भवानीश हृदय की रक्षा करें। मृड उदर तथा कटि की रक्षा करें। गुद-लिंग-मेढ्र-नाभि की रक्षा प्रमथाधिप करें। जङ्घा-ऊरु-चरण की भीम, सर्वाङ्ग की केशवप्रिय, रोमकूपों की विरूपाक्ष, शब्दस्पर्श की योगवित्, रक्त-मज्जा-वसा-मांस-शुक्र की वसुगणार्चित तथा प्राणापान-समान-उदान एवं व्यान की रक्षा धूर्जटि करें। जो रक्षाहीन स्थान है तथा जिसका कवच में उल्लेख नहीं है, उस सबकी एवं रोग, दुर्ग तथा ज्वरादि से देव रक्षा करें॥ १-१२॥

कार्य्यं कर्म्म त्विदं प्राज्ञैर्दीपं प्रज्वाल्य सर्पिषा। निवेद्य शिखिनेत्राय वारयेत्तु ह्युदङ्मुखम्॥ १३॥
ज्वरदाहपरिक्रान्तं तथान्यव्याधिसंयुतम्। कुशैः सम्मार्ज्य सम्मार्ज्य क्षिपेद्दीपशिखां ज्वरम्॥ १४॥
ऐकाहिकं द्व्याहिकं वा तृतीयकचतुर्थकम्। वातपित्तकफोद्भूतं सन्निपातोग्रतेजसम्॥ १५॥
अन्यं दुःखदुराधर्षकर्म्मजं चाभिचारिकम्। धातुस्थं कफसम्मिश्रं विषमं कामसम्भवम्॥ १६॥
भूताभिषङ्गसंसर्गं भूतचेष्टादिसंस्थितम्। शिवाज्ञां घोरमन्त्रेण पूर्ववृत्तं स्वयं स्मर॥ १७॥
त्यज देहं मनुष्यस्य दीपं गच्छ महाज्वरः। कृतं तु कवचं दिव्यं सर्वव्याधिभयार्दनम्॥ १८॥

बुद्धिमानों को यह कार्य करना चाहिये—घी का दीपक जलाकर उसे श्री शङ्कर जी को निवेदित करके उसको उत्तर की ओर मुख तथा ज्योति करके जलाये। जो व्यक्ति ज्वर, दाह से परिक्रान्त तथा अनेक रोगों से युक्त हो, उसके शरीर का मार्जन कुशाग्र भाग से करके उसे दीपशिखा में फेंकते हुये (छिड़कते हुये) इस प्रकार कहे—एकाहिक द्व्याहिक, तृतीयक, चातुर्थिक, वातज, पित्तज, कफज, सन्निपातज उग्र तेज वाला ज्वर; अन्य कठिन दुर्धर्ष अभिचारजन्य तथा कर्मज दुःख, धातु में स्थित, कफसम्मिश्रित विषम, कामसम्भव रोग, भूताभिषङ्ग-जन्य रोग, संक्रामक रोग, भूत की चेष्टाओं वाला रोग जो भी हो, वह शिव की आज्ञा से अपने घोर चरित्र को स्वयं स्मरण कर इस मनुष्य के शरीर को छोड़कर हे महाज्वर! तू दीपक में चला जा। यह सर्वव्याधिविनाशकर्त्ता दिव्यकवच है॥ १३-१८॥

न बाधन्ते व्याधयस्तं बालग्रहभयानि च। लूताविस्फोटकं घोरं शिरोर्तिच्छर्दिविग्रहम्॥ १९॥
कामलां क्षयकासं च गुल्माश्मरीभगन्दराः। शूलोन्मादं च हृद्रोगयकृती पाण्डुविद्रधिम्॥ २०॥

अतिसारादिरोगांश्च डाकिनीपीडकग्रहान्। पामाविचर्चिकादद्रुकुष्ठव्याधिविषार्दनम् ॥ २१ ॥
स्मरणान्नाशयत्याशु कवचं शूलपाणिनः। यस्तु स्मरति नित्यं वै यस्तु धारयते नरः॥ २२॥
स मुक्तः सर्वपापेभ्यो वसेच्छिवपुरे चिरम्। सङ्ख्याव्रतस्य दानस्य यज्ञस्यास्तीह शास्त्रतः॥ २३॥
न सङ्ख्या विद्यते शम्भोः कवचस्मरणाद्यतः। तस्मात्सम्यगिदं सर्वैः सर्वकामफलप्रदम्॥ २४॥
श्रोतव्यं सततं भक्त्या कवचं सर्वकामिकम्। लिखितं तिष्ठते यस्य गृहे सम्यगनुत्तमम्॥ २५॥
न तत्र कलहोद्वेगो नाकालमरणं भवेत्। नाल्पप्रजाः स्त्रियस्तत्र न दौर्भाग्यं समाश्रिताः॥ २६॥
तस्मान्माहेश्वरं नाम कवचं देवगणार्चितम्। श्रोतव्यं पठितव्यं च मन्तव्यं भावुकप्रदम्॥ २७॥
श्रीमाहेश्वरकवचं सर्वव्याधिनिषूदनम्। यः पठेत्तु नरो नित्यं स व्रजेच्छाङ्करं पुरम्॥ २८॥

इति सर्वव्याधिहरं श्रीमाहेश्वरकवचं सम्पूर्णम्।

इस कवच को धारण करने वाले के रोग, बालग्रह, भय, लूता, विस्फोट, घोर शिरोशूल, वमन, कामला, क्षय, कास, गुल्म, अश्मरी, भगन्दर, शूल, उन्माद, हृद्रोग, यकृत् रोग, पाण्डु, विद्रधि, अतिसार आदि रोग, डाकिनी आदि ग्रहों की पीड़ा, पामा, विचर्चिका, दद्रु, कुष्ठ, व्याधि तथा विष का नाश होता है। इस शिवजी के कवच के स्मरण से शीघ्र ही ये सब नष्ट हो जाते हैं। जो इस कवच का नित्य स्मरण करता है तथा उसे धारण करता है, वह सभी पापों से मुक्त होकर शिवपुर में चिरकाल तक वास करता है। व्रत-दान-यज्ञ की तो शास्त्रों में संख्या बताई गयी है, परन्तु शिवजी के कवच के स्मरण तथा पाठ की कोई संख्या निर्धारित नहीं है। यह कवच सभी कामनाओं को पूर्ण करने वाला है। जिसके घर में यह कवच लिखा हुआ अथवा छपा हुआ स्थित रहता है, उसके घर में कलह तथा उद्वेग नहीं होता है और न ही अल्प सन्तान, अल्प स्त्रियाँ तथा दुर्भाग्य आता है। यह माहेश्वर कवच देवगणों के द्वारा अर्चित है। इसे सुनना, पढ़ना तथा मनन करना चाहिये। यह श्री माहेश्वर कवच सभी व्याधियों को नष्ट कर देता है। जो व्यक्ति इस कवच का नित्य पाठ करता है, वह शिवपुर को जाता है॥ १९-२८॥

सद्य आरोग्यकरं सूर्य्यार्घ्यदानविधानम्

सुदिने कृतनित्यक्रियः आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य 'मम अमुकस्य वा अमुकज्वरादिव्याधि-समूलनिरासद्वारा सद्यआरोग्यार्थं श्रीसवितृसूर्यनारायणप्रीत्यर्थं हंसादिसप्ततिनामभिः श्रीसूर्य्याय सप्तत्यर्घ्यदानमहं करिष्ये' इति सङ्कल्प्य भूतशुद्ध्यादि कृत्वा सम्मान्यार्घ्यं कल्पयेत्।

विगृह्य पाणियुग्मेन ताम्रपात्रं सुनिर्म्मलम्। जानुभ्यामवनीं गत्वा परिपूर्य्य जलेन च॥
करवीरादिकुसुमैः रक्तचन्दनमिश्रितैः। दूर्वाङ्कुरैरक्षतैश्च निक्षिप्तैः पात्रमध्यतः॥
दद्यादर्घ्यमनर्घाय सवित्रे ध्यानपूर्वकम्। उपमौलिसमानीय तत्पात्रं नान्यदिङ्मनाः॥
प्रतिमन्त्रं नमस्कुर्यादुदयास्तमिते रवौ। अनया नामसप्तत्या महामन्त्ररहस्यया॥

एवमर्घ्यं प्रकल्प्य पाद्यादिभिः सम्पूज्य प्रणम्य यथोक्तविधिना प्रत्येकनाम्ना बृहत्पात्रे घटे जले वा अर्घ्यं दद्यात्। तद्यथा—ॐ हंसाय नमः॥ १॥ ॐ भानवे नमः॥ २॥ ॐ सहस्रांशवे नमः॥ ३॥ ॐ तपनाय नमः॥ ४॥ ॐ तापनाय नमः॥ ५॥ ॐ रवये नमः॥ ६॥ ॐ विकर्त्तनाय नमः॥ ७॥ ॐ विवस्वते नमः॥ ८॥ ॐ विश्वकर्म्मणे नमः॥ ९॥ ॐ विभावसवे नमः॥ १०॥ ॐ विश्वरूपाय नमः॥ ११॥ ॐ विश्वकर्त्रे नमः॥ १२॥ ॐ मार्तण्डाय नमः॥ १३॥ ॐ मिहिराय नमः॥ १४॥ ॐ अंशुमते नमः॥ १५॥ ॐ आदित्याय नमः॥ १६॥ ॐ उष्णगवे नमः॥ १७॥ ॐ सूर्य्याय नमः॥ १८॥ ॐ अर्य्यम्णे नमः॥ १९॥ ॐ ब्रध्नाय नमः॥ २०॥ ॐ दिवाकराय नमः॥ २१॥ ॐ द्वादशात्मने

नमः ॥ २२ ॥ ॐ सप्तहयाय नमः ॥ २३ ॥ ॐ भास्कराय नमः ॥ २४ ॥ ॐ अहस्कराय नमः ॥ २५ ॥ ॐ खगाय नमः ॥ २६ ॥ ॐ सुराय नमः ॥ २७ ॥ ॐ प्रभाकराय नमः ॥ २८ ॥ ॐ श्रीमते नमः ॥ २९ ॥ ॐ लोकचक्षुषे नमः ॥ ३० ॥ ॐ ग्रहेश्वराय नमः ॥ ३१ ॥ ॐ लोकेशाय नमः ॥ ३२ ॥ ॐ लोकसाक्षिणे नमः ॥ ३३ ॥ ॐ तमोऽरये नमः ॥ ३४ ॥ ॐ शाश्वताय नमः ॥ ३५ ॥ ॐ शुचये नमः ॥ ३६ ॥ ॐ गभस्तिहस्ताय नमः ॥ ३७ ॥ ॐ तीव्रांशवे नमः ॥ ३८ ॥ ॐ तरणये नमः ॥ ३९ ॥ ॐ सुमहोरुणये नमः ॥ ४० ॥ ॐ द्युमणये नमः ॥ ४१ ॥ ॐ हरिदश्वाय नमः ॥ ४२ ॥ ॐ अर्काय नमः ॥ ४३ ॥ ॐ भानुमते नमः ॥ ४४ ॥ ॐ भयनाशनाय नमः ॥ ४५ ॥ ॐ छन्दोश्वाय नमः ॥ ४६ ॥ ॐ वेदवेद्याय नमः ॥ ४७ ॥ ॐ भास्वते नमः ॥ ४८ ॥ ॐ पूष्णे नमः ॥ ४९ ॥ ॐ वृषाकपये नमः ॥ ५० ॥ ॐ एकचक्ररथाय नमः ॥ ५१ ॥ ॐ मित्राय नमः ॥ ५२ ॥ ॐ मन्देहारये नमः ॥ ५३ ॥ ॐ तमिस्रहन्त्रे नमः ॥ ५४ ॥ ॐ दैत्यहन्त्रे नमः ॥ ५५ ॥ ॐ पापहर्त्रे नमः ॥ ५६ ॥ ॐ धर्म्माय नमः ॥ ५७ ॥ ॐ अधर्म्याय नमः ॥ ५८ ॥ ॐ प्रकाशकाय नमः ॥ ५९ ॥ ॐ हेलिकाय नमः ॥ ६० ॥ ॐ चित्रभानवे नमः ॥ ६१ ॥ ॐ कलिघ्नाय नमः ॥ ६२ ॥ ॐ तार्क्ष्यवाहनाय नमः ॥ ६३ ॥ ॐ दिक्पतये नमः ॥ ६४ ॥ ॐ पद्मिनीनाथाय नमः ॥ ६५ ॥ ॐ कुशेशयकराय नमः ॥ ६६ ॥ ॐ हरये नमः ॥ ६७ ॥ ॐ घर्मरश्मये नमः ॥ ६८ ॥ ॐ दुर्निरीक्ष्याय नमः ॥ ६९ ॥ ॐ चण्डांशवे नमः ॥ ७० ॥ (ॐ कश्यपात्मजाय नमः)।

एभिः सप्ततिसङ्ख्याकैः पुण्यैः सूर्य्यस्य नामभिः। प्रणवादिचतुर्थ्यन्तैर्नमस्कारसमायुतैः ॥
प्रत्येकमुच्चरन्नाम दृष्ट्वा-दृष्ट्वा दिवाकरम्। एवं कुर्वन्नरो याति न दारिद्र्यं न शोकभाक् ॥
व्याधिभिर्मुच्यते घोरैरपि जन्मान्तरार्जितैः। विनौषधैर्विना वैद्यैर्विना पथ्यपरिग्रहैः ॥
कालेन निधनं प्राप्य सूर्य्यलोके महीयते।

इति सर्वव्याधिहरं श्रीसूर्य्यार्घ्यविधानम्।

सूर्यार्घ्य-विधान—शुभ दिन प्रातःकाल नित्य क्रियाओं से निवृत्त होकर आचमन तथा प्राणायाम करके देश-काल का उच्चारण करके 'मम अमुकस्य वा ज्वरादिव्याधिसमूलनाशद्वारा सद्य आरोग्यार्थं श्रीसवितृसूर्यनारायण-प्रीत्यर्थं हंसादिसप्ततिनामभिः श्रीसूर्याय सप्तति अर्घ्यदानमहं करिष्ये' ऐसा सङ्कल्प करके भूतशुद्धि आदि कर अर्घ्य की कल्पना करे।

अर्घ्यनिर्माण-विधि—शुद्ध ताम्रपात्र को अपने दोनों हाथों में ग्रहण करके उसे निर्मल जल से परिपूर्ण करके लाल कनेर आदि के फूलों तथा लाल चन्दन को मिश्रित कर दूर्वाङ्कुरों तथा अंक्षतों का निक्षेप उस पात्रस्थ जल में करके घुटनों को धरती पर टेककर ध्यानपूर्वक अनर्घ्य सूर्यनारायण को अर्घ्य दे। अर्घ्य देते समय अर्घ्य को शिर से लगाकर सूर्य की दिशा में देना चाहिये। यह अर्घ्य उदित तथा अस्तकाल में आगे लिखे ७० मन्त्रों के उच्चारण के साथ किसी बड़े घड़े या पात्र से (मन्त्रों के उच्चारण पूर्ण होने तक निरन्तर) देते रहना चाहिये।

अर्घ्यदान के सत्तर मन्त्र—मूल पाठ में 'ॐ हंसाय नमः' से लेकर 'ॐ चण्डांशवे नमः' पर्यन्त कुल सत्तर मन्त्र लिखे हैं, उनसे ही अर्घ्य देना चाहिये। इस प्रकार से सूर्य के सत्तर नामों के पूर्व ॐ तथा पश्चात् चतुर्थी विभक्ति के उपरान्त नमः लगाकर प्रत्येक नाम का उच्चारण करते हुए सूर्य की ओर देख-देखकर जो मनुष्य अर्घ्य देता है, उसे दरिद्रता तथा शोक प्राप्त नहीं होता है। वह घोर व्याधियों से मुक्त होकर जिन्हें उसने जन्मान्तरों में अर्जित किया है, वे सब रोग बिना औषधि, वैद्य तथा पथ्यपरिग्रह के ही ठीक हो जाते हैं। समय पर उसकी मृत्यु होती है तथा वह सूर्यलोक में आनन्द करता है।

विमर्श—संस्कृत का 'अर्घ्य' शब्द ही घिसकर यूनानी अरबी चिकित्सा पद्धति में 'अर्क' बन गया है, जो सुगन्धित द्रव्यों तथा मृदु वनस्पतियों को जल में भिगोकर उनके वाष्पीकरण द्वारा बनाया जाता है, जैसे—

अर्कगुलाब, अर्ककेवड़ा, अर्कसन्दल (चन्दन), अर्कसौंफ, अर्कमकोय आदि। अर्घ्य में भी जल को सुगन्धित पुष्पों के प्रक्षेपादि से सुवासित करके ही प्रयोग में लाते हैं।

ज्वरस्तोत्रम्

विद्राविते भूतगणे ज्वरस्तु त्रिशिरास्त्रिपात्। अभ्यपद्यत दाशार्हं दहन्निव दिशो दश॥ १॥
अथ नारायणो देवस्तं दृष्ट्वा व्यसृजज्ज्वरम्। माहेश्वरो वैष्णवश्च युयुधाते ज्वरावुभौ॥ २॥
माहेश्वरः समाक्रन्दन्वैष्णावेन बलार्दितः। अलब्ध्वाभयमन्यत्र भीतो माहेश्वरो ज्वरः॥ ३॥
शरणार्थी हृषीकेशं तुष्टाव प्रयताञ्जलिः।

ज्वरस्तोत्र—भूतगणों के पलायन कर जाने पर तीन शिर तथा तीन पैरों वाला ज्वर दशों दिशाओं को जलाता हुआ भगवान् श्रीकृष्ण की ओर दौड़ पड़ा। तब भगवान् ने उसे अपनी ओर आता हुआ देखकर उसके प्रतिकारहेतु नारायण ज्वर को छोड़ दिया। तब माहेश्वर ज्वर तथा नारायण ज्वर दोनों आपस में लड़ने लगे। अन्ततः वैष्णव ज्वर के द्वारा पराभूत माहेश्वर ज्वर अन्यत्र अभय न देखकर हृषीकेश से हाथ जोड़कर बोला॥ १-३॥

ज्वर उवाच—

नमामि त्वाऽनन्तशक्तिं परेशं सर्वात्मानं केवलं ज्ञप्तिमात्रम्।
विश्वोत्पत्तिस्थानसंरोधहेतुं यत्तद्ब्रह्म ब्रह्मलिङ्गं प्रशान्तम्॥ ४॥
कालो दैवं कर्म जीवः स्वभावो द्रव्यं क्षेत्रं प्राण आत्मा विकारः।
तत्सङ्घातो बीजरोहप्रवाहस्त्वन्मायैषा तन्निषेधं प्रपद्ये॥ ५॥
नानाभावैर्लीलयैवोपपन्नैर्देवान् साधूँल्लोकसेतून् विभर्षि।
हंस्युन्मार्गान् हिंसया वर्तमानाञ्जन्मैतत्ते भारहाराय भूमेः॥ ६॥
तप्तोऽहं ते तेजसा दुःसहेन शान्तोग्रेणात्युल्बणेन ज्वरेण।
तावत्तापो देहिनां तेंऽघ्रिमूलं नो सेवेरन्यावदाशानुबद्धाः॥ ७॥

ज्वर बोला—आप परेश अनन्तशक्ति सर्वात्मा तथा सर्वस्वरूप हैं। संसार की उत्पत्ति, स्थिति, तथा संहार के कारण आप ही हैं। श्रुतियों में आपका ही वर्णन तथा अनुमान किया जाता है। आप समस्त विकारों से रहित स्वयंब्रह्म हैं; अतः मैं आपको प्रणाम करता हूँ। काल दैव, (अदृष्ट), कर्म, जीव, स्वभाव, सूक्ष्मभूत शरीर, सूत्रात्मा प्राण, अहङ्कार, एकादश इन्द्रियाँ तथा पञ्च महाभूत—इन सबका सङ्घात यह लिङ्गशरीर है। बीजाङ्कुर न्याय के अनुसार उससे कर्म तथा कर्म से फिर लिङ्गशरीर की उत्पत्ति होती है। यह सब आपकी माया है। आप माया के निषेध की परम अवधि हैं। मैं आपकी शरण में जाता हूँ। हे प्रभो! आप ही अपनी लीला से अनेकों रूप धारण करते हैं तथा देवताओं, लोकों एवं साधु-सन्तों का पालन करते हैं; साथ ही उन्मार्गगामी असुरों का संहार भी करते हैं। आपका यह अवतार पृथ्वी का भार उतारने के लिये ही हुआ है। मैं आपके तेज से तप्त उत्पन्न उल्वण ज्वर से अत्यन्त सन्तप्त हो रहा हूँ। हे प्रभो! जीवों को तभी तक सन्ताप रहता है जब तक वे आशाओं के पाश में बँधे रहकर आपकी शरण में नहीं जाते हैं॥ ४-७॥

श्रीभगवानुवाच—

त्रिशिरस्ते प्रसन्नोऽस्मि व्येतु ते मज्ज्वराद्भयम्। यो नौ स्मरति संवादं तस्य त्वन्न भवेद्भयम्॥ ८॥
इत्युक्तोऽच्युतमानम्य गतो माहेश्वरो ज्वरः। बाणस्तु रथमारूढः प्रागाद्योत्स्यञ्जनार्दनम्॥ ९॥

इति श्रीमद्भागवते दशमस्कन्धे ज्वरकृतस्तोत्रम्।

श्री भगवान् बोले—हे त्रिशिर! मैं तुमसे प्रसन्न हूँ, तुम मेरे ज्वर से भय मत करो। जो मनुष्य मेरे और तुम्हारे इस संवाद का स्मरण करेगे, उन्हें ज्वर का भय नहीं रहेगा। भगवान् के ऐसा कहने पर वह माहेश्वर ज्वर अच्युत को प्रणाम करके चला गया और बाणासुर भी रथ पर आरूढ़ होकर श्रीकृष्ण से युद्ध करने के लिये पुनः आ डटा॥ ८-९॥

ज्वरतर्पणम्

महार्णवे—

योऽसौ सरस्वतीतीरे कुत्सगोत्रसमुद्भवः। त्रिरात्रज्वरदाहेन मृतो गोविन्दसंज्ञकः॥ १॥
ज्वरापनुत्तये तस्मै ददाम्येतत्तिलोदकम्।

तथा—

गङ्गाया उत्तरे कूले अपुत्रस्तापसो मृतः। रात्रौ ज्वरविनाशाय तस्मै दद्यात्तिलोदकम्॥ २॥

इति मन्त्रद्वयेन तिलरक्ताक्षतरक्तपुष्पादियुतजलेन ज्वरानुसारेणाष्टोत्तरशताद्ययुतं तर्पणं ज्वरमुद्दिश्य कर्त्तव्यम्।

इति ज्वरतर्पणम्।

ज्वरतर्पण (महार्णव के अनुसार)—इस सरस्वती के तीर पर जो कुत्स गोत्र में उत्पन्न गोविन्द नामक व्यक्ति त्रिरात्र ज्वर के कारण मर गया है, उसके लिये यह तिलोदक दिया जाता है। गङ्गा के उत्तर किनारे पर जो अपुत्र तापस मर गया है, रात्रिज्वर के विनाश के लिये उसे तिलोदक दिया जाता है। इस भावार्थ को प्रकट करने वाले इन दो मन्त्रों को उच्चारित करके काले तिल, लाल चावल, लाल फूल आदि से युक्त जल के द्वारा ज्वर के अनुसार एक सौ आठ तर्पण उस ज्वर के लिये करना चाहिये।

सर्वरोगहरमच्युतानन्तगोविन्देति नामत्रयविधानम्

ॐ अच्युतानन्द गोविन्देति नामत्रयस्य वसिष्ठकश्यपनारदा ऋषयः। उष्णिग्गायत्रीपुरुषप्रकृतीसुतलच्छन्दांसि। महाविष्णुमहानृसिंहमहावराहा देवताः। अमुकरोगशान्तये जपे विनियोगः। अस्य मन्त्रस्य रोगानुसारेण सहस्रमयुतं लक्षं वा जपं कृत्वा जपान्ते दशांशेन तिलपायसहोमं तद्दशांशेन तर्पणं तद्दशांशेन मार्ज्जनं तद्दशांशेन शक्त्या वा ब्राह्मणभोजनं च कुर्य्यात्। तथा च वीरसिंहावलोकने शङ्करगीतावाक्यम्—

अच्युतानन्तगोविन्देत्येतन्नामत्रयं द्विजः। अयुतत्रयसङ्ख्याकं जपं कुर्य्याद्धि शान्तये॥

इति नामत्रयविधानम्।

सर्वरोगनाशक नामत्रय का विधान—अच्युत, अनन्त, गोविन्द—इन तीन नामों के वसिष्ठ, कश्यप तथा नारद ऋषि हैं। उष्णिक्, गायत्री, पुरुष, प्रकृति तथा सुतल छन्द हैं। महाविष्णु, महानृसिंह तथा महावराह देवता हैं। अमुक रोग की शान्तिहेतु नामत्रय के जप में विनियोग है। इस मन्त्र का रोगानुसार एक सहस्र, अयुत अथवा लक्षसंज्ञक जप करके अन्त में दशांश संख्या में तिल-पायस से होम करके उसके दशांश तर्पण, तद्दशांश मार्जन तथा तद्दशांश अथवा यथाशक्ति ब्राह्मणभोजन कराना चाहिये। जैसा कि वीर सिंहावलोक में शङ्करगीता का वाक्य दिया गया है—अच्युत, अनन्त तथा गोविन्द—इन तीन नामों का द्विज अयुत संख्या में जप करे। तो व्याधि की शान्ति होती है।

सर्वव्याधिहरं विष्णुसहस्रनामविधानम्

तदुक्तं महाभारते—

सहस्रनामस्तोत्रं च सर्वं वारत्रयं जपेत्। मृत्युरोगप्रशान्त्यर्थमात्मनश्च शुभाप्तये॥

तत्र प्रयोगः—सुमुहूर्त्ते शिवालयादिषु कृतनित्यक्रियः स्वासने प्राङ्मुख उपविश्य आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य 'ममामुकव्याधेः समूलनाशद्वारा सद्य आरोग्यार्थं श्रीपरमेश्वरप्रीत्यर्थममुकसङ्ख्यया विष्णुसहस्रनामजपं करिष्ये' इति सङ्कल्प्य गणेशस्मरणं कृत्वा स्वपुरतः आधारे अन्यलिखितपुस्तकं संस्थाप्य गन्धपुष्पादिभिः सम्पूज्य शापविमोचनं पठेत्। ॐ अस्य श्रीविष्णोः सहस्रनाम्नां रुद्रशापमोचनमन्त्रस्य महादेव ऋषिः। अनुष्टुप् छन्दः। श्रीरुद्रानुग्रहशक्तिर्देवता। सुरेशः शरणं शर्मेति बीजम्। अनन्तो हुतभुग्भोक्तेति शक्तिः। सुरेश्वरायेति कीलकम्। रुद्रशापविमोचने विनियोगः। ॐ क्लीं ह्रां अङ्गुष्ठाभ्यां नमः। ॐ ह्रीं तर्जनीभ्यां नमः। ॐ ह्रूं मध्यमाभ्यां नमः। ॐ ह्रैं अनामिकाभ्यां नमः। ॐ ह्रौं कनिष्ठिकाभ्यां नमः। ॐ ह्रः करतलकरपृष्ठाभ्यां नमः। इति करन्यासः। एवमेव हृदयादिन्यासं कृत्वा ध्यायेत्।

अथ ध्यानम्—

तमालश्यामलतनुं पीतकौशेयवाससम्। वर्णमूर्तिमयं देवं ध्यायेन्नारायणं विभुम्॥

इति ध्यात्वा मानसोपारैः सम्पूज्य 'ॐ क्लींह्रांह्रींह्रूंह्रैंह्रौंह्रः स्वाहा' इति मन्त्रं शतवारं दशवारं वा जप्त्वा किञ्चिज्जलं क्षिप्त्वा प्रार्थयेत्। 'ॐ श्रीविष्णोः सहस्रनामस्तवो रुद्रशापविमुक्तो भव' इति प्रार्थ्य सततं तदनन्तरं सहस्रनामपठनं कुर्य्यात्।

विष्णोः सहस्रनाम्नां यो ह्यकृत्वा शापमोचनम्। पठेच्छुभानि सर्वाणि स्युस्तस्य निष्फलानि तु॥

इत्यगस्तिसंहितायां रुद्रशापविमोचनम्।

सर्वव्याधिनाशक विष्णुसहस्रनाम प्रयोग—महाभारत में कहा गया है—मृत्यु तथा रोग की शान्ति के लिये एवं आत्म-कल्याण के लिये प्रतिदिन त्रिकाल समय (प्रातः, मध्याह्न, सायं) श्रीविष्णुसहस्रनाम का जप करना चाहिये।

शापमोचन—अगस्त्यसंहिता के अनुसार सर्वप्रथम विष्णु सहस्रनाम का शाप-विमोचन कर्म करना चाहिये। वह इस प्रकार है—सुमुहूर्त में शिवालय आदि में नित्यक्रिया से निवृत्त होकर अपने आसन पर पूर्व या उत्तर की ओर मुख करके बैठकर आचमन तथा प्राणायाम कर देश-काल का उच्चारण करके 'ममामुकव्याधिसमूलनाशद्वारा सद्य आरोग्यार्थं श्रीपरमेश्वरप्रीत्यर्थं अमुकसङ्ख्यया विष्णुसहस्रनामजपं करिष्ये' ऐसा सङ्कल्प करके श्रीगणेशजी का स्मरण कर शाप-विमोचनार्थ न्यास करे। सर्वप्रथम 'ॐ अस्य श्रीविष्णोः सहस्रनाम्नां रुद्रशापमोचनमन्त्रस्य महादेव ऋषिः। अनुष्टुप् छन्दः। श्रीरुद्रानुग्रहशक्तिर्देवता। सुरेशः शरणं शर्मेति बीजम्। अनन्तो हुतभुक् भोक्तेति शक्तिः। सुरेश्वरायेति कीलकम्। रुद्रशापविमोचने विनियोगः' यह मन्त्र कहकर रुद्रशाप-विमोचनार्थ पृथ्वी पर जल छोड़े। शाप-विमोचन मन्त्र-हेतु ऋष्यादिन्यास करके मूलोक्त 'ॐ क्लीं ह्रां अङ्गुष्ठाभ्यां नमः' इत्यादि छः मन्त्रों से करन्यास करे। तदनन्तर 'ॐ क्लीं ह्रां हृदयाय नमः, ॐ ह्रीं शिरसे स्वाहा, ॐ ह्रूं शिखायै वषट्, ॐ ह्रैं कवचाय हुम्, ॐ ह्रौं नेत्रत्रयाय वौषट्, ॐ ह्रः अस्त्राय फट्' इन छः मन्त्रों से हृदयादि षडङ्ग न्यास करे। फिर मूल में लिखित 'तमालश्यामलतनुं पीतकौशेयवासम्। वर्णमूर्तिमयं देवं ध्यायेन्नारायणं विभुम्॥' (तमालपत्र के समान श्यामल शरीर वाले, पीतकौशेय वस्त्रधारी, चारो वर्णों के मूर्तिमान् स्वरूप विभु देव नारायण का ध्यान करे) मन्त्र से ध्यान करना चाहिये। फिर मानसोपचारों से देव नारायण का पूजन करके 'ॐ क्लीं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः स्वाहा' यह विष्णुसहस्रनाम का शाप-विमोचन मन्त्र है, इसे एक सौ बार या दश बार जपना चाहिये तथा थोड़ा-सा जल हाथ में लेकर फेंककर प्रार्थना करे—'ॐ श्रीविष्णोः सहस्रनामस्तवो रुद्रशापविमुक्तो भव'। इसके उपरान्त एक बार निरन्तर विष्णुसहस्रनाम का पाठ कर ले तो वह शापविमुक्त हो जाता है। इस प्रकार जो विष्णु सहस्रनाम का पाठ करने के पूर्व शाप-विमोचन करके पढ़ता है, उसका अनुष्ठान सफल होता है। यदि बिना शाप-विमोचन किये पाठ करे तो वह निष्फल होता है।

अथ सहस्त्रनामस्तोत्रस्य न्यासध्यानादिप्रकारः—ॐ अस्य श्रीविष्णोर्दिव्यसहस्त्रनामस्तोत्रमालामन्त्रस्य श्रीभगवान् वेदव्यास ऋषिः। अनुष्टुप् छन्दः। श्रीकृष्णः परमात्मा देवता। आत्मयोनिः स्वयं जात इति बीजम्। देवकीनन्दनः स्त्रष्टेति शक्तिः। उद्भवः क्षोभणो देव इति परमो मन्त्रः। शङ्खभृन्नन्दकी चक्रीति कीलकम्। त्रिसामासामगः सामेति कवचम्। शार्ङ्गधन्वा गदाधर इत्यस्त्रम्। ॐ विश्वं विष्णुर्वषट्कार इति ध्यानम्। श्रीकृष्णप्रीत्यर्थे अमुकरोगनिवारणार्थे नामसहस्त्रपाठे विनियोगः। ॐ वेदव्यासऋषये नमः शिरसि॥ १॥ ॐ अनुष्टुप् छन्दसे नमो मुखे॥ २॥ ॐ श्रीकृष्णपरमात्म-देवतायै नमः हृदये॥ ३॥ ॐ आत्मयोनिः स्वयं जात इति बीजाय नमो गुह्ये॥ ४॥ ॐ देवकीनन्दनः स्त्रष्टेति शक्तये नमः पादयोः॥ ५॥ ॐ शङ्खभृन्नन्दकी चक्रीति कीलकाय नमः सर्वाङ्गे॥ ६॥ इति ऋष्यादिन्यासः। अथ करन्यासः—ॐ विश्वं विष्णुर्वषट्कार इत्यङ्गुष्ठाभ्यां नमः॥ १॥ ॐ अमृतांशूद्भवो भानुरिति तर्जनीभ्यां नमः॥ २॥ ॐ ब्रह्मण्यो ब्रह्मकृद्ब्रह्मेति मध्यमाभ्यां नमः॥ ३॥ ॐ सुवर्णबिन्दुरक्षोभ्य इत्यनामिकाभ्यां नमः॥ ४॥ ॐ आदित्यो ज्योतिरादित्य इति कनिष्ठिकाभ्यां नमः॥ ५॥ ॐ शार्ङ्गधन्वा गदाधर इति करतलकरपृष्ठाभ्यां नमः॥ ६॥ इति करन्यासः। एवमेव हृदयादिषडङ्गन्यासं कृत्वा ध्यायेत्।

अथ ध्यानम्—

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम्।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम्॥

इति ध्यात्वा मानसोपचारैः सम्पूज्य ॐ नारायणाय नमः॥ १॥ ॐ नराय नमः॥ २॥ ॐ नरोत्तमाय नमः॥ ३॥ ॐ देव्यै नमः॥ ४॥ ॐ सरस्वत्यै नमः॥ ५॥ ॐ व्यासाय नमः॥ ६॥ इति नमस्कृत्य स्पष्टपदाक्षरं स्तोत्रं पठेत्। अस्य पुरश्चरणं रोगानुसारेण सहस्त्रमयुतं लक्षं वा जपदशांशतस्तिलपायसाज्यैर्होमः। होमस्तु सहस्त्रनामभिः स्वाहान्तैः कार्य्यः। अन्यत्सर्वं यथाविधि कुर्य्यात्। सद्य आरोग्यतासिद्धये अच्युतानन्त गोविन्देति नामत्रयेण सम्पुटितस्य सहस्त्रनामस्तवस्य जपः कार्य्यः। अथवा—

ॐ कृष्णाय वासुदेवाय हरये परमात्मने। प्रणतक्लेशनाशाय गोविन्दाय नमोनमः॥ १॥
इत्यनेन।

ॐ आपदामपहर्तारं दातारं सर्वसम्पदाम्। लोकाभिरामं श्रीरामं भूयोभूयो नमाम्यहम्॥ २॥
इति मन्त्रेण वा सम्पुटितस्य जपेन सर्वरोगनाशः।

इति ज्वरहराणि।

